MANUSCRIPT NO.	**274**
NAME OF MANUSCRIPT	**Valmiki Ramayana : "Aranya Kand & Kishkinda Kand"**
AUTHOR	**Maharishi Valmiki**
SUBJECT	**Religion**
LANGUAGE	**Sanskrit**
SCRIPT	**Devnagiri**
BRIEF EXPLANATORY NOTE	**The manuscript contains the epic of Ramayana (Kishkinda Kand & Aranya Kand) by Maharishi Valmiki.**

वाल्मीकि रामायण ; आरण्य तथा किष्किन्धा काण्ड ॥
भिन्न पत्रक ॥ ल० म० १५ पं० प्र० ५

ह० ल०

श्री
रा॰आ॰
१
168

ॐ श्रीगणेशाय नमः अथ ऋषिदर्शितवर्त्मना रामस्य दंडकारण्यप्रवेशमाह प्रविश्ये
ति ऋषिदर्शितवर्त्मनेति शेषः दंडकारण्यं तत्समस्तमहारण्यं दंडकस्य राज्ञो देशः शुक्रशा
पवशादरण्यमभूत् ततः प्रभृति दंडकारण्यसंज्ञा तस्य प्रायेण महाराष्ट्रदेशगयं आत्मवान् आत्मा
यत्तचित्तः दुर्धर्षो द्विषद्भिरप्रधृष्यः दुर्धर्षमिति पाठे रक्षोयुतत्वाद्दुष्प्रवेशमित्यर्थः मंड
लं समूहः १ आश्रममंडलं वर्णयति कुशेति परिक्षिप्तं व्याप्तं ब्राह्मी लक्ष्मीः ब्रह्मविद्या

ॐ श्रीगणेशाय नमः प्रविश्य तु महारण्यं दंडकारण्यमात्मवान् रामो ददर्श दुर्धर्ष
स्तापसाश्रममंडलं १ कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतं यथा प्रदीप्तं दुर्दर्शं
गगने सूर्यमंडलं २ शरण्यं सर्वभूतानां सुसंमृष्टाजिरं सदा मृगैर्बहुभिराकीर्णं प
क्षिसंघैः समावृतं ३ पूजितं चोपनृत्तं च नित्यमप्सरसां गणैः विशालैरग्निशरणैः स्रु
ग्भाण्डैरजिनैः कुशैः ४ ॥

भ्यासजनितस्तेजोविशेषः तत्समावृतत्वादेव दुर्दर्शने प्रदीप्तं दुर्धर्षं रत्नादिभिर्दीप्तमथवाकां
सूर्यमंडलमुपमा तथाभूतं विभाति २ शरण्यं रक्षकं सादृशं सर्वेषां प्राणिनां देवसंसंमृष्टाजिरम् अलं
कृतप्रांगणं ३ अप्सरसां गणैः उपनृत्तं उपसमीपे कृतनर्तनं अतिमानेषु रमणीयदेशत्वात् अ
त एव तैः पूजितं च अग्निशरणैः अग्निहोत्रगृहैः स्रुगादिभिर्यज्ञोपकरणान्युपशोभितं ४

168A

आरण्यैः आरण्यभवैः ५ बलिहोमार्चितं वैश्वदेवहोमबलिहरणैः सत्कृतं ब्रह्मघोषो वेदघोषः तेनना
नादितं संज्ञातनिनादं पद्मिनीसरः सपद्मया पद्मयुक्तया ६ पुराणैर्वृद्धैः ७ ब्रह्मभवनं ब्रह्मलो
कः ब्रह्मघोषो वेदघोषः ८ ब्रह्मविद्भिः सर्वत्र ब्रह्मध्यानमनुवर्तमानैर्वद्भिः ब्राह्मणैस्तत्कालत्वं स्वेष्य
ब्राह्मणैः तादृशयुक्तत्वादेव ब्रह्मभवनप्रख्यं तमाश्रमस्य ९ विन्यस्य आरोपितशरणमाश्रमं वनिम्न

समिद्भिस्तोयकलशैः फलमूलैश्च शोभितं आरण्यैश्च महावृक्षैः पुण्यैः स्वादुफलैर्वृतं ५
बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितं पुष्पैश्चान्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ६
फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्युतं ७ पु
ण्यैश्च नियताहारैः शोभितं परमर्षिभिः तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितं ८ ब्र
ह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितं तद्दृष्ट्वा राघवः श्रीमांस्तापसाश्रममण्डलं अ
भ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः १०
अभिजग्मुस्तदा प्रीता वैदेहीं च यशस्विनीं ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणं ॥

गादिज्ञानं निहतस्पर्शमिति भावः दिव्यज्ञानोपपन्नाः आदिगर्भवतारो रामो रावणवधादीनूत्कः
निष्पत्तीत्येवं ज्ञानयुक्ताः १० ते रामं सीतां च लक्ष्मणं च दृष्ट्वा प्रीताः अभिजग्मुः आभिमुख्ये
न जग्मुः उद्यन्तं सोममिव तद्दर्शनं सोमो ब्राह्मणानां राजेति श्रुतेः स्वकुलरक्षकं सो
मराजमिव स्वरक्षकं धर्मचारिणं ११ ॥

श्री रा॰ आ॰ २ 169 रामं दृष्ट्वा लक्ष्मणं यशस्विनीपाति ब्रह्म यशस्विनी रक्षः कुलसंहारजयशस्विनी च सीतां दृष्ट्वा
श्रुत रावाग्रेलक्षणाः प्रार्थितो पपद्यते मंगलानि आशीर्वादान् प्रत्यगृह्णन् स्वरक्षके हृदेवता बुद्ध्याः
प्रतिगृहीतवंतः ॥ रूपसंहननं अंगान्यभूषितान्येव प्रेक्षणीयैर्विभूषणैः येन भूषितवत्प्रभा
तितद्रूपमिति कथ्यत इति लक्षिते रूपं तद्युक्तसंहननं आपादकेशं सश्लिष्टसंधिबंधः अंग
प्रत्यंगकानां वसन्निवेशो यथोचितसंश्लिष्टसंधिबंधो यस्तन्नो दार्ढ्यमिदं उच्यते इत्युक्तलक्षणं सौ

लक्ष्मणं चैव दृष्ट्वा तं वैदेहीं च यशस्विनीं मंगलानि प्रयुंजानाः प्रत्यगृह्णन् दृढव्रताः १२
रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषतां ददृशुर्विस्मिताकारा रामस्य वनवासिनः १३ ॥

दर्पलक्ष्मीकांतिलावण्यं मुक्ताफलेषु छायायास्तरलत्वमिवांतरा प्रतिभाति यदंगेषु लाव
ण्यं तन्निगद्यते सौकुमार्यं परचित्तग्राहिता लक्षणमार्दवं वा विस्मितानामद्भुतवस्तुदर्श
नवतां यकाकाशासरवप्रसाद विस्फारितेक्षणादिरूपस्तथाविधाकारा विस्मितचित्ता इ २
तियावत् वनवासिन इति रामविशेषणं तादृशस्यापीदृशं रूपादीत्याश्चर्यं १३ ॥

169A

तदेवाह वैदेह्यामिति अनिमिषैर्निमेषरहितैः आश्चर्यभूतान् नृपादिभिर्विस्मयप्रापकान्
सर्वे ते वनवासिनः ऋषयो मृगादयश्च तद्दर्शनानंदविच्छेदभयेन च निमेषराहित्य १४ अत्राश्र
ममंडले आतिथ्यं न्यायतः पूजार्हं पर्णशालायां प्रातिष्ठिका १५ रामस्य सत्कृत्य तिकर्म

वैदेह्या लक्ष्मणेन रामं नेत्रैरनिमिषैरिव आश्चर्यभूतान् ददृशुः सर्वे ते वनवासिनः १४
अत्रैनं हि महाभागाः सर्वभूतहिते रताः अतिथिं पर्णशालायां राघवं संन्यवेशयन्
१५ ततो रामस्य सत्कृत्य विधिना पावकोपमाः आजह्रुस्ते महाभागाः सलिलं
धर्मचारिणः १६ मंगलानि प्रयुंजाना मुदा परमया युताः मूलं पुष्पं फलं स
र्वमाश्रमं च महात्मनाः १७ निवेदयित्वा धर्मज्ञास्ते तु प्रांजलयोब्रुवन् धर्मपालो
जनस्यास्य शरण्यश्च महायशाः १८ ॥

णः शेषत्व विवक्षायां षष्ठी भवद्दर्शनादिभिर्धन्यं धन्याश्च इत्यादि प्रियवचनैः सत्कृत्य सलिलं सलि
लादि पूजाद्रव्यं आजह्रुः रामस्य पूजार्थमिति शेषः १६ आश्रमं च स्ववासस्थानभूतं प्रांजलयः
निजकुलदेवतात्वज्ञानात् अन्यथा दृष्टत्रियेव्याख्यातांजलिकरणस्यानौचित्यात् १७ १८

रा॰स्था॰
२
170

प्रजनीयो देवताबुध्याः पालकत्वेन गुरुत्वाद्वा मान्यो राजबुध्या सत्कारार्हः तदेवाह राजेत्या
दि दंडधरो दुष्टनिग्रहकर्ता सर्वलोकप्रसिद्धं प्रजादंडेन मादृंशस्यापि शेषयागशन्यस्य चत्वा
भागः चतुर्थो भागः य इहं सपरमात्मनो विसंशश्चतुर्थो शः एवकारेण यस्यकस्यापि देवता
सामान्यस्येति सूचितं १६ नमस्कृतो लोकैरिति शेषः एवं राजमात्रस्यापि वं विधत्वे सा
ताद्भगवतस्तवैवं विधत्वमिति किमु वक्तव्यमिति ध्वनितेवयम् ऋषयः रत्यत्वे देवभवद्विष

प्रजनीयस्य मान्यस्य राज्ञा दंडधरो गुरुः इंद्रस्यैव चतुर्भागः प्रजा रक्षति राघव १६ रा=
जा तस्माद्वरान्भोगानरम्यान्भुंक्ते नमस्कृतः ते वयं भवता रक्ष्या भवद्विषयवासिनः =
१७ नगरस्था वनस्था वा त्वं नो राजा जनेश्वरः न्यस्तदंडा वयं राजन्जितक्रोधा जितेंद्रियाः ॥

यवासिन इति विषयो देशः सार्वभौमत्वाहेतुकारणमपि तद्देशस्यैवेति भावः विश्ववता
त्वात्सर्वो देशस्तवैवेति गूढोभिप्रायः १८ ननु वनस्थेन बलहीनेन मया कथं भवतां र
क्ष्यास्तत्राह नगरस्थ इति नगरमयोध्या तेनेराजाः रक्षकः राजा जनेश्वर इत्याभ्या
मिहामुत्र च त्वमेव रक्षकः सर्वशक्ति संपन्नस्य नगरे वनेवासाभ्यामपचयापचय प्रयोरा २
भावादिति ध्वनितं ननु महाप्रभावाणां कुतो रक्षकांतरापेक्षेत्यत आहुः न्यस्तेति न्य
स्तदंडा निग्रहाः तत्र हेतुः जितक्रोधाः तपो नाशभयात् १९ ॥ राम

170A

अतीरवितत्वाग्गर्भभूताः यथा मातुर्गर्भे प्राप्तो जीवो मात्रा रक्ष्यते तद्वद्रक्षिता इत्यर्थः अन्यैः नीवारादिभिः
विविधाहारैः स लक्ष्मणाग्रेसनेन लक्ष्मणस्यापि आहारभक्तागास्येष्टमतः २२ अन्ये सिद्धाः संकल्पसि
द्धासायोधर्मस्तदनुरुद्धहतचरितं ये घातं यथा न्यायं इष्वराहपदाद्योपस्थापनेनेश्वरं तर्पयामासुः २२

रत्नाणीयास्त्वयास्यकूर्मभूतास्तपोधना एवमुक्ताफलैर्मूलैः पुष्पैरन्यैस्तथा च वै २२ व
न्यैर्विविधाहारैः सलक्ष्मणमभ्यजयन् तथान्ये तापसाः सिद्धा रामं वैश्वानरोपमाः २२
न्यायवृत्ता यथा न्यायं तर्पयामासुरीश्वरं २४ इत्यार्षे रामायणे आरण्यकाण्डे प्रथमः स
र्गः १ कृतातिथ्योथ रामस्तु सूर्यस्योदयनं प्रति आमंत्र्य स मुनीन् सर्वान् वनमेवान्वगा
हत १ नानामृगगणाकीर्णं ऋक्षशार्दूलसेवितं ध्वस्तवृक्षलतागुल्मं दुर्दर्शस
लिलाशयं २ निष्कूजनानाशकुनि झिल्लिकागणनादितं लक्ष्मणानुचरो रामो
वनमध्यं ददर्श ह ३ सीतया सह काकुत्स्थस्तस्मिन् घोरमृगायुते ददर्श गिरिशृं
गाभं पुरुषादं महास्वनं ४ ॥

इत्यार्षे रामाभिरामे श्रीरामीये रामायणतिलके आरण्यकाण्डे प्रथमः सर्गः १ उदयनं
प्रति उदयकाले अन्वगाहत प्राविशत् १ ध्वस्तवृक्षलतागुल्मं विराधसंचारवशात् इति
शेषः दुर्दर्शसलिलाशयं उक्तहेतुवशादेव निष्कूजानानाशकुनयो यत्र तत् विराधभ
यादेवं झिल्लिकागणमात्रशब्दयुतं वनमध्यं ददर्शेति संबंधः ३ घोरमृगास्तैरावृते युतः पुरु

॥ ४ रामायणं

गंभीरास्यं महाकायं पवरगाधवक्तुषं विकटं विशालं बीभसं कुत्सितं विषमं निम्नोन्नतसंस्थानं।
रा॰ आ॰ विकृतं दंष्ट्रमाणाय नैर्विपरीतं वपुः अतएव घोरदर्शनं ५ वसा मांसांतर्गतस्नेहः आदित्या।
४ स्य व्याजास्यमित्यर्थः ६ एष्टताविद्युत्का नगाः ७ भक्षणार्थं सिंहादीन् आयसे शूले वस
171

गंभीरास्यं महावक्त्रं विकटं विकटोदरं। बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनं ५ वसा
न् चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितं। त्रासनं सर्वभूतानां व्यादितास्यमिवांतकं ६ ग्रसन्
सिंहांश्च तरक्षून्व्याघ्रान् द्वीपिनोऽष्टौ तान्दश। सविषाणं वसादिग्धं गजस्य च शिरो महत्
त् ७ अवसज्यायसे शूले विनदंतं महास्वनं। सरामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथि
लीं ८ अभ्यधावत्ससंक्रुद्धः प्रजाः काल इवांतकः। स कृत्वा भैरवं नादं चालयन्निव।
मेदिनीं ९ अंकेनादाय वैदेहीमपक्रम्य तदाब्रवीत्। युवां जटाचीरधरौ सभार्यौ क्षी
णजीवितौ १० प्रविष्टौ दंडकारण्यं शरचापासिधारिणौ। कथं तापसयोर्वां
च वासः प्रमदया सह ११ ॥

न्यमहास्वनं यथा तथा विनदंतं ८ काले युगांतकाले क्रुद्धोंतकः प्रजा अभिउद्दिश्य यथा।
धावति तथा अभ्यधावत् ९ अंकेन कटिप्रदेशेन सभार्यौ शाहौ यो छिन्मा ज्ञवावी एक।
यो यो पतामस द्वितीय ब्रह्मविराधस्पदं निंदोलितरूपमेव वाक्यं १० तदेवाह कथमिति प्र ४
मदया एकया सह द्वयोर्वासः कथं चेत्यन्वयः ११

171A

अतएवाह अधर्मचारिणौमुनिदूषकौ मतिवेषविरुद्धत्वाच्चापासिधारणात् एकभार्यारक्तत्वाच्च
अतएवपापौतयोभीत्युत्पादनायविराधःस्वयमेवस्वस्वरूपमाह अहमस्मीति १२ गृहे पुत्रे १४ स
गर्वितभावैर्निष्ठामगर्वमितियावत् उद्वेगात्भयात् १५ परिशुष्यता शोकसंकुचितेन मुखेनो

अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ अहं वनमिदं दुर्गं विराधो नाम राक्षसः १२ चरा
मि सायुधो नित्यमृषिमांसानि भक्षयन् इयं नारी वरारोहा मम भार्या भविष्यति १३ यु
वयोः पापयोश्चाहं पास्यामि रुधिरं मृधे तस्यैवं ब्रुवतो दुष्टं विराधस्य दुरात्मनः १४ श्रु
त्वा सगर्वितं वाक्यं संभ्रांता जनकात्मजा सीता प्रवेपितोद्वेगात्प्रवाते कदली यथा १
५ तां दृष्ट्वा राघवः सीतां विराधांकगतां शुभां अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्य=
ता १६ पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवां मम भार्यां शुभाचारां विराधांके प्रवे=
शितां १७ अत्यंतसुखसंवृद्धां राजपुत्रीं यशस्विनीं यदभिप्रेतमस्मासु प्रियं वरवृतं
च यत् कैकेय्यास्तु सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण या न तुष्यति राज्येन पुत्रार्थी दीर्घदर्शिनि

पल्लवितइव १६. प्रवेशितां विराधेनेतिशेषः १७ अस्मासु विषयेयदुःखं कैकेय्या वनेसंपाद
नीयत्वेनाभिप्रेतं यत्च प्रियं वरवृतं च तत् क्षिप्रमद्यैव सम्वृत्तं सिद्धं १८ यापुत्रार्थं पुत्रप्रयोज
ननिमित्तराज्येनराज्याभिषेकमात्रेणनतुष्यति दीर्घदर्शिनी अस्मनाशेनस्वपुत्रस्य वि
रराज्यंपश्यती १९ ॥

रा०अ्यो०
५
172

यथादीर्घदर्शिन्यासर्वभूतहितो ह्ययं वनमपि प्रस्थापितः पितृराज्यदार्थायथामेमध्यमामाता।
कौशल्यातः कनिष्ठत्वात्सुमित्रातो ज्येष्ठत्वात्सा यदिवसे इदानीमस्मिन्काले सकामा जाता कौ
शल्यापेक्षया कनिष्ठत्वात् त्वं यवीयसी त्वक्तिः पितासंगतातीर्थस्त्वकौशल्यासुमित्राभ्यां का।
नीयसी इतरद्वयापेक्षया पत्नीभ्यां ज्येष्ठत्वात् ह भगवतो पीह यो क्तिस्तु लक्ष्मणोत्साहवर्धनायेति
बोध्यं २० तदर्थमेव पुनरुपाद्दत्ये पितुर्मरणात्स्वराज्यहरणादधिकं दुःखजनकं वैदेह्याप
रस्पर्शः इतोऽधिकं दुःखजनकं तन मे किंचित् इति दुःखातिशयो व्यंग्यः २१ वाष्पशो

यथाहं सर्वभूतानां प्रियाः प्रस्थापितो वनं अप्येदानीं सकामा सा या माता मध्यमा मम
२० परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे पितृविनाशात्सौमित्रे स्वराज्यहरणात्तथा।
२१ इति ब्रुवति काकुत्स्थे बाष्पशोकपरिप्लुतः अब्रवील्लक्ष्मणः क्रुद्धो रुद्धो नाग इव श्वस
न् अनाथ इव भूतानां नाथस्त्वं वासवोपमः मया प्रेष्येण काकुत्स्थ किमर्थं परित।

काभ्यां नेत्राभ्यां चलितगताभ्यां परिप्लुतो व्याप्तस्तथा क्रुद्धः कैकेयीं प्रति विराधं प्रति च रुद्धो नाग
इव श्वासादिताडितेन मंत्रेण रुद्धः पेटीरुद्धो वा सर्प इव श्वसन् रामविषादर्शनेन २२
अनाथ इव नाथापेतः प्राणी नाथरहितः सन् यथा शोचति तद्वत् कीदृशः त्वं भूतानां स
र्वजीवानां नाथः स्वामी ताते न न तस्य नाथ निरपेक्षत्वं निततदुपपादकेमव वासवोपमेत्वं।
पि मया प्रेष्येण युक्त इति शेषः २३ ॥

५

172A

किंत्वयाशक्यं तत्राह स्वयारणेति २४ विरोधे मोक्ष्यामि भरते न राज्यकामनायाः प्रदर्शितत्वात्तमुपे
त्य २५ भुजबलवेगेनधनुःकर्षणवेगेन वेगितः आहितवेगः महीपतेर्विराध इति शेषः वि
घूर्णितसंजातभ्रमणः २६ इत्यारण्यरामाभिरामे श्रीरामीये रामायणतिलके द्वितीयः सर्गः २
अथ तिवनं सरयत्रित्यस्य शाहेनेति शेषः पुत्रयोः स्वरूपं पृष्ठेतमसापृच्छत लोकमध्यमः द्विवचनं प्र

योगेण निहतस्याथ मयाक्रुद्धेन राक्षसः विराधस्य गतासोर्हि मही यास्यति शोणितं
२४ राज्यकामे मम क्रोधो भरते यावभूद्दृ न विधेन विमोक्ष्यामि वज्री वृत्रमिवाहवे
२५ मम भुजबलवेगवेगितः पततु शरोऽस्य महान्महोरसि व्यपनयतु तनोश्च जीवितं
पततु ततश्च मही विघूर्णितः २६ इत्यार्षे रामायणे आरण्यकाण्डे द्वितीयः सर्गः २ अ
थोवाच पुनर्वाक्यं विराधः पूरयन्वनं पृष्टतो मम मा ब्रूत को युवां क्व गमिष्यथः १ तमु
वाच ततो रामो राक्षसं ज्वलिताननं पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः २ क्ष
त्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दंडकान् ३
तमुवाच विराधस्तु रामं सत्यपराक्रमः हंत वक्ष्यामि ते राजन्निबोध मम राघव ४ ॥

अथ प्रकारः कावित्यादि १ ज्वलिताननं राक्षसं ज्वालाकुलवक्त्रिः स्थिताग्निज्वालया आत्मनः इक्ष्वा
कुसंबंधिकुलमवाचेत्यर्थः २ क्षत्रियौ इक्ष्वाकुवंशजाविति शेषः वनगोचरौ वद्धश्रीहिः
कृतश्चिद्धेतोरिति शेषः ३ निबोधमवचनात्ममस्वरूपमिति शेषः ४ ॥ राम

रा॰ सं॰
६
173

जवस्य जवनाम्नः ५ लोके प्राणिलोके शस्त्रेण शस्त्रसामान्येन किंच छेद्याभेद्यत्वं प्राणवियो
जनाय छेदभेदाशक्यगात्रत्वं च प्राप्तमित्यर्थः ६ यद्येवमत उत्सृज्येत्यादि अनपेतौ प्रमदाशयाच्च
हाशायाच रहितौ वां युवयोः ७ हीनार्थं परदारस्पर्शलक्षणहीनकर्मकरं अत एव त्वां धिक्क्षुद्र

पुत्रः किल जवस्याहं माता मम शतह्रदा विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ५ त
पसा वाभिसंप्राप्ता ब्रह्मणो हि प्रसादतः शस्त्रेणावध्यता लोके छेद्याभेद्यत्वमेव च ६ उत्स
ज्य प्रमदामेनामनपेतौ यथागतं त्वरमाणौ पलायेथां न वां जीवितमाददे ७ तं रामः प्रत्युवा
च ह कोपसंरक्तलोचनः राक्षसं विकृताकारं विराधं पापचेतसं ८ क्षुद्र धिक्त्वां तु हीना
र्थं मृत्युमन्वेषसे ध्रुवं रणे प्राप्स्यसि संतिष्ठ न मे जीवन्विमोक्ष्यसे ९ ततः सज्यं धनुः कृ
त्वा रामः सुनिशिताञ्छरान् सुशीघ्रमभिसंधाय राक्षसं निजघान ह १० धनुषा ज्यागु
णवता सप्त बाणान्मुमोच ह रुक्मपुङ्खान्महावेगान्सुपर्णानिलतुल्यगान् ११ ते श
रीरं विराधस्य भित्त्वा बर्हिणवाससः निपेतुः शोणितादिग्धा धरण्यां पावकोपमाः १२

मन्वेषसे ध्रुवं उक्तदुष्कर्मकरणादिति शेषः तं च मृत्युं रणे सम्यक् प्राप्स्यसि तिष्ठ क्षणमिति
शेषः ९ अभिसंधाय धनुषीति शेषः १० ज्यागुणवता ज्यारूपगुणमता ज्याघोषवतेति वा
सुपर्णानिलाभ्यां तुल्यं गच्छन्तीति तान् ११ बर्हिणवाससः बर्हिणो मयूरस्तत्सवर्णं चित्रवद्वा ६
ससइत्यर्थः शोणितादिग्धाः रक्तलिप्ताः १२ ॥

173A

सविद्धोपि रामबाणेन ताडितोपि वरदानमाहात्म्यादगतासुर्यामात्रेण वैदेहीं हित्वा शूलमुद्य
म्याभ्यद्रवत् १३ महानादं विनद्य कृत्वा शक्रध्वजोपमं देहं येन शैला न च व्यात्ताननो विहतानेनः १४
कालांतकयमाः प्राणांतकृन्मनः संहारहेतुत्रयम् तं यस्तत्सदृशं १५ मदस्य ... वध्यमपि वृथै
वाबाणपातं हृतिदासः तेबाणाः रामलक्ष्मणौ विसृष्टः जृम्भमाणेन शरीरलग्नाः अपिकायानि

सविद्धोन्यस्य वैदेहीं शूलमुद्यम्य राक्षसः अभ्यद्रवत्ससंक्रुद्धस्तदा रामसलक्ष्मणौ १३
सविनद्य महानादं शूलं शक्रध्वजोपमं प्रगृह्याशोभत तदा व्यात्ताननइवांतकः १४
अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः विराधे राक्षसे तस्मिन्कालांतकयमोपमे १५
स्मयमानं वरदानेन प्राणान्संरोध्य राक्षसः जृम्भमाणस्य ते बाणाः कायान्निष्पेतुरा
शुगाः १६ स प्रसह्य महारौद्रः स्थित्वाजृंभत राक्षसः विराधः शूलमुद्यम्य राघवा
वभ्यधावत १७ तच्छूलं वज्रसंकाशं गगने ज्वलनोपमं द्वाभ्यां शराभ्यां चिच्छेद रा
मः शस्त्रभृतां वरः १८ तद्रामविशिखैश्छिन्नं शूलं तस्यापतद्भुवि पपाताशनिना
छिन्नं मेरोरिव शिलातलं १९

जृंभमाणः आशुगाः शीघ्रगाः इत्यर्थे केवलयौगिकं १६ स्मयमानं वरदानेन वरदासंबंधादि
त्यर्थः संरोध्य धृत्वा परमदुःखं प्राप्तोपीति शेषः १७ तच्छूलं कस्यमूलभागमेवेति शेषः
गगने ज्वलनोपमं शिखाभागावच्छेदेनेति भावः १८ अशनिर्वज्रं १९ ॥

आ॰
रा॰ स्क
७
174

तदा आपतनकाल एव प्रहरतां गाढहरतामित्यर्थः २० भुजाभ्यां परिगृह्य एकैकेनैकैकं २१ तस्याभिप्रा
यं ज्ञात्वा नीतं नेयं न विषय २२ यथेच्छति तथा वहतु यथा सुखं भवति तथा वहतु अनेन निर्भयत्वं दर्शितं
तद्वहनमाह अयमेवेति २३ स्कंधगतौ चकार स्कंधावारोपयामास २४ शिवायितं शिवाभिर्युतं २६

तौ खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पाविवोद्यतौ तूर्णमापततस्तस्य तदा प्रहरतां बलात् २० स वध्यमा
नः सुभृशं भुजाभ्यां परिगृह्य तौ अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत २१ तस्याभिप्रायमा
ज्ञाय रामो लक्ष्मणमब्रवीत् वहत्वयमलं तावत्पथानेन तु राक्षसः २२ यथा चेच्छति सौमि
त्रे तथा वहतु राक्षसः अयमेव हि नः पन्था येन याति निशाचरः २३ स तु स्वबलवीर्येण
समुत्क्षिप्य निशाचरः बालाविव स्कंधगतौ चकारातिबलोद्धतः २४ तावारोप्य ततः
स्कंधं राघवौ रजनीचरः विराधो विनदन् घोरं जगामाभिमुखो वनं २५ वनं महामेघ
निभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतं नानाविधैः पक्षिकुलैर्विचित्रं शिवायुतं व्यालमृ
गैर्विकीर्णं २६ इत्यार्षे रा॰ आर॰ तृतीयः सर्गः ३ ह्रियमाणौ तु काकुत्स्थौ दृष्ट्वा सीता
रघूत्तमौ उच्चैः स्वरेण चुक्रोश प्रगृह्य सुमहाभुजौ १ एष दाशरथी रामः सत्यवान्
शीलवान् शुचिः रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः २ मां हि का भक्षयिष्यंति
शार्दूलद्वीपिनस्तथा मां हरोत्सृज काकुत्स्थौ नमस्ते राक्षसोत्तम ३

इति रा॰ आरण्ये तृतीयस
र्गः ३ सुमहान्तौ सुभुजौ प्रगृह्य उद्यम्य १ क्रोशनप्रकारमाह एष इति २ शार्दूलद्वीपिनः ७
सविंद विंदव्याघ्राः मां हरतेन मनक्ति: रामलक्ष्मणयोः प्रेमातिशयात् ३ ॥

174A

वेगात्वरा ४ बाहुं बभंज नैतावपि शाणहानि विनितिन वरदान विरोधः अभेद्याङ्गे यतं च प्राण
नाशात्तमावयव विशेष परं वोध्यं. बभंज मुष्टिप्रहारेणेति शेषः अभेद्याङ्गे घन वरस्य श
स्त्रकरणकतद्विषयत्वमन्ये ५ संविग्नः खिन्नः ६ सूदयंतौ हिंसंतौ ७ नमस्कारवशा

तस्माल्लघु चरं न्यस्त्वा वैदेह्या रामलक्ष्मणौ वेगात्प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ४
तस्य रौद्रस्य सौमित्रिः सव्यं बाहुं बभंज ह रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः
५ स भग्नबाहुः संविग्नः पपाताशु विमूर्छितः धरण्यां मेघसंकाशो वज्रभिन्न इवाचलः
६ मुष्टिभिर्बाहुभिः पद्भिः सूदयंतौ नरोत्तमौ उद्यम्योद्यम्य चाप्येनं स्थंडिले निष्पिपेष
तु ७ स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः निष्पिष्टो बहुधा भूमौ न ममार
स राक्षसः ८ तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमं भयेष्वभयदः श्रीमानिदं
वचनमब्रवीत् ९ तपसा पुरुषव्याघ्र राक्षसोऽयं न शक्यते शस्त्रेण युधि निर्जे
तुं राक्षसं निखनावहे १० कुंजरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण वनेऽस्मिन्सु
महच्छ्वभ्रं खन्यतां रौद्रवर्चसः ११ ॥

नवलादिति भावः ८ भयेषु भयकालेषु अभयदः स्वशरणादि श्रवणस्मरणकीर्तनादिना
९ निखनावहे भूमौ गर्ते पातयामहे १० ११

प्रदरो गर्तः कंठे आक्रम्य गायमिव १२ प्रश्रितं शापांतकालप्राप्तेः प्रश्रययुक्तमितिः १३ प्रदर
रा॰ आ॰ करणरूपप्राणांतव्यापारात् पूर्वं रामस्त्वमिति न ज्ञातः १४ इदानीं कथं ते ज्ञानं तत्राह कौ
८ सल्येत्यादि त्वया कौसल्या सुप्रजाः इति त्वं विदितः कौसल्यापुत्र इति ज्ञातोऽसीत्यर्थः एवं च कौ
175 शल्यायामोऽस्वरावतीर्णः वैदेही च लक्ष्मीः लक्ष्मणश्चानंतांश इति सूचितं १५ एवं ज्ञाने का

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति तस्थौ विराधमाक्रम्य कंठे पादेन वीर्यवान्
१२ तच्छ्रुत्वा राघवेणोक्तं रात्रमः प्रश्रितं वचः इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्ष
भं १३ हतोऽहं पुरुषव्याघ्र शक्रतुल्यबलेन वै मया तु पूर्वं त्वं मोहान्न ज्ञातः पुरुषर्ष
भ १४ कौसल्या सुप्रजास्तात रामस्त्वं विदितो मया वैदेही च महाभागा लक्ष्मणश्च
महायशाः १५ अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुं तुंबरुर्नाम गंधर्वः शप्तो
वैश्रवणेन हि १६ प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः यदा दाशरथी
रामस्त्वां वधिष्यति संयुगे १७ तदा प्रकृतिमापन्नो भवान्स्वर्गं गमिष्यति अनुप
स्थीयमानो मां स क्रुद्धो व्याजहार ह १८

रणमाह अभिशापादिति तुंबरुरहं वैश्रवणेन शप्त
सः तस्माच्छापाद्राक्षसीं तनुं प्रविष्टो ततो मे ज्ञानं नास्ति राक्षसोऽस्मीत्यर्थः १६ प्रकृतिं गांधर्वीं प्रकृतिं ८
क्रोधकारणमाह अनुपस्थीयमानः अवसरेषु सेव्यमानः व्याजहारेत्यस्मात् राक्षसीं तनुं प्रवि

175A

अनुपपत्त्यानेकारणमाह इतीति उक्तं शापं तत्प्रतीकारं चोवाचेत्यर्थः शापमुक्तिकालज्ञानुज्ञानं
दर्पादेवदर्पात्पुनरुक्तिर्नदोषायाभासमंत्रं प्रग्रानयेतिपाठे पुनरुक्त्यभावश्च १९ स भवनं स्वलोकं
भवनमिति पाठान्तरं २० अध्यर्धयोजने सार्धयोजने २१ गतसत्त्वानां गतप्राणानां सनातनः पर
पराप्राप्तः अत एव कलिरात्तसेष्वपवनेषु तदाश्रमे प्रवृत्ति २२ उक्तमेव विवृणोति अवटे इति न्य

इति वै श्रवणाद्राज्ञा संभाषमाणमेवाच ह तव प्रसादान्मुक्तोऽहमभिशापात्सुदारुणात् १९
भवनं स्वर्गमिच्छामि स्वस्ति वोऽस्तु परंतप इतो वसति धर्मात्मा शरभंगः प्रतापवान् २० अ
ध्यर्धयोजने तात महर्षिः सूर्यसन्निभः तं दिव्यमभिगच्छ त्वं स ते श्रेयो विधास्यति २१ अ
वटे चापि मां राम निक्षिप्य कुशली व्रज रक्षसां गतसत्त्वानामेष धर्मः सनातनः २२
अवटे ये निधीयन्ते तेषां लोकाः सनातनाः एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः
बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह २४
कुंजरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण वनेऽस्मिन् सुमहच्छ्वभ्रं खन्यतां रौद्रकर्मणः २५

न्यस्तदेहः वटनिक्षिप्तदेहः स्वर्गसंप्राप्तः संप्राप्तस्वर्ग इत्यर्थः बभूव तथा भवितुमुद्यतो बभूवेत्य
र्थः २३ यद्वा बभूवेत्यत्र इत्यत्र मंत्रिमतयोक्तस्य विरुद्धस्मात् तच्छ्रुत्वेति अवटनिक्षेपेण स्वर्ग
प्राप्तिं श्रुत्वा २४ कुंजरस्येव मत्तकुंजरस्येव निखननार्थमिवेत्यर्थः खन्यतामिति क्षिप्रमिति
शेषः ममाः तर्कितस्येतन्मरणोपायस्यानेनापि कथनात् चिंतनेन शीघ्रपाकार्थेत्याशयः

श्री पादेन कंठेऽभ्याक्रम्य तस्यौ रक्षस्तदा हरेः परिलुंठनव्याहृतत्वं २६ विराधस्य महात्मनः महात्मनो महाश
रा.अ रीरस्याग्रे एवं तु प्रत्यापत्तस्याभिप्रायेण रामस्य रूपत्वानाभिप्रायेण वक्तव्यो महात्मनः इति प्रयुक्तं वा २७
५ मत्तकंठेस्य भुज्यते पाणाय्यं रामेण मत्तकुं दाक्रमणं कुर्वन्तः क्षिनत्क्षणाउत्क्षिप्य चालयित्वा महा
176 स्वनं तां देव भैरवस्वनं यथा तथा धर्म्योऽहमिति धर्म्योऽहमिति नर्दंतं स्वभ्रे प्राक्षिपत् २८ आत्मार्थे

अस्तु कालत्मणेन रामप्रदरः खनतामिति तस्थौ विराधमाक्रम्य कंठे पादेन वीर्यवान् २६
ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम् अखनत्पार्श्वतस्तस्य विराधस्य महात्मनः २७
तं मुक्तकंठमुत्क्षिप्य शंकुकर्णं महास्वनं विराधं प्राक्षिपच्छ्वभ्रे नदंतं भैरवस्वनं तमा
हवे दारुणमाशु विक्रमौ स्थिरावुभौ संयति रामलक्ष्मणौ मुदान्वितौ चिक्षिपतुर्भया
वहं नदंतमुत्क्षिप्य बलेन राक्षसं २८ अवध्यतां प्रेक्ष्य महासुरस्य तौ शितेन शस्त्रे
णा तदा नरर्षभौ समर्थ्य वात्यर्थविशारदावुभौ बिले विराधस्य वधं प्रचक्रतुः ३०॥

क्रमौ क्षिप्रकारिणौ संयति स्थिरौ दृढचित्तौ आहवे निर्जितं बलेन उत्क्षिप्य संचाल्य गर्ते चि ५
क्षिपतुः २९ अवध्यतां शस्त्रेण अवध्यतां प्रेक्ष्य असत्तामिति पाठे अवध्यतामित्येवार्थः प्रेक्ष्य वि
चार्य समर्थ्य बिले संपाद्य तत्र बिले वधं प्रचक्रतुः मृत्स्नापूरणेन निशेषः ३० रामायनमः

ॐ
176A

उक्तमेवार्थमुपसंहरति स्वयमिति यथार्थं स्वप्रयोजनेनोचितं रामेण कर्तृप्रसन्नस्य स्वयं स्वस्य यो मृत्युरी
प्सितस्तत्पात्मनो मृत्युं प्रसह्य उद्दिश्य प्रपद्येति पाठे प्राप्यमेवार्थः काननेचारिणा विराधेन मे वधः शास्त्र
कृतो न भवेदिति निवेदितो भद्रराम इति शेषः २१ तदेव भाषितं विराधोक्तं शास्त्रेण मन मृत्युरित्येवं रूपं २२
प्रहृष्टरूपाविव रश्वभ्राख्यं वार्थे दिवि स्थितौ चंद्रदिवाकराविव महावने विजह्नतुः नीलम्बाह्विशालानां

स्वयं विराधेन हि मृत्युमात्मनः प्रसह्य रामेण यथार्थमीप्सितः । निवेदितः काननचारिणा स्व
यं न मे वधः शास्त्रकृतो भवेदिति २१ तदेव रामेण निशम्य भाषितं कृता मतिस्तस्य विलप्रवे
शने विलं च तेनातिबलेन रक्षसा प्रवेश्यमानेन वने विनादितं २२ प्रहृष्टरूपाविव रामल
क्ष्मणौ विराधमुर्व्यां प्रदरे निपात्य ते ननन्दतुर्वीतभयौ महावने दिवि स्थितौ चंद्रदिवाक
राविव २३ इत्यार्षे रामायणे आरण्यकाण्डे चतुर्थोऽध्यायः ४ हत्वा तु तं भीमबलं विराधं रा
क्षसं वने । ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान् १ अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्तते
जसं कष्टं वनमिदं दुर्गं न च स्मो वनगोचराः २ ॥

च वनस्याकाशसादृश्यं उभावपि चंद्रवत्कलासं
पन्नौ सूर्यवत्प्रतापयुतौ २३ इत्यारण्ये रामाभिरामे श्रीरामीये रामायणतिलके चतुर्थः सर्गः ४
समाश्वास्य समाश्वास्यैव विराधाद्भीतामिति शेषः १ इदं वनं कष्टं पीडाजनकं दुर्गं विषमं क्र
मणायोग्यं च वयं च ततः स्वैः कदापि वनगोचरा न स्मः कदापीदृशे वने न दृष्टं यस्मात् २ ॥ राम

रा०आ०
१०
177

अतः शीघ्रं शरभंगं गच्छाम देशं गच्छाम इत्यर्थः इत्युक्तेति शेषः २ भावितः शुद्ध आत्मा यस्य तस्य
समीपे महदद्भुतं ददर्श ४ तदेवाह विभ्राजमानमिति वपुषा वपुःकान्त्या विबुधानुगं देवानुचरं
बहुव्रीहिः ५ वसुधामसंस्पृशंतं रथादवरूढमपीति शेषः विबुधेश्वरं शक्रं अतिशायप्रभाव

अभिगच्छाम देशं शीघ्रं शरभंगं तपोधनं आश्रमं शरभंगस्य राघवोभिजगाम ह ३ तस्य देवप्र
भावस्य तपसा भावितात्मनः समीपे शरभंगस्य ददर्श महदद्भुतं ४ तस्य देवप्रभावस्य वि
भ्राजमानं वपुषा सूर्यवैश्वानरप्रभं रथप्रवरमारूढमाकाशे विबुधानुगं ५ असंस्पृशं
तं वसुधां ददर्श विबुधेश्वरं सुप्रभाभरणं देवं विरजोंबरधारिणं ६ तद्विधैरेव बहुभिः पू
ज्यमानं महात्मभिः हरितैर्वाजिभिर्युक्तमंतरिक्षगतं रथं ७ ददर्शादूरतस्तस्य तरु
णादित्यसन्निभं पांडुराभ्रघनप्रख्यं चंद्रमंडलसन्निभं ८ अपश्यद्विमलं छत्रं चित्रमाल्यो
पशोभितं चामरव्यजने चाग्र्ये रुक्मदंडे महाधने ९ गृहीते वरनारीभ्यां धूयमाने च मू
र्धनि गंधर्वामरसिद्धाश्च बहवः परमर्षयः १० अंतरिक्षगतं देवं गीर्भिरग्र्याभिरीडिरे

हाभरणं विरजस्कं मंबरं धर्तुं शीलं यस्य तं ६ तद्विधैस्तद्विधाभरणादिमद्भिः हरितैः श्यामव
र्णैः तादृशं रथं च ददर्श ७ पांडुराभ्रस्येव घनाधिका प्रख्या कांतिर्यस्य तत् ८ चामरव्यजने १०
वालव्यजने रुक्मसुवर्णं महाधने रत्नादियुततयाधिकमूल्ये १० ॥ ॥

177A

उक्तो लक्ष्मणो वामदेवः शरभंगेन संभाषमाणेन तं शातक्रतुं दृष्ट्वा ज्ञात्वा रामोऽब्रवीत् उक्तस्यैव प्रपंचो रा
मोथेति उद्दिश्य पद्मस्तेन निर्दिश्य ११ दर्शयेत् अदर्शयतेत्यर्थः १२ पुरुवद्वयशातयाय नभिराहू
यते यागायेति पुरुहूतः नः अस्माभिः १४ शातं शातं अपहितिति शेषः शातशाहेनेनतवाची १५ विस्ती
र्णविपुलानि अग्रतिमायेन विशालानि उरांसि येषां ते आयतं दीर्घं शोणाम्बराणि शोणप्रभानिव

दृष्ट्वा शातक्रतं तत्र रामो लक्ष्मणमब्रवीत् रामोऽथ रथमुद्दिश्य भ्रातुर्दर्शयताद्भुतं १२ अर्चिष्मं
तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण पतपंतमिवादित्यमंतरिक्षगतं रथं १३ ये हयाः पुरुहूत
स्य पुरा शक्रस्य नः श्रुताः अंतरिक्षगता दिव्यास्त इमे वहरयो ध्रुवं १४ इमे च पुरुषव्याघ्रा ये
तिष्ठंत्यभितो दिशं शतं शतं कुंडलिनो युवानः खड्गपाणयः १५ विस्तीर्णविपुलोरस्काः
परिघायतबाहवः शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः १६ उरोदेशेषु सर्वेषां हा
रा ज्वलनसन्निभाः रूपं बिभ्रति सौमित्रे पंचविंशतिवार्षिकं १७ एतद्धि किल देवा
नां वयो भवति नित्यदा यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः १८ ॥

सनानि येषां शो
णांशुवसना इति पाठे पद्मरागसदृशवसना इत्यर्थः शोणांशुमित्येव प्राचीनः पाठ इति कतकः १६
ज्वलनसन्निभाः दीप्तिमात्रेण १७ एतद्धि पंचविंशतिवर्षप्रमाणकं नित्यदेवतानां यथा इमे देवा या
यादृशाः शुभदर्शनवयस्काः दृश्यन्ते एतदेवेषां नित्यदा वय इति सर्वेण संबंधः १८ ॥

रा॰ आ॰
११
178

यावज्जानामि ज्ञास्यामि तावत्तिष्ठेत्सन्नवयः कपष्ठरथ्येऽङ्कस्तेज्ञानुमितोपि प्रमाणान्तरे।णापि ज्ञातव्य इत्या
थः १९ उक्त्वानुवादरूपं व्यपभातरोपदेशान्तमेवमित्यादि इहैवस्थीयतामित्येवमुक्तेत्यर्थः २० अन्त
ज्ञाप्यगमनाय कृतानुमतिकः कृत्वा २१ यावदसौ मां नाभिभाषते तावन्मां निष्ठां स्थानान्तरं स्वर्गं वा न
यत मया सहृगच्छेत ततो वनचारिणा हेतोर्मा मामाप्य द्रष्टुमर्हतीति द्रष्टुं नार्हतीत्यर्थः अत्रैव निषेधा
र्थमव्ययं यच्च कृपयदं विपरीतावस्थितेनैव वैभवस्य दर्शनमनुचितमित्यर्थः २२ कृतार्थं निस्तीर्ण

इदं वचः सदा वैदेह्या मह्यं तेनिष्फलं त्वया। यावज्जानाम्यहं व्यक्तं कण्ठस्थं द्युतिमान् रथे १९ तमे
वमुक्त्वा सौमित्रिमिहैव स्थीयतामिति अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति २० त
तः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत् २१ इ
होपयात्यसौ रामो यावन्मां नाभिभाषते निष्ठां नयत तावत्ततो मा द्रष्टुमर्हति २२ जित
वन्तं कृतार्थं हि तदाहमचिरादिमं कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करं २३ ॥

विपदं जितवन्तं रावणमिति शेषः तदा वै भवयुक्तमिमं द्रक्ष्यामीति शेषः कनकस्येनेतपदं स्था
तिमं मित्यादितहर्षेवमञ्जनेत्या व्याख्यानेसर्वसामंजस्यात् रामो यावन्मां नाभिभाषते तावत्कर्म
णो रावणवधस्य निष्ठां समाप्तिं नयत ततो मां द्रष्टुमर्हतीति अन्यैः सुदुष्करमहत्कर्मानेन कर्त ॥
व्यमस्ति रावणवधरूपं मनस्तत्कारणेन कृतार्थं कृतवदेव प्रपोडानं रावणं जयिनं द्रष्टास्मिइ
तितीर्थ व्याख्यानेसं प्रत्यदर्शनेदेवस्तस्ववीक्त एवोपरितनो बोध्यः २३ ॥

178A

अथ वज्रीति देवैरागत्यापोतरं तं तापसं शरभंगमाश्रमं आगमनयित्वा संसृज्य च दिवं ययौ २४ सपरिच्छदः
सीताभ्रातृसहितः २५ पादौ संगृह्य रामः ईश्वरोपि ब्राह्मणाग्य एवं सज्यापाइत्सन्यानुशिक्षयितुमेवं चकारत
दनुज्ञाताः आसनावस्थानाः यत्कृतानुमतिकाः अतएव लब्धवासाः लब्धवासस्थानाः निमंत्रिताः
भोजनार्थं तताद्दृशाणि निषेदुः २६ शक्रोपयानं इन्द्रागमनप्रयोजनं २७ निवेदनप्रकारमाह मा

अथ वज्रीतमामंत्र्य मानयित्वा च तापसं रथेन हययुक्तेन ययौ स्विमरिंदमः २४ प्रया
ते तस्मिन् सहस्राक्षे राघवः सपरिच्छदः अग्निहोत्रमुपासीनं शरभंगमुपागमत् २५ तस्य
पादौ च संगृह्य रामः सीता च लक्ष्मणः निषेदुस्तदनुज्ञाता लब्धवासा निमंत्रिताः २६
ततः शक्रोपयानं तु पर्यपृच्छत्स राघवः शरभंगश्च तत्सर्वं राघवायन्यवेदयत् २७ मा
मेष वरदो राम ब्रह्मलोकं निनीषति जितमुग्रेण तपसा दुःप्रापमकृतात्मभिः २८
अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ब्रह्मलोकं न गच्छामि त्वामदृष्ट्वा प्रियातिथिं २९

मेष इति उग्रेण तपसा मया जितं ब्रह्मलोकं एष वरदः इन्द्रो ब्रह्मात्त्वया मां निनीषति यद्वा देवं
द्वेषधारी ब्रह्मेवायं अकृतात्मभिः अननुष्ठितभगवदुपासनैः २८ तर्हि किमिति वि
लंबितं तत्राह अहमिति ज्ञात्वा यो गवलक्षणा न गच्छामि योगसिध्या स्वेच्छया देहत्यागोत्
त्वा प्रियातिथिं अतिप्रियमतिथिं २९ ॥

श्री
रा॰ आ॰
२३
179

त्वया समागम्य त्वत्समागमस्य सफलदर्शिसंहतः एतावत्कालपर्यंतानुष्ठितानां तपसान्ततोधिकफ
लश्रुतिभावः त्रिदिवमवरं परं च परोवरलोकः २० समागमस्यैवाधिकफलदातृत्वमिति तथाकरो
ति मत्तपार्जितैर्लोकास्त्वयाहर्तव्या इति उभयत्रप्यार्षः ब्रह्मलोका नाकपृष्ठलोकाश्च जि
ताः मामकांस्तान् प्रतिगृह्णीष्व स्वकृतेनैतेनागोकृरुष्व अनेन सर्वकर्मणां भगवदर्पणमकरोदि
ति सूचितं कामतोऽकामतो वापि यत्करोमि शुभाशुभं तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहं
नाहं त्वेवकर्त्ता सर्वमेतद्ब्रह्मैव कुरुते तथा एतद्ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिरि

त्वयाहं पुरुषव्याघ्र धार्मिकेण महात्मना समागम्य गमिष्यामि त्रिदिवं चावरं परं २१ अ
क्षया नरशार्दूल जिता लोका मया शुभाः ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व मामका
न् २२ एवमुक्तो नरव्याघ्रः सर्वशास्त्रविशारदः ऋषिणा शरभंगेन राघवो वाक्यमब्रवी
त् २३ अहमेवाहरिष्यामि सर्वांल्लोकान्महामुने आवासं त्वहमिच्छामि प्रदिष्टमिह का
नने राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै शरभंगो महाप्राज्ञः पुनरेवाब्रवीद्वचः २४

तिकौमौक्तिः भगवदर्पितधर्माणामनंतफलत्वं गीतादिषु स्पष्टमेवमुक्तिपर्यवसायित्वात्
३। २२ अहमेवेति तपसैव स्वार्थः त्वद्दत्तप्रतिग्रहेणाहमधिकारी स्यामिति तोऽर्थः वास्तवस्त्वा
षः परमभक्तस्यानुग्रहाय तदर्पितधर्माणां कारमाह भगवानहमेवेति मयिन्यासत्वेन भ
वस्यार्पितानि मानवदर्जितान् सर्वांल्लोकानत्वमहमेवाहरिष्यामि प्रापयिष्यामि २ १२
त्वत्काशनरजनप्रतारण्ययाह आवासमिति प्रदिष्टमुपदिष्टं २३ २४ ॥

179A

इहारण्ये वसति इह देशे इति शेषः २५ प्रतिस्रोतां आवर्तनमार्गे मंदाकिनीतामिव पुष्पाण्येवोडुपानि तत्रामिकां
वा चित्रकूटस्थामेव प्रतिस्रोतसं कृत्वा इत्ज्ञ पूर्ववाहिन्यां पुरस्थेण पश्चिमाभिमुखवत्यागमने प्रति
स्रोतस्त्वं भवति पुष्पाण्येवोडुपानि उडुपं प्लवः पुष्पोत्सम्बद्धवहामिति वा २६ एष पंथा इति मार्गोपदेशः
अयमृषिर्भगवत्याश्रितस्रोतः स्वनाम्नाभीष्टं भगवते शार्थं पते मुहूर्तं तात पश्य मां अयं कृतार्थो भव
नित्यभिध्यानपूर्वकं कंकटात्तेणाति शेषः तातेति गुरुत्वज्ञानेन केनाप्यर्थे मपि गोत्राणि गात्रावयवा

इह राम महातेजाः सुतीक्ष्णो नाम धार्मिकः वसत्यरण्ये नियतः स ते श्रेयो विधास्यति २५
इमां मंदाकिनीं राम प्रतिस्रोतामनुव्रज नदीं पुष्पोडुपवहां ततस्तत्र गमिष्यसि २६ एष पं-
था नरव्याघ्र मुहूर्तं पश्य तात मां यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः २७ ततोग्निं
स समाधाय हुत्वा चाज्येन मंत्रवत् शरभंगो महातेजाः प्रविवेश हुताशनं २८ तस्य रो-
माणि केशांश्च तदा वह्निर्महात्मनः जीर्णां त्वचं तथास्थीनि यच्च मांसं सशोणितं २९
स च पावकसंकाशः कुमारः समपद्यत उत्थायाग्निचयात्तस्माच्छरभंगो व्यरोचत ३०

न २७ ततोग्निं स इति हुतः शौचक्रियालसः प्रत्याख्यातभिषक्क्रियाः आत्मानं घातयेद्यस्तु भृ-
ग्वग्न्यनशनाम्बुभिरित्युक्तेऽग्निप्रवेशोस्येष्टिमार्गेणाग्निं समाधाय मंत्रवत् तदुक्तं मंत्रैर्हुत्वाज्यमग्नि-
प्रवेशात्कमंत्रैरुपनिषदुक्तैः प्रविवेश २८ तस्येति तस्य शरभंगस्य रोमादीनि वह्निर्ददाहेति शेषः
२९ स गौरोदनार्थं दिव्यशरीरपरिग्रहमग्निप्रवेशपूर्वकं तोपासनस्य च फलभूत माहूस चेति ३०

आहिताग्निलोकाः कर्मणा पितृलोक इति कृताः चंद्रमण्डलिगाः ऋषिलोकाः विद्यया देवलोक
रा॰ आ॰ इति कृताः सूर्यलोकप्रवर्त्तिनः देवानामाज्ञानादेवानां ब्रह्मविसृष्टानां च लोकयानं ध्रुवः प्र
१२ दक्षिणं करोति ततो ब्रह्मलोकं तं यं आरोहतारूढवान् ४१ पितामहं ब्रह्मलोकादित्रयं समहिरूपा
180 ४२ इत्यारण्यरामायणतिलके पंचमः सर्गः ५ मुनिसंघाः दंडकारण्यवासिनः समागता मिलिताः

सलोकानामाहिताग्नीनां ऋषीणां च महात्मनां देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ४१
स पुण्यकर्मा भुवने द्विजर्षभः पितामहं सानुचरं ददर्श ह पितामहश्चापि समीक्ष्य तं
द्विजं ननन्द सुस्वागतमित्युवाच ४२ इत्यार्षे रामायणे आरण्यकाण्डे पंचमः सर्गः ५ श
रभंगे दिवं प्राप्ते मुनिसंघाः समागताः अभ्यगच्छंत काकुत्स्थं रामं ज्वलिततेजसं १ वै
खानसा वालखिल्याः संप्रक्षाला मरीचिपाः अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः २ ॥ ॥

अभ्यगच्छंत सुरक्षणार्थं नाथमिति शेषः १ वैखानसा इति येन खाताः स्ते वैखानसा ये वाल
खिल्या इति कृताः प्रजापतेर्नखलोमजाः संप्रक्षालाः भगवतः पादप्रक्षालनजा महर्षयः
अश्मकुट्टनिकाः संप्रक्षाला इत्यन्ये मरीचिपाः रविचंद्रांशुपानरकिरणजीवनाः अश्मकुट्टाः १२
अपक्वकुट्टिताशनभक्षकाः २ ॥

180A

दंतोलूखलिनः दंतातिरिक्तावदननसाधनरहिताः उन्मज्जकाः कंठप्रेजलेस्थित्वातपःकुर्वतः गा
त्रशय्याः अन्नास्तरणशायिनः अशय्यानिद्राहीनाः अनवकाशिकाः एकपादस्थितिस्ववकाश
दानरहिताः एकपादस्थितिमंतः इति यावत् ३ आकाशनिलयाः अनावृतप्रदेशशायिनः स्थंडिल
शायिनः उपलिमानास्तीर्णस्थलशयना ४ ऊर्ध्ववासिनः गिरिशिखराग्रप्रदेशे नित्यं वास

दंतोलूखलिनश्चैव तथैवोन्मज्जकाः परे गात्रशय्या अशय्याश्च तथैवानवकाशिकाः मु
नयः सलिलाहारा वायुभक्षास्तथा परे आकाशनिलयाश्चैव तथा स्थंडिलशायिनः ४
नित्योर्ध्ववासिनो दांतास्तथार्द्रपटवाससः सजपाश्च तपोनिष्ठास्तथा पंचतपोन्विताः ५
सर्वे ब्राह्म्या श्रिया युक्ताः हठयोगसमाहिताः घारभंगाश्रमेरामममभिज्ञासश्च तापसाः ६

शालिनः व्रतोपवासिनः इति पाठस्तु चिंत्यः तस्य साधारणधर्मत्वादिति कतकः आर्द्रपटवास
सः नित्यमार्द्रवस्त्रवसनशीलाः सजपाः सदा जपपराः तपोनिष्ठाः सदा स्वाध्यायाध्ययनशी
लाः तपो हि स्वाध्याय इति उक्तेः पंचतपोन्विताः ग्रीष्मे पंचाग्निमध्यस्थः ५ ब्राह्म्या श्रिया ब्र
ह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन हठयोगसमाहिताः योगैकाग्रचित्ताः ६ ॥ सोम

रा॰ आ॰ १४ 181

७ किमब्रुवन्नित्याह त्वमिति इक्ष्वाकुकुलस्य पृथिव्याश्च विशेषेण सकलत्रैलोक्यस्यैव निरस्तं प्रधानेन वे
नन्तगर्द्धारणाकर्तृत्वं नाथत्वेन पालकत्वं गमितं देवानामपि मघवानिव ८ यशसा विक्रमेण च विख्या
तः प्रसिद्धो नेन रूपगुणातिशयः पितृवचनपालनं व्रतं यस्य तद्भावः सत्यसत्यवचनं चैव पितृनिष्ठ
निरतिशयः किंच त्वयि सत्ये धर्मश्च पुष्कलः अन्यगाह्रोनोपि सकलाभाग्यपूर्णो भवतीत्यर्थः प्र
मादात्कर्त्तव्याकर्मप्रच्यवेताथ रक्षणे च तद्विष्णोः स्मरणादेव संपूर्णस्यादिति श्रुतिरितिस्र

अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरं ऊचुः परमधर्मज्ञमृषिसंघाः समागताः ७ त्व
मिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महारथः प्रधानश्चापि नाथश्च देवानां मघवा
निव ८ विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च पितृव्रतत्वं सत्यं च त्वयि धर्मश्च
पुष्कलः ९ त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलं अर्थित्वान्नाथ वक्ष्यामस्तच्च नः

ते ९ धर्मज्ञं शरणागतरक्षणरूपधर्मज्ञं धर्मवत्सलं धर्मानुष्ठानतत्परमीदृशं त्वामासाद्य शरणं प्रा
प्य अर्थित्वात् दर्थिभावेन यत् क्रूरमपि वक्ष्यामस्तत् तत्क्षन्तुमर्हसीति योजना यद्यपि सत्त्वकार्य
वतां प्रसामत्वमेवाप्रतिष्ठितेरितिन्यायेन तद्ग्रहणस्यानमेव सकलमनोरथपूरकत्वात् नः १४
कार्यसाधनत्वतथा प्यात्यतिशयेन किंचिद्वक्ष्यमाणं तत्तव्यमिति भावः १० ॥

181A

नः। इहलक्षणेनसमस्य विनापिकथनं स्वलक्षणेऽपिप्रवृत्तिः स्मेवं तथाप्यातिशयेनलोकशीलाण
नयमेवोधयंति अथ मे इति न चरंति विषयवासिन इति पंक्तुःखानेवलिषड्भागंकरूपंषष्ठांशाय
द्वावलयेसुनायेरतं षड्भागषष्ठांशं प्रजाभिः स्वानिष्टपरिहाराय त्वर्थः ॥ अथ रक्षणाभ्युदयमाह:
प्रजानः प्रजारक्षणे यतमानः सर्वान्देशवासिनः स्वाम्याणि निवर्गाणि रिष्टान्याणि भ्यो प्यथिक
प्रिपातस्तत्रानिवनित्ययुक्तः सदासावधानः रक्षन्निह शाश्वती असेव विवरणं वहुवार्षिकीं
कीर्तिमैहिकीमामुष्मिकं च ब्रह्मलोकरूपं फलं प्राप्नोति तदा देवब्राह्मणा इति १२ १३ ननु षष्ठा

अधमः सुमहानाज्ञायमवेतस्य तु भूपतेः यो देवेह वलिषड्भागं न च रक्षति पुत्रवत् ॥ युञ्जा
नः स्वानि वर्माण्यन्याणि रिष्टानि सततानिव नित्ययुक्तः सदा रक्षन्सर्वान् विषयवासिनः
१२ प्राप्नोति शाश्वतीं राम कीर्तिं स वहुवार्षिकीं ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते १३ यत्करोति परं धर्मं मुनिर्मूलफलाशनः तत्र राज्ञः स्यात् भागः प्रजा धर्मेण रक्षतः १४

प्रागुक्तप्रजारक्षणं वपकत्वेऽपि वनवासिरक्षणं कृतमत्र चाहृयदिति पर्यहेतिसामान्येन।
पुम्त्वकं प्रजाः वानप्रस्थप्रजाः च तद्भागस्थ पुत्रे यो शेषा इदमपलक्षणं षड्भागस्यापित त्रोपवा
सिभिर्वाहरिधर्मात् षड्भाग प्रोक्षितेनधर्मेषड्भागप्रतिपादकस्मृत्याविरोधः राजपरिपालि
तदेशमवफलाथ पोनवतो धर्मो वत्र षष्ठो भागः तदन्न भोजनादि पुण्यरोधमोनवधेवोक्तः
अत्र प्रदातव्य स्पार्यकं तत्स्वार्थनशोधाय इति स्मृतेरविरोधा १४ ॥

श्री
रा॰ आ॰
१५
182

अथविवक्षितमर्थमाहुः सोयमिति ब्राह्मणभूयिष्ठः अनेन ... वानप्रस्थास्त्वत्पितृत्वे बोधिता त्वं
नाथो रक्षको यस्य स त्वन्नाथः सोऽनाथवद्धन्यते तेन स्वार्हत्वं पितृत्वं च चिन्तयेति भावः १५ सर्वं ... मि
ध्यानपरिहारायाहुः एहीति मननशीलाः मननशीलाः भावितात्मनो निदिध्यासनविशिष्टाः शरीराणि के
वलं हतानां तत्रापि बहुधा बहुप्रकारैः रागप्रत्यङ्गच्छेदनादिभिः १६ सकलदण्डकारण्यपीडामाहुः पंपे

सोयंब्राह्मणभूयिष्ठोवानप्रस्थगणोमहान् त्वन्नाथोऽनाथवद्रामराक्षसैर्हन्यतेभृशं १५ एहि
पश्यशरीराणिमुनीनांभावितात्मनां हतानांराक्षसैर्घोरैर्बहूनांबहुधावने १६ पंपानदीनि
वासानामनुमंदाकिनीमपि चित्रकूटालयानांचक्रियतेकदनंमहत् १७ एवंवयंनमृ
ष्यामोविप्रकारंतपस्विनां क्रियमाणंवनेघोरंरक्षोभिर्भीमकर्मभिः १८ ततस्त्वांशरणार्थं
चशरण्यंसमुपस्थिताः परिपालयनोरामवध्यमानान्निशाचरैः १९ परात्वत्तोगतिर्वीर
पृथिव्यांनोपपद्यते परिपालयनःसर्वान्राक्षसेभ्योनृपात्मज २० ॥ रामायनमः

स्यादिदंपावनयशस्तत्रनिवासोयेषांपंपानदीरूपानदीवासस्तत्रमंदाकिनीमपीति अनुर्लक्षणे
कर्मप्रवचनीयः मंदाकिन्यामनुतत्तत्प्रदेशेनद्यास्तीरवासिनांमंदाकिन्याविस्तीर्णत्वादुक्तातो
ऽर्थवगाहतया पृथग्गतिः राजवासत्वाने १७ विप्रकारं दुःखं नमृष्यामः सोढुमशक्ताः १८ श
रणार्थंरक्षणार्थंशरण्यंशरणार्थंरक्षणार्थं १९ ततःपरागतिस्त्वदन्यस्त्राता २० ॥ राम १५

182A

तपस्विनांतपोवलयुक्तानांतापसानांऋषीणां २१ तेदेवाऊचुर्नैवमिति एवंउक्तेप्रार्थनारूपंवच
आज्ञाप्यः शिष्यादिवदेवंक्रुवितिशिक्षणीयः केवलेनोपाध्यंतररहितेनस्वकार्येणपितृवच
नपरिपालनात्मकेनहेतुनात्वयैवनंप्रवेष्टव्यमेवसत्यमेववनप्रवेशेनराक्षसैः क्रियमाणंभव
तामिमंविप्रकारंअपाकृष्टमपिमविष्यति इत्यर्थः इतितीर्थकृतकोभवच्छत्रुहननेकेवलं

एतच्छ्रुत्वातत्काकुत्स्थस्तापसानांतपस्विनां इदंप्रोवाचधर्मात्मासर्वानेवतपस्विनां
२१ नैवमर्हथमांवक्तुमाज्ञाप्याहितपस्विनां केवलेनस्वकार्येणप्रवेष्टव्यां
वनेमया २२ विप्रकारमपाकृष्टुंराक्षसैर्भवतामिमम् पितुस्तुनिर्देशकरःप्रवि
ष्टोहमिदंवनं २३ ॥

मदीयमेवकार्यं वहुधर्मोपचयजनकत्वात्सदिष्टसाधनमेवयद्यपिस्वविप्रकारनाश
शोभवतःसमर्था एवतथापिममधर्मोपचयार्थैवशोभवदीयाममप्रेरणेतिभावः अ
न्ययस्तुत्वसुस्फुटएवेत्यन्य २२ किंचपित्राज्ञापरिपालनार्थमिदंवचनंप्रविष्टएवास्मि
प्रविष्टंचममपिसोर्थोभाव्येवेतिभवतामेवंप्रार्थनेमनर्थंसरमितिभावः २३ ॥

रा॰व्या॰ तदेवाह भवतामिति यदृच्छयाऽऽगत एवाहं भवतामर्थसिद्ध्यर्थमपि भविष्याम्येवेति शेषः प्रीत
१९ स्मितानेनुउक्त एवार्थः कविना श्लोकान्तरेणावाप्यते ऽयमपि शैली कवेरिति कतकतीर्थौ ग्रंतः श्रा
183 त्रनद्दृतमिक्ष्वाभिस्रतस्तस्य यदृच्छया वनमागतस्तस्यैव वनवासो महाफलो भविष्यतीति स्वगतो
विचारः अथ यत्र ऋषिर्येषां यत्प्रकाशं प्रतिजानीते पश्यंत्विति सर्वं श्यादनिष्यामीति यावत् २४ २५

भवतामर्थसिद्ध्यर्थमागतोऽहं यदृच्छया तस्य मेऽयं वने वासो भविष्यति महाफलः २४ तप
स्विनां रणे शत्रून्हन्तुमिच्छामि राक्षसान् पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः २५
दत्त्वा वरं चापि तपोधनानां धर्मे धृतात्मा सह लक्ष्मणेन तपोधनैश्चापि सहार्यवृत्तः सु
तीक्ष्णमेवाभिजगाम वीरः २६ इत्यारण्ये रा॰ षष्ठः सर्गः ६ रामस्तु सहितो भ्रात्रा सीत
या च परंतपः सुतीक्ष्णस्याश्रमपदं जगाम सह तैर्द्विजैः १ स गत्वा दूरमध्वानं नदीस्तीर्त्वा
बहूदकाः ददर्श विमलं शैलं महामेरुमिवोन्नतं २ ततस्तदिक्ष्वाकुवरौ सततं वि
विधैर्द्रुमैः काननं तौ विविशतुः सीतया सह राघवौ ३ ॥ राम

वरं उक्तवचनात्मनां धर्मे धृतात्मा धर्मे स्थितचित्तः आर्यवृत्तं यस्य सः तपोधनैः सह सुतीक्ष्णमा १९
भिजगाम २६ इत्यारण्ये रामा॰ षष्ठः सर्गः ६ द्विजैः प्रार्थनार्थमागतैर्वानप्रस्थैः १ विमलंप
वित्रं महामेरुमिवेति पीठे स्थितमिति शेषः नैल्यस्थौल्याभ्यां साहश्यं उन्नतमिति स्वरूपकथ

183A

४ अनुवनं तत्त्वदिदृक्षुकवराचित्तादिश्लोकद्वयं प्रक्षिप्तमिति कतकः मलपंकजधारिणं मलस्य स
वांगसम्बन्धात् यत्पंकजं पद्मासनेऽस्थितो यद्वा पंकजं हृदयपंकजं धारिणमेकाग्रयोगधारणशील
मित्यर्थः इति कतकः तीर्थस्तु मलपंकजाटाधारिणमिति पठित्वा मलं उद्वर्तनादिसंस्काराभावा
च्छरीरजं पंको वनसंचाराच्छरीरलग्न इति भेदः इत्याह विधिवदुपगम्येति शेषः ५ तन्माभिव
देति मा इति मा उक्त्वा योगधारणशीलत्वेन वाग्व्यवहाराभावादेवं प्रार्थनाः सत्यविक्रम अकृततपः
स्वभावः ६ स निरीक्ष्येति उक्तवचनात्समाधितो व्युत्थाय रामं दृष्ट्वेत्यर्थः ७ सनाथ इव सम्या

प्रविश्य तु वनं घोरं बहुपुष्पफलद्रुमं ददर्शाश्रममेकांते चीरमालापरिष्कृतं ४ तत्र ताप
समासीनं मलपंकजधारिणं रामः सतीक्ष्णं विधिवत्तपोधनमभाषत ५ रामोऽहमस्मि
भगवन्भवंतं द्रष्टुमागतः तन्माभिवद धर्मज्ञ महर्षे सत्यविक्रम ६ स निरीक्ष्य ततो धी
रो रामं धर्मभृतां वरं समाश्लिष्य च बाहुभ्यामिदं वचनमब्रवीत् ७ स्वागतं ते रघुश्रेष्ठ रा
मः सत्यभृतां वर आश्रमोऽयं त्वयाक्रांतः सनाथ इव सांप्रतं ८ ॥ राम

आश्रमो ब्रह्मचर्याद्याश्रमव्यवहार्योऽयं देहस्त्वया जीवरूपेणाक्रान्तोऽपि सांप्रत मिकः इव अत्रामा
दानंदस्य वेदशरीररूपेण प्रतिभासमानस्य बहिः स्थितेष्वनुभवनुसनाथ इव ईदृशस्य त
द्रूपस्य दर्शनेन चित्तशुद्ध्या पूर्वं जीवाभेदेनाहमिति प्रतीत्या गृहीतस्य तदेव लक्ष्यरूपेणेदा
नीं गृहीताभेदेनाहमिति प्रतीत्या गृहीतस्य तदेव लक्ष्यरूपेणेदानीं गृहीताभेदनिर्वचनेन सना
थत्वव्यवहारः इव न जडानामपि प्रतिरिक्तताभावः सूचित इति ध्वनिः ८ ॥

रा०आ० अतस्त्वां प्रतीत्तमाणा इति तां सालभूतं महायशा अंतसंवोधनं देवलोकं देवस्य ब्रह्मणो लोकं ९ नन्व
१२ कात्रे महागमनसंभावनात आह चित्रेति यदा राज्याद्भ्रष्टः चित्रकूटमुपादाय प्राप्य स्थितोसि तदा
184 प्रभृति मेमया श्रुतोसि श्रामो यमित्यस्य व्याख्याप्यर्थत चित्रो दिविचित्रफलद्रुत्तकूटेरखगादेशो संसार
प्राप्यराज्यभ्रष्टो विद्यासंसर्गेण स्वाराज्यान निस्पृह्य ह्रद्व द्वमुक्तस्वरूपात भ्रष्टस्तु योगात संसारं प्राप्य
स्तमेवमया श्रुतवा अत एवाः श्रुतोस्मि अतस्त्वामतीत्तया न देवलोकं गतोहं इति व्याख्यार्थः नन्विदानी

प्रतीतमाणस्त्वामेव नारोहेहं महायशाः देवलोकमितो वीर देहं त्यक्त्वा महीतले ९ चित्र
कूटमुपादाय राज्यभ्रष्टोसि मे श्रुतः इहोपयातः काकुत्स्थ देवराजः शतक्रतुः १० उपा
गमच्च मे देवो महादेवः सुरेश्वरः सर्वान्लोकान् जितानाह मम पुण्येन कर्मणा ११ ते
षु देवर्षिजुष्टेषु जितेषु तपसा मया मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः १२ त
मुग्रतपसं दीप्तं महर्षिं सत्यवादिनं प्रत्युवाचात्मवान् रामो ब्रह्माणमिव वासवः १३

कथं ते देवलोकारोहणप्रसक्तिस्तत्राह इहेति शरभंगानुष्ठानानंतरमिहाभ्यागतः स्पर्श्यः १० पु
ण्येन कर्मणा जिताः निस्पृहेनेन श्रवणसंपत्त्यावपि निदिध्यासनसंपत्त्यभावोस्योक्तः मुख्या वचा १२
ने पुनरुक्तं न दोषाय देवादिपदानां प्रवृत्तिनिमित्तभेदस्य स्पष्टत्वान्न पौनरुक्त्यमिति के
चित् ११ अयमर्थ पुण्यमनंतफलत्वाय भगवत्यर्पयति तेष्विति १२ १३ ॥

184A

अहमेव ददामीति तपसेत्यर्थः ततः प्रतिग्रहेनाहमनधिकारीति आपततोऽर्थः वास्तव्यस्तु तदत
पुण्यलोकांर्गाकारेणातमनुगृह्णातीति भगवान् अहमेवेति न्यासत्वेन त्वया स्थापितं तम्यसापा
यिष्यामि अहमेवेत्यनेन सर्वकर्मफलदाता सर्वोपासनास्वहमेवेति सूचितं अथ लोकाद
ष्टेनत्वनप्रतारणाय आवासमिति प्रदिष्टत्वयेति शेषः १४ गौतमेन गौतमगोत्रेण श
रभंगेन सर्वत्र इह परत्र च कुशल इत्याख्यातं एवं चानभिज्ञोहमित्युत्तरे दानेमशक्यमि

अहमेव ददिष्यामि स्वयं लोकान्महामुने आवासं त्वहमिच्छामि प्रदिष्टमिह कान
ने १४ भवान्सर्वत्र कुशलः सर्वभूतहिते रतः आख्यातं शरभंगेण गौतमेन महा
त्मना १५ एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः अब्रवीन्मधुरं वाक्यं हर्षे
ण महताप्लुतः १६ अयमेवाश्रमो राम गुणवान्रम्यतामिति ऋषिसंघानुच
रितः सदा मूलफलैर्युतः १७ इममाश्रममागम्य मृगसंघा महीयसः अहत्वा
प्रतिगच्छन्ति लोभयित्वाकुतोभयः १८ ॥

त्वाशयः १५ १६ अयमेवास्मदीयः १७ अनेन गुणमुक्ता दोषमाह इममि
ति इममाश्रमं उद्देकारणाश्रमं महीयसं प्रतिशामितम हत्ववतोपि अहत्वाहत्न
नमहत्वा लोभयित्वा रूपकांतिगतिविशेषैः चित्तदाभक्षताङ्गगच्छन्तीत्यर्थः अनेन
भावी मारीचहतानतः सूचितः अकुतोभयाः तद्दचि १८ राम ॥

रा॰ आ॰ १८ अत्र दंडकारण्ये नान्यो दोषो भवेदत्रेत्यस्यैव विवरणं मृगेभ्योन्यत्र विद्धि वै इति मृगेभ्योन्य
त्र न भयमिति विद्धीत्यर्थः दंडकारण्याभिप्रायेण मृगेत्युक्तं तदाश्रममात्राभिप्रायं परि
कल्पनामोवादीदित्याहुः तच्छ्रुत्वेति तच्छ्रुत्वा मृगेभ्यो भयविषयं वचनं १९ हन्यां प्रासंके
लेलिङ् प्राप्तमृगहननेन कार्यांपरं तेवं कृतात्र स्यान्नमशक्यमित्याह भवानिति तत्र मृगसं

185

नान्यो दोषो भवेदत्र मृगेभ्योन्यत्र विद्धि वै तच्छ्रुत्वा वचनं तस्य महर्षेर्लक्ष्मणाग्रजः
१९ उवाच वचनं धीरो विगृह्य सशरं धनुः तानहं सुमहाभागान्मृगसंघान्समाग
तान् २० हन्यां निशितधारेण शस्त्रेणानतपर्वणा भवांस्तत्राभिषज्येत किं स्या
त्कृच्छ्रतरं ततः २१ एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये तमेवमुक्त्वोपरमं
रामः संध्यामुपागमत् २२ अन्वास्य पश्चिमां संध्यां तत्र वासमकल्पयत् सु
तीक्ष्णस्याश्रमे रम्ये सीतया लक्ष्मणेन च २३ ॥

त्वद्वधे भवान्मया अभिषज्येत अभि
षंगः पराभवः कृतपराभवो यो भवेत् ततः परं मे कृच्छ्रतरं किं स्यात् न किमपि २१ यदे
वमत एतस्मिन्नाश्रमे चिरं चिरकालं वासं न समर्थये नेच्छामि मृगसंघवधं विनाश्या
तमशक्यं तद्वधेन च भवतो पीडेत्याशयः उपरमं उपरम्य क्वचिदुपरमस्येव पाठः संध्या १८
मुपागमत् संध्यावंदितुमुपागमत् मुपागतवान् २२ २३ ॥ राम

185A

संध्यां निहृतौ रजनीमभ्यवहारार्दौसमीत्येतियावत् २५ इतिश्रीरामायणे आरण्यकांडेसप्तमः
सर्गः ७ परिणाम्यिश्र्यतिवाह्य १ उपस्पृश्यस्नात्वा उत्पलगंधवावता २ कालंयथाकालप्राप्त

ततः शुभंतापसभोज्यमन्नंस्वयंसुतीक्ष्णःपुरुषर्षभाभ्यां ताभ्यांसुसत्कृत्यददौमहात्मासं
ध्यांनिवृत्तौरजनींसमीक्ष्य २५ इत्यार्षेरामायणेआरण्यकांडेसप्तमःसर्गः ७ राम
स्तुसहसौमित्रिःसुतीक्ष्णेनाभिपूजितः १ परिणाम्यनिशांतत्रप्रभातेप्रत्यबुध्यत
१ उत्थायचयथाकालंराघवःसहसीतया उपस्पृश्यसुशीतेनतोयेनोत्पलगंधि
ना २ अथतेऽग्निंसुरांश्चैववैदेहीरामलक्ष्मणौ काल्यंविधिवदभ्यर्च्यतपस्विशर
णेवने ३ उदयंतंदिनकरंदृष्ट्वाविगतकल्मषः सुतीक्ष्णमभिगम्येदंश्लक्ष्णंवचन
मब्रवीत् ४ सुखोषिताःस्मभगवन्त्वयापूज्येनपूजिताः आपृच्छामःप्रयास्यामोमुन
यस्त्वरयंतिनः ५ त्वरामहेवयंद्रष्टुंकृत्स्नमाश्रममंडलं ऋषीणांपुण्यशीला
नांदंडकारण्यवासिनां ६ अभ्यनुज्ञातुमिच्छामःसहैभिर्मुनिपुंगवैः धर्मनित्यै
स्तपोदांतैर्विशिखैरिवपावकैः ७ रामायनमः ॥

मित्यभ्यर्चनक्रिया १२ विशेषणं २ ४५
६ अभ्यनुज्ञातमिच्छामः तत्कर्तृकंगमनानुज्ञानंप्रार्थयामः विशिखैः विधूमैः ७ ॥

रा॰ आ॰ ५५ अविषह्यातपः सोढुमशक्यातपो यावद्यातप एवातिविराजते तावद्गंतुमिच्छाम इत्यन्वयः अमार्गेणागते
येनागतां लक्ष्मीं स्वयं प्राप्यान्वयवर्जितः अन्वयः संबंधः स्तद्धिवर्जितः गुरुसाधुजनसेवारहितो
दुष्प्रभुर्विरुद्धकुलजश्च यावदविषह्यप्रतापो न तनुः तावद्गंतुमिच्छाम इत्यर्थः ८ अरिष्टं निरुपद्र

186

अविषह्यातपो यावत्सूर्यो नातिविराजते अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ८ ता
वदिच्छामहे गंतुं इत्युक्त्वा चरणौ मुनेः ववंदे सहसौमित्रिः सीतया सह राघवः ९ तौ संस्पृश्य
तौ चरणावुत्थाप्य मुनिपुंगवः गाढमाश्लिष्य सस्नेहमिदं वचनमब्रवीत् १० अरिष्टं गच्छ
पंथानं राम सौमित्रिणा सह सीतया चानया सार्द्धं छाययेवानुवृत्तया ११ पश्याश्रम
पदं रम्यं दंडकारण्यवासिनां एषां तपस्विनां वीर तपसा भावितात्मनां १२ सुप्राज्यफ
लमूलानि पुष्पितानि वनानि च प्रशान्तमृगयूथानि शांतपक्षिगणानि च १३ फुल्लपं
कजखंडानि प्रसन्नसलिलानि च रमणीयान्यरण्यानि मयूराभिरुतानि च १४ रम्या
तां वत्स सौमित्रे भवानपि च गच्छतु आगंतव्यं च ते दृष्ट्वा पुनरेवाश्रमं प्रति १६ ॥

वं ११ आश्रमपदमिति जातावेकवचनं १२ उक्तविशेषणविशिष्टानि वनानि सरांसि च द्रष्टा
व्यानीत्यन्वयः शांतपक्षिगणानं परस्परविरोधाभावात् १३ कारंडवैः कीर्णानि व्याप्तानि ५५
१४ १५ तेन यासकल ऋषीणामाश्रमान् दृष्ट्वा पुनरपि ममाश्रमं प्रत्यागंतव्यमित्यर्थः १६

186A १७ ततोधनुरादिदानानंतरंविमलौनिशितौखड्गौचददौ १८ चापेचायशाहोद्दिलिंग १९ २० इत्या
र्षेरामायणेआरण्यकांडेअष्टमःसर्गः ८ रात्तसवधप्रतिज्ञापुनरुक्तोकारयितुंतेजोवृथा
र्थेवरात्तसवधमापततोनिषेधतिसीताअब्रवीत् सीतेतिशेषः हृद्ययाभक्तिमत्वेनहृदयंगमाया
स्निग्धयास्नेहप्रवृत्तया १ अधर्ममितियद्यपिभवान्महान्महापुरुषोऽथापिसुसूक्ष्मेणवि

एवमुक्तस्तथेत्युक्त्वाकाकुत्स्थःसहलक्ष्मणः प्रदक्षिणंमुनिंकृत्वाप्रस्थातुमुपचक्रमे
१७ ततःशुभतरेतूणीधनुषीचायतेक्षणा ददौसीतातयोर्भ्रात्रोःखड्गौचविमलौततः
१८ आबध्यचशुभेतूणीचापेचादायसस्वने निष्क्रान्तावाश्रमाद्गन्तुमुभौतौरामलक्ष्म
णौ १९ श्रीमन्तौरूपसंपन्नौवनजातौमहर्षिणा प्रस्थितौधृतचापासिसीतयासहरा
घवौ २० इत्यार्षेरामायणेआरण्यकांडेअष्टमःसर्गः ८ सुतीक्ष्णेनाभ्यनुज्ञातंप्र
स्थितंरघुनन्दनं हृद्ययास्निग्धयावाचाभर्तारमिदमब्रवीत् १ अधर्मंतुसुसूक्ष्मे
णविधिनाप्राप्यतेमहान् निवृत्तेनचशक्योयंव्यसनात्कामजादिह २ ॥

धिनासूक्ष्मेणमार्गेणविचारणेसतिभवान्अधर्मंतुप्राप्यतेप्राप्नोतिछांदसःशपन् अ
तिङ्वैलक्षण्यवधप्रतिज्ञयावनप्रवेशोसतीत्यर्थः वर्तमानसामीप्येलट् अयमधर्मस्तुका
मजाद्व्यसनाद्धिनिवृत्तेनत्वयानिवर्तयितुंशक्यः २ राम

रा०अ०
२०
187

किं तत्काममन्यं व्यसनं कश्चाग्रमनर्थो यस्मात्त्रिविधस्मान्निवर्तनीय इत्याशंकायामाह त्रीण्येवेति कानि त्री
णीत्यत आह मिथ्येति स्वदेहसंबंधिप्रज्ञादिराघव यस्मात् मिथ्यावाक्यप्रवृत्तिः पुंसस्तस्मात्परमं कं व्यसनं तस्ये
तरनेतरं न तोपि गुरुतरो अन्यत्तं तस्माद्व्यसनं भूतो २ कौतौ तत आह परदारेति विनावैरं रौद्रभा
वावलंबनं मृगाणामत्यंतं तद्दुर्बलत्वेन तेषु वैरप्रसक्त्यभावादिति भावः एवं व्यसनत्रयं निरूप्य
प्रकृते ऽधर्मं प्राप्तिपरिहाराय व्यसनं परिशेषयितुमाह मिथ्येति ४ परदाराभिमर्शनमपि

त्रीण्येव व्यसनान्यत्र कामजानि भवंत्युत मिथ्यावाक्यं तु परमं तस्माद्गुरुतरावुभौ ३ परदा
राभिगमनं विना वैरं च रौद्रता मिथ्यावाक्यं न ते भूतं न भविष्यति राघव ४ कुतोभिलष
णं स्त्रीणां परेषां धर्मनाशनं तव नास्ति मनुष्येंद्र न चाभूत्ते कदाचन ५ मनस्यपि तथा
राम न चैतद्विद्यते क्वचित् स्वदारनिरतश्च त्वं नित्यमेव नृपात्मज ६ धर्मिष्ठः सत्यसंध
श्च पितुर्निर्देशकारकः त्वयि धर्मश्च सत्यं च त्वयि सर्वं प्रतिष्ठितं ७

त्वयिनास्ति इत्याह कुत
इति कुतोपि हेतोरित्यर्थ कं कुत इति सर्वान्वयि धर्मनाशनं परेषां स्त्रीणामभिलषणं तत्त्वयि कं
त तस्य पूर्वादिति वनास्ति वर्तमानकालेनाभूत् एवं च ततः परं न भविष्यति च ५ किं बहुना म
नस्यपि तत्पदं न विद्यते अनेनेच्छाया अपि निरासः तस्यैवोपपादनं स्वदारेति ६ यतस्त्वं धर्मिष्ठ २०
त्वादिगुणैः अतस्त्वयि धर्मः प्रतिष्ठितः सर्वं सत्यं च त्वयि प्रतिष्ठितं ७ ॥

187A न नक्तव्यमसनेमयि न भविष्यत इति कथं तत्र निर्णयो तत्राह तच्चेति वा अहं शाक्य अश्रेपितत्परि
पालनं कर्तुं शाक्यं यतस्तन्नूपरिपालनकारणं जितं द्विषैर्यतस्त्वयि स्थिरता नेम विष्यतइति निर्णयः
८ तृतीयं तद्व्यसनं प्रसक्तमित्याह तृतीयमिति यत मोहात् निर्वैरे परप्राणाभिहिंसनं क्रि
यते न तदिदं रौद्रा व्यसनगणायान्‌रूपं तृतीयं व्यसनं ते तत्तव तत्ततसमुदृश्यात्तसमुपस्थितं राक्षसैः स्वा
पराधाकारेण त्विर्वैरत्वमस्येति वोध्यं ९ कुतोस्या धर्मस्य मम प्राप्तिरेतत्राह प्रतिज्ञातमिति

तच्च सर्वं मद्‌द्वारा द्रोहसत्त्ववोढं जितं द्विषैः तवव पर्यं द्रियतं च भूतानां प्रियदर्शिन ८ तृ
तीयं यदिदं रौद्रं परप्राणाभिहिंसनं निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितं ९ प्रति
ज्ञातं त्वया वीर दंडकारण्यवासिनां ऋषीणां रक्षणार्थाय वधः संयति रक्षसां १०
एतन्निमित्तं च वनं दंडका इति विश्रुतं प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः ११
ततस्त्वां प्रस्थितं दृष्ट्वा मम चिंताकुलं मनः त्वद्‌वृत्तं चिंतयंत्या वै भवेन्निःश्रेयसं हितं १२

१० ननु प्रतिज्ञामात्रेण कथमधर्मप्राप्तिस्तत्राह एतदिति प्रतिज्ञातरक्षोवधार्थमित्यर्थः दं
डका इति विश्रुतं प्रसिद्धं वनमित्यर्थः प्रस्थिते न त्वया सर्वं प्रतिज्ञातं तत्कर्तव्यमेवेति तत्त्व
मक्तिरितिभावः ११ ततो हे तोस्त्वां प्रस्थितं दृष्ट्वा त्वद्‌वृत्तं सन्मार्गवर्ति जनरूपं चारित्रं दृष्ट्वा त्वयि
श्रेयसं पारलौकिकं सर्वं हितमिति लोके सर्वं चिंतयंत्या मम मनश्चिंताकुलं भवेद्वा प्रति
रक्षसां वलवत्त्वेन तेभ्योऽनिष्टसंभावनया हि किमत्र भयं गोपि संभावितइतिभावः १२

रा॰आ॰
२१
188

यदेवमतो नहि मे इति कारणं तत्र मनोरुचौ मम मे इति सकाशाद्धितिशेषः १३ हि यतस्त्वं वनंगतः सर्वा
न्वनचरान्दृष्ट्वा तस्मात् दृष्ट्वा शरव्यं पक्षं कच्चित्कुर्याः करिष्यसि इदमेव हिंसालक्षणं धर्मप्रा
कारणं १४ पापसाक्षात्समक्षं तावद्ध्यानं न तथा कल्पमित्याह क्षत्रियाणामिति समीपतः स्थितं ध
नुर्येन्समीपतः स्थितं तत समपुसमस्तं तोवलं तेजसः प्राधिक्यं करोति यथा वह्नेस्तेजसः प्राधिक्यमित्य

नहि मे रोचते वीर गमनं दंडकान्प्रति कारणं तत्र वक्ष्यामि वदंत्याः श्रूयतां मम १३ त्वं हि
बाणधनुष्पाणिर्भ्रात्रा सह वनं गतः दृष्ट्वा वनचरान्सर्वान्कच्चित्कुर्याः शरव्ययं १४ क्ष
त्रियाणामिह धनुर्हुताशस्येंधनानि च समीपतः स्थितं तेजो बलमुच्छ्रयते भृशं १५ पु
रा किल महाबाहो तपस्वी सत्यवाक्छुचिः कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे १६ त
स्यैव तपसो विघ्नं कर्तुमिंद्रः शचीपतिः खड्गपाणिरथागच्छदाश्रमं भटरूपधृक् १७ त
स्मिंस्तदाश्रमे पुण्ये निहितः खड्ग उत्तमः स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः १८ स
तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः वने तु विचरत्येव रक्षन्प्रत्ययमात्मनः १९ ॥

तानि कुर्वते १५ पुरेति द्वाभ्यामाह पुरेति रतमृगद्विजे इति पाठे उपशांतमृगपक्षिके तपस्येय २१
इतिशेषः १६ भटो योधः तस्मात्तस्मिन्नाश्रमे पुण्ये तपसि तिष्ठतस्तस्य मुनेः शेषषष्ठीतस्मै मु
नये स खड्गः न्यासविधिना कालांतरे प्रदाय रक्षणार्थं स्थापनकर्मणा १८ आत्मनः प्रत्ययं

188A

तदेव दर्शयति २० परिवदन् आत्मनोऽधर्मकलंकं च पश्यन् तपसि निश्चयं कृत्वा बुद्धि
त्यक्त्वा रौद्रीं बुद्धिं चकार २१ रौद्राभिरतः रौद्रकर्मणि प्रीतिमान् अधर्मेण कर्षितो हीनध
र्मः कृतः सर्वासाद्धारणात् २२ शास्त्रसंयोगकारणमिति वद्धशीर्द्धिः अग्निः संयोगो यथा ।
काष्ठानां विकारहेतुः तद्वच्छास्त्रसंयोगः प्राणिनां विकारहेतुः २३ स्नेहाद्वर्द्धिष्यात्

यत्र गच्छन्तु पादान्तं मूलानि च फलानि च निविनायातितं वृक्षं न्यासरक्षणतत्प
रः २० नित्यं शास्त्रं परिवदन् क्रमेण स तपोधनः चकार रौद्रीं तां बुद्धिं त्यक्त्वा तपसि
निश्चयं २१ ततः स रौद्राभिरतः प्रमत्तो धर्मकर्षितः तस्य शास्त्रस्य संवासान्ना
गमन्नरकं मुनिः २२ एवमेतत्पुरा वृत्तं शास्त्रसंयोगकारणं अग्निसंयोगवद्धे
तुः शास्त्रसंयोग उच्यते २३ स्नेहाच्च वर्द्धमानाच्च स्मारये नातिशीतये न कथंचन ।
साकार्यं गृहीतधनुषा त्वया २४ ॥

वर्द्धमानात् त्वत्कर्त्तृकान् महिषयात् किंच वर्द्धमानो नाम मदीयोऽयं भर्त्तेत्येवमभि ।
मानस्मरये प्रत्याहृतमिति शेषः अत्र स्नेहो हेतुः वर्द्धमानाच्च नातिशीतयेऽत्यर्थं त
देव शीतलत्वं करोति न कथंचनेति प्रतीतिः स्मारये ज्ञानशीतयेऽतिपठति व्याच
ष्टे च तत्तदुत्तरवाक्ये करिष्यमाणशीतलत्वेन व्याहृतमिति कतकः २४

रा॰च॰
२२
189

साकेत्यत्राह बुद्धिरिति अस्यैव प्रपंचो ऽपराधं विनेति दंडं तं रात्समानिति शेषः न मंस्यते न वयत्व
मा विति ये नेति शेषः लोकान् वीरन् कामये इति पाठे लोकान् दंडं तं नेच्छामि एतत्सर्वं दितरप्राणि
वृथस्याप्युद्वेगमसतिप्रसंगादिति भावः २५ ननु स्मरदपराधात्कुत्राणोपि आर्तस्य निजजनरक्षणार्थ
मेव तेषां वा योग्यमित्यत आह तत्रियाणामिति तत्रियाणां तत्र धर्माद्वेपदस्थिति स्थितानाम
न एव वीराणां राज्यारक्षणात यायुद्धादि प्रहृति मताधूनावद्धनुषा कार्यं यद्वनेषु वसतां नि।

बुद्धिर्वैरं विनादंडं तं रात्समानुदंडकाश्रितान् अपराधं विनादंडं तं लोको वीर न मंस्यते
२५ तत्रियाणां तु वीराणां वनेषु नियतात्मनां धनुषाकार्यमेतावदार्तानामभिर
क्षणं २६ क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च व्याविद्धमिदमस्माभिर्देशधर्म
मस्तु प्रज्यतां २७ कदर्यकलुषा बुद्धिर्जायते शस्त्रसेवनात् पुनर्गत्वात्वयोध्यायां
तत्रधर्मं चरिष्यसि २८ ॥

यतात्मनामार्तानामभिरक्षणं २६ अस्माकं तु नानाप्यधिकार इत्याह क्व चेति तत्रांडुष्कव
धादि तपो जटावल्कलादि धारणा सर्वं कमस्माभिरिदानीमनेनाविष्ट स्मितमिदं व्याविद्धं प
रस्परं व्याहतं तस्माद्देशधर्मस्तपो वनधर्मस्त्वप्रज्यतां सेव्यतां २७ यतः शास्त्रसेवनात्कद
र्याणां कृपणानामिव कलुषा बुद्धिर्जायते धर्मो नष्टा विरोधिनी अतः शास्त्रसेवनं वनेनके
तेव्यमिति ध्वनिः ननु तत्रिय स्य ममयुद्धमेव धर्मो तत्राह पुनरिति सएव तस्य देशः काल।

॥ श्री ॥
श्रीरा
२२

189A

शास्त्रसेवननिषेधमेवद्रढयति अत्रत्येति यदिराज्यंत्यक्त्वावनेनिरतस्त्वंमुनिर्मुनिवृत्तिर्भ
वेस्तदाममश्वश्रूश्वशुरयोरत्यन्तप्रीतिर्भवेत् श्वशुरस्यवनवासोचितधर्मानुष्ठानेनस्वर्गा
लाभजाप्रीतिः श्वश्र्वास्तुपुत्रस्यादिराज्यादित्वेनसुखवासेजाप्रीतिरितिबोध्यं २९ हिंसालव
लेशस्याधर्मत्वात्सन्निवृत्तिधर्मानुष्ठानमेवोचितमित्याह धर्मादिति धर्मात् अहिंसाप्रधाना

अत्रत्यानुभवेत्प्रीतिःश्वश्रूश्वशुरयोर्मम यदिराज्यंहिसंन्यस्य भवेस्त्वंनिरतोमुनिः
२९ धर्मादर्थःप्रभवतिधर्मात्प्रभवतेसुखं धर्मेणलभतेसर्वंधर्मसारमिदंजगत् ३०
आत्मानंनियमैस्तैस्तैःकर्षयित्वाप्रयत्नतः प्राप्यतेनिपुणैर्धर्मोनसुखाल्लभते
सुखं ३१ नित्यंशुचिमतिःसौम्यचरधर्मंतपोवने सर्वंहिविदितंतुभ्यंत्रैलोक्य
मपितत्त्वतः ३२ ॥

त् ३० सर्वव्यथाधर्मएवसंपाद्यइत्याह आत्मानमित्यलेरीत्यादिनिपुणैःसमर्थैःसुखं
सुखसाधनोधर्मः ३१ उपसंहरति नित्यमिति त्रैलोक्यमपित्रिलोकवर्तिप्रजाधर्मा
र्थोपमर्धनत्साधनकलापइत्यर्थःतत्त्वतया ३२ ॥ राम ॥

रा॰ आ॰
२२
190

श्रेयः विनयेन नत्वमापयति स्त्रीति माद्विरेण मा विलंबो मास्त्वित्यर्थः ३३ अत्रेदं रहस्यं सीतातात्पर्यं यदिसु
कलत्रतः तयेण सकलत्रिभुवनवर्तिआर्तरक्षणमनपराधिपीडां विहाय कर्तव्यं शाक्यं तदा तात्रथमे
वृत्तो चेद्बहुहतपोधर्मं चरेति धनुषा कार्यमेतावदार्तानामभिरक्षणमित्यनेनेदसूचितं त्रिया
णां तवीराणां वनेषु नियतात्मनामिति पूर्वार्थस्य वनेष्वपि वमतां तत्रियाणां वीराणामत्रार्थोक्त
मावश्यकमिति निगूढतात्पर्यं ३३ इत्यारण्ये रामाभिरामे नवमः सर्गः ९ एवं युद्धसमापातनः

स्त्रीचापलादेतदुदाहृतं मे धर्मं च वक्तुं तव कः समर्थः विचार्य बुध्या तु सहानुजेन यद्रोचते
तत्कुरु मा चिरेण ३३ इत्यारण्ये नवमः सर्गः ९ वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्त
या श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ जानकीं १ हितमुक्तं त्वया देवि स्निग्धया सदृ
शं वचः क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति २ किंनु वक्ष्याम्यहं देवि त्वयैवोक्त
मिदं वचः कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ३ ॥ राम ॥

सीतया धर्मतत्त्वप्रतिपादितं तद्व्याख्यानविशेषेण वधर्मत्वं प्रतिपादयति रामः वाक्यमिति संवर्द्धित
इति पाठे संवर्द्धिततेजाः धर्मे स्थित इति पाठान्तरं १ कुलं व्यपदिशन्त्या त्रियाणां वीराणा
मित्यादिना तत्रियकुलधर्मं बोधयन्त्या २ अत्रोत्तरमाह किंन्विति वक्ष्यामि त्वयैवोक्तं वदनमि
त्यर्थः उदंशब्दार्थः क्षत्रियैरिति रक्षकाभावकृत आर्तानां शब्दो माभूदित्यर्थं क्षत्रियैश्चा
पो धार्यते इत्येवं धनुषा धनुषा कार्यमेतावदार्तानामभिरक्षणमिति वाक्यं नोक्तमिति

२२

190A

तद्वचनं स्यायमेवानुष्ठानकानकाल इत्याह तेचेति संशितव्रताः स्वयमागत्य शरणं गता इत्य
नेन नाहं गर्वादिदोषेण रक्षोवधार्थं प्रवर्ते किं चास्म शरणागतानां तेषु वैरेण ममापि वैरमा
र्थादायातमिति निर्वैरवधप्रसक्तिर्न मे त्युक्तं ४ कालकालेषु सर्वकालेष्वित्यर्थः गाढम
र्दितस्य वधमाना इति शेष ५ ६ अभ्यवपद्यस्व त्रस्व रक्षाणेति माम् ऊचुः आर्षं परस्मैपदं एवमुक्ते

ते चार्ता दंडकारण्ये मुनयः संशितव्रताः मां सीते स्वयमागम्य शरण्याः शरणं गताः ४ वसं
तः कालकालेषु वने मूलफलाशनाः न लभंते सुखं भीरु राक्षसैः क्रूरकर्मभिः ५ भ
क्ष्यंते राक्षसैर्भीमैर्नरमांसोपजीविभिः ते भक्ष्यमाणा मुनयो दंडकारण्यवासिनः ६ अ
स्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतं ७ कृत्वा
वचनशुश्रूषां वाक्यमेतदुदाहृतं प्रसीदंतु भवंतो मे ह्रीरेषा तु ममातुला ८ यदीदृशै
रहं विप्रैरुपस्थेयैरुपस्थितः किं करोमीति च मया व्याहृतं द्विजसन्निधौ ९ ॥

वृत्ते तेषां मुखाच्च्युतं वचनं श्रुत्वा शुश्रूषां वचनानुष्ठानलक्षणं शुश्रूषां कृत्वा मनसि कृत्वेत्य
र्थः चरणशुश्रूषामित्यपपाठः यदीदृशैरुपस्थेयैः अस्माभी रक्षणार्थं मत्पार्श्वमुपस्थितः
तरणार्थमिति शेषः एषा मम ह्रीः कीर्तिरतः प्रसीदंतु इत्यर्थः तीर्थस्तु मम एषा मे ह्री
रतः प्रसीदंतु इति व्याचष्टे किं करोमि किं करवाणीत्यर्थः लोडर्थे लडर्थः ९ रामाय

रा० आ०
२४

191

सर्व एवं समेत्योक्तैरित्याह सर्वैरिति सार्धैः ९ स्मस्मः त्वं त्रस्व तेः पीडाविषयेभ्यस्त्राहीति भवत्कर्तृयोगात्प्रथमस्य
रुषः पर्वकालेषु दर्शपूर्णमासेष्टिकालेषु ११ धर्षयंति अभिभवंति १२ गतिं त्रातारं १३ १४ तेनास्म
तित्क्रोधार्जिततपोव्ययभयेन १५ रक्षकस्त्वं भवेति शेषः त्वंनाथाः त्वंनाथो येषां ते १६ कार्त्स्न्येन

सर्वैरेवसमागम्यवागियंसमुदाहृता राक्षसैर्दंडकारण्ये बहुभिःकामरूपिभिः ९
अर्दिताःस्मभृशंरामभवान्नस्त्रातुतेभ्यः होमकालेतुसंप्राप्ते पर्वकालेषुचानघ ११ ध
र्षयंतिस्मदुर्धर्षाराक्षसाःपिशिताशनाः राक्षसैर्धर्षितानांचतापसानांतपस्विनां
१२ गतिंमृगयमाणानांभवान्नःपरमागतिः कामंतपःप्रभावेणशक्ताहंतुंनि
शाचरान् १३ चिरार्जितंनचेच्छामस्तपःखंडयितुंवयं बहुविघ्नंतपोनित्यंदुश्च
रंचैवराघव १४ तेनशापंनमुंचामोभक्ष्यमाणाश्चराक्षसैः तदर्द्यमानान्रक्षोभि
र्दंडकारण्यवासिभिः रक्षनस्त्वंसहभ्रात्रात्वन्नाथाहिवयंवने मयाचैतद्वचःश्रु
त्वाकार्त्स्न्येनपरिपालनं ऋषीणांदंडकारण्येसंश्रुतंजनकात्मजे संश्रुत्यचनशक्ष्या

कस्मात् तः पीडानिवर्तनेन चतुर्दशवर्षपर्यंतं पित्राज्ञयाराज्यभागेपि अग्रे राज्यसंबंधस्या
व्यपकत्वात् शरणागतरक्षणेऽस्मेवाधिकारः किंच तत्र ज्ञातेरेवास्य अधिकारो न तु राज्यपद
स्यास्येवेति तात्पर्यं संश्रुतं प्रतिज्ञातं जीवमानः जीवन् प्रतिश्रुतं प्रतिज्ञानं शक्ष्यामि इत्यत्र हेतुः
१७

२७

गें

191A

सत्यमिष्टमित्यादि १८ यस्मै कस्मा अपि प्रतिज्ञां प्रतिज्ञाय तत्त्यागः किं पुनर्ब्राह्मणेभ्य इत्यर्थः १९ अ
नुक्तेनापि ऋषिभिरिति कार्यमिति शेषः प्रतिज्ञाय कथं पुनर्न कार्यमिति शेषः स्नेहः प्रीतिः सौ
हार्दं शोभनहृदयता प्रीतेः सत्त्वामपि तादृशहृदयत्वाभावे एवमनुशासनादर्शनात्तुभयमुक्तं २० न

ज्ञामन्यथाकर्तुं सत्यमिष्टं हि मे सदा अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणां १८ न
न प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः तदवश्यं मया कार्यमृषीणां परिपालनं १९ अ
नुक्तेनापि वैदेहि प्रतिज्ञाय कथं पुनः मम स्नेहाच्च सौहार्दादिदमुक्तं त्वया वचः २० परि
तुष्टोस्म्यहं सीते न ह्यनिष्टोनुशास्यते सदृशं चानुरूपं च कुलस्य तव शोभने २१ सधर्मचा
रिणी मे त्वं प्राणेभ्योपि गरीयसी २२ इत्येवमुक्त्वा वचनं महात्मा सीतां प्रियां मैथिलराजपु
त्रीं रामो धनुष्मान्सह लक्ष्मणेन जगाम रम्याणि तपोवनानि २३ इत्यार्षे रामायणे आ
रण्यकांडे दशमः सर्गः १० अग्रतः प्रययौ रामः सीता मध्ये सुशोभना पृष्ठतस्तु धनुष्पा
णिर्लक्ष्मणोनुजगाम ह १ तौ पश्यमानौ विविधान्शैलप्रस्थान्वनानि च नदीश्च वि
विधा रम्या जग्मतुः सह सीतया २ रामायनम॰

ह्यनिष्टोनुशिष्यते यस्मिन्प्रीतिः
नास्ति नासावनुशिष्यते हितं नोपदिश्यत इत्यर्थः सदृशं तव स्नेहस्य वदुक्तं वच इति शेषः कुल
स्यानुरूपं २१ २२ २३ इति रामाभिरामे श्रीरामीये रा॰ ति॰ आ॰ दशमः सर्गः १० अग्रत इति १

जलजाः खगादात्मद्रादयः ३ यूथवंधानयूथरूपेणासंवंधात् एतनामिति षष्ठी विषाणिनो
रा॰ष्या॰ २५ मदिषा निसूतयः ४ दिवाकरे लंवमाने सायाह्न इत्यर्थः योजनायतं वनादित्त योजनायतं ५ प
द्मपुष्करसंवंधपद्मानि रक्तानि पुष्कराणि इंदीवरकाणि तैः संवाधः संमर्दो यस्मिन् पद्मानां पुष्करैर्जले स

192

सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः सरांसि च सपद्मानि युतानि जलजैः खगैः ३
यूथवधांश्च हृष्टांश्च मृदोन्मत्तान्विषाणिनः महिषांश्च वराहांश्च गजांश्च द्रुमवैरिणः
४ ते गत्वा दूरमध्वानं लंवमाने दिवाकरे ददृशुः सहिता रम्यं तटाकं योजनायतं ५
पद्मपुष्करसंवाधं गजयूथैरलंकृतं सारसैर्हंसकारंडवैः संकुलं जलजातिभिः ६
प्रसन्नसलिले रम्ये तस्मिन् सरसि शुश्रुवे गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते ७
ततः कौतूहलाद्रामो लक्ष्मणश्च महारथः मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ८
इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने कौतूहलं महज्जातं किमिदं साधु कथ्यतां ९
तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा प्रभावं सरसः कृत्स्नमाख्यातुमुपचक्रमे १० ॥

वाद्यानेवविधं यत्रतमिति कतकः गजयूथैरलंकृतं तीरेष्विति शेषः हंसा राजहंसाः कारंडवाः क
लहंसाः जलजातिभिः जले जातिर्जन्म येषां तैर्मत्स्यादिभिः ६ गीतवादित्रनिर्घोषो गीत
येन वाद्यघोषः न तु कश्चनेति गीतादिकर्तेत्यर्थः ७ धर्मभृतं नाम धर्मभृन्नामकं वा शरण

श्रीं

192A

पंचाप्सरसं क्रीडासाधनमात्ततं पंचाप्सरो नामवेनुप्रसिद्धं सर्वकालोदकपूर्णादिगुणकं सार्वकालिकं ११
अग्निरूपपुरोगमसहिताः साग्निपुरोगमाः सर्वे प्रव्यथितः अभूवन्ततः सर्वे प्रभुवन्नित्यर्थः १३ इति सं
विग्नमनसः भूवन्निति शेषः १४ ततउद्दिश्य सर्वदेवैस्तपो विघ्नाय नियोजिताः नियुक्ताः विष्फुचलितः

इदं पंचाप्सरो नाम तटाकं सार्वकालिकं निर्मितं तपसा राम मनिना मांडकर्णिना ११ स
हितेयेतपस्तीव्रं मांडकर्णिर्महामुनिः दशवर्षसहस्राणि वायुभक्षो जलाशये १२ त
तः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः अब्रुवन्वचनं सर्वे परस्परसमागताः १३ अस्मा
कं कस्यचित्स्थानमेष प्रार्थयते मुनिः इति संविग्नमनसः सर्वे तत्र दिवौकसः १४ ततः
कर्तुं तपो विघ्नं सर्वैर्देवैर्नियोजिताः प्रधानाप्सरसः पंच विद्युच्चलितवर्चसः १५ अप्स
रोभिस्ततः स्ताभिर्मुनिर्दृष्टपरावरः नीतो मदनवश्यत्वं देवानां कार्यसिद्धये १६ ताश्चैवाप्स
रसः पंच निवसंत्यो यथा स्वयं रमयंति तपो योगान्मुनिर्यौवनमास्थितं १७ तासां सं
क्रीडमानानामेष वादित्रनिःस्वनः श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः १८

वर्चसः वलितविघ्नकांतयः प्रधानाप्सरसः पंचेत्यनेन तत्परिवारभूतानसंख्याधिकास्ताः सूचिता
ताइति शेषः १५ दृष्टपरावरः दृष्टैहिकपारलौकिकधर्माधर्मः १६ निर्मितं तेनैव मुनिना
क्रीडार्थमिति शेषः १७ भूष तत्रैव निर्मिते गूढे तपोयोगात्पावने स्थितः १८ भूषणोन्मिश्रः

वचनं तद्दृष्ट्वाश्चर्यमिति जगाद १९ एवं कथयमानः आश्चर्यमित्येवं कथयन् ब्राह्म्या लक्ष्म्या ब्रह्मविद्यानां
ह्यानलक्ष्म्या ब्रह्मवर्चसेनेति यावत् २० प्रविश्याश्रममण्डलमित्यनुषंगः आश्रममण्डले उवासेति शेषः
रा॰ आ॰ २१ तद्वासप्रकारमाह एकस्याश्रमे इति शेषः अथ पर्यायेण सर्वेषामाश्रमान् जगाम २२ किंच ये॰
२६
193

आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः राघवः प्रतिजग्राह सह भ्रात्रा महायशाः १९ एवं
कथयमानः स ददर्शाश्रममण्डलं कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतं २० प्रविश्य सह
वैदेह्या लक्ष्मणेन च राघवः तदा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममण्डले २१ उषित्वा स सुखं
तत्र पूज्यमानो महर्षिभिः जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनां २२ येषामुषि
तवान्पूर्वं सकाशे स महास्त्रवित् क्वचित्परिदशान्मासानर्धमधिकं क्व
चित् अपरत्राधिकान्मासानर्धमधिकं क्वचित् अपरत्राधिकान्मा
सानर्धमधिकं क्वचित् त्रीन्मासानष्टमासांश्च राघवो न्यवस
त्सुखं तत्र संवसतस्तस्य मुनीनामाश्रमेषु वै २५ ॥ ॥

मासपूर्णेनमाश्रमी पूर्वमधिषितवान् पुनरपि तेषामाश्रमान् जगाम तद्वासातिशयात् यथास्वनीडाग
मे पुनरागमनं एकत्र वासाभावाद्देवास्क्वचिदिति परिदशान् दशान् परिगतान् दशाहं संख्योप
रिगतान् दशसंख्यान् मासानित्यर्थः २३ परान् वर्षे तोधिकान् एवमधिकामित्यादयोपि २४ २५

193A

रमतः रममाणस्य परिहृत्य सर्वमन्याश्रमान् अटित्वा परिवृत्येति पाठांतरं प्रतिश्रुत्येति पाठः पा
दः यतः पुनरागंतव्यमिति प्रतिज्ञाय गतोऽतः पुनराजगामेत्यर्थः २६ २७ उपासीनः समीपस्थः

रमतश्चानुकूल्येन ययुः संवत्सरा दश परिहृत्य च धर्मज्ञो राघवः सह सीतया २६ (क
पाकेय) सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह स तमाश्रममागम्य मुनिभिः परिपू
जितः २७ तत्रापि न्यवसद्रामः कंचित्कालमरिंदमः अथाश्रमस्थो विनयात्कदाचि
त्तं महामुनिं २८ उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् अस्मिन्नरण्ये भगवा
न्नगस्त्यो मुनिसत्तमः २९ वसतीति मया नित्यं कथाः कथयतां श्रुतं न तु जानामि
तं देशं वनस्यास्य महत्तया ३० कुत्राश्रमपदं पुण्यं महर्षेस्तस्य धीमतः प्रसादार्थं भगव
तः सानुजः सह सीतया ३१ अगस्त्यमधिगच्छेयमभिवादयितुं मुनिं मनोरथो मह
नेष हृदि संपरिवर्तते यदहं तं मुनिवरं शुश्रूषेयमपि स्वयं इति रामस्य स मुनिः श्रु
त्वा धर्मात्मनो वचः ३३ सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजं अहमप्येतदेव त्वां
वक्तुकामः सलक्ष्मणं ३४ अगस्त्यमभिगच्छेति सीतया सह राघवः दिष्ट्या त्विदानीं

२९ कथां कथयतां सकाशादिति शेषः ३० ३१ ३२ मनोरथाभिनयो यदहमित्यादि ३३ एत
देवेत्यादि अगस्त्यमित्यादि ३४ अस्मिन्नर्थे मदुपदिदिक्षितार्थे ३५ ॥ ॥

योजनान्याश्रमादस्मात्तथा चत्वारि वै ततः इति कतकपाठे अस्मादाश्रमाद्योजनादभ्यधिकं चत्वारि
रा०आ० योजनानि इत्यर्थः दक्षिणेन गंतव्यानीति शेषः ततस्तत् भ्रातुराश्रम इत्यर्थः पाठांतरे तु चतुर्योजनो
११ तरमिति सम्बन्ध एवार्थः ३६ तदाश्रमं विज्ञस्थलीप्रायवचनोद्देशानादि ३७ तत्रागस्त्यभ्रात्राश्रम इत्यथवा
194

अथ माण्डव्यमिते राम यत्रागस्त्यो महामुनिः योजनान्याश्रमात्तात याहि चत्वारि वै ततः दक्षि
णेन महाच्छ्रीमान् अगस्त्यभ्रातुराश्रमः ६३ स्थलीप्राये वनोद्देशे पिप्पलीवनशोभिते बहु
पुष्पफले रम्ये नानाविहगनादिते ३७ पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः हंस
कारंडवाकीर्णाः चक्रवाकोपशोभिताः तत्रैकां रजनीमुष्य प्रभाते राम गम्यतां दक्षिणां
दिशमास्थाय वनखंडस्य पार्श्वतः ३८ तत्रागस्त्याश्रमपदं गत्वा योजनमंतरं रमणीये व
नोद्देशे बहुपादपशोभिते ४० रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह स हि रम्यो वनो
७ द्देशो बहुपादपसंयुतः ४१ यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिं अद्यैव गमने बुद्धिं रो
चयस्व महामते इति रामो मुनेः श्रुत्वा सह भ्रात्राभिवाद्य च प्रतस्थेऽगस्त्यमुद्दिश्य सा

हेति अगस्त्यनामगस्त्यः प्राग् इल्वलवातापीये मेषतव्रतौ यस्मात् हठच्युतो जातः इध्मवाहात्मजो
मुनिरिति भागवते तद्देवरावस्यतोत्पत्तिरिति न्यायेनेत्येके ३६ दक्षिणां दिशमायोजनमंत १५
रं अथवा काशागत्वा तत्रागस्त्याश्रमं द्रक्ष्यसि ४० मुनेः श्रुत्वेति वचनमिति शेषः ४२ ॥

194A

मार्गवशादनुगान्मार्गवशात्प्राप्तान् ४४ ४५ ४६ नूनमेतदेवेत्यत्र हेतुमाह यथाहीति यथायथाह
शाखिनः वृतयावनं स्थं तथैवास्य फलभारेण पुष्पभारेण च संनताः सहस्रशो द्रुमाः ज्ञाताः ज्ञा
यमानो वर्तते ४७ असाधारणलिंगान्तरमेवमेवाह पिप्पलीनामिति पिप्पलीफलानामित्यर्थः

पश्यन् वनानि चित्राणि पर्वतांश्चाभ्रसन्निभान् सरांसि सरितश्चैव पथि मार्गवशानुगान् ४४
सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखं इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ४५ एतदे
वाश्रमपदं नूनं तस्य महात्मनः अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ४६ यथाही
मे वनस्यास्य ज्ञाताः पथि सहस्रशः संनताः फलभारेण पुष्पभारेण च द्रुमाः ४७ पिप्पली
नां च पक्वानां वनादस्मादुपागतः गंधोयं पवनोत्क्षिप्तः सहसा कटुकोदयः ४८ तत्र तत्र
च दृश्यन्ते संक्षिप्ताः काष्ठसंचयाः लूनाश्च परिदृश्यन्ते दर्भा वैडूर्यवर्चसः ४९ एतच्च वनम
ध्यस्थं कृष्णाभ्रशिखरोपमं पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ५० विविक्तेषु च
तीर्थेषु कृत्वा स्नानं द्विजातयः पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः ५१ ततः सुती
क्ष्णवचनं यथा सौम्य मया श्रुतं अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ५२ ॥

कटुकोदयः कटुकरसंबंधुरुदयः ४८ ४९ कृष्णाभ्रं नीलाभ्रं शिखरं पर्वतशिखरं चोपमा यस्य
५० विविक्तेषु निर्मलेषु एकांतेषु च स्वयमेवार्जितैः देव
पूजार्थमिति शेषः ५१ ५२ ॥ राम

मृत्युं तत्तुल्यं दैत्यं संहारणेन वा समयोगपा लोकानां ५३ कोसौ मृत्युस्तस्योद्धरी योगात्मेन निसृष्टीतो लोकर
रा॰ व्या॰ त्रणायेत्यतस्तद्व्याख्यापिकामाह इदेति वनेऽस्यर्थः एकदा कस्मिंश्चित्पूर्वकाले ५४ ब्राह्मणरूपं ब्रा
२८ ह्मणसदृशावेषं संस्कृतं वस्त्रं ब्राह्मणवदिति विशेषः एतदुभयं विश्वासार्थं ५५ संस्कृतं कृत्वा श्राद्धे वि

195

निमंत्रयत स्मात्मृत्युं लोकानां हितकाम्यया घृणश्चात्राकृतेषुं दिक् शारणपाठ एव कर्मणा ५३
१ इहैकदा किल क्रूरो वातापिरपि चेल्वलः भ्रातरौ सहितौ वास्तां ब्राह्मणघ्नौ महासुरौ ५४ धार
यन्ब्राह्मणं रूपं इल्वलः संस्कृतं वदन् आमंत्रयति विप्रान्स श्राद्धमुद्दिश्य निर्घृणः ५५ भ्रा
तरं संस्कृतं कृत्वा ततस्तं मेषरूपिणं तान्द्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा त
तो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् वातापे निःक्रमस्वेति स्वरेण महता वदन् ५७ त
तो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् भित्वा भित्वा शरीराणि ब्राह्मणानां विनिष्पतत् ब्रा
ह्मणानां सहस्राणि तैरेवं कामरूपिभिः विनाशितानि संहत्य नित्यशः पिशिताशनैः ५९
अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा अनुभूय किल श्राद्धे भक्षितः स महासुरः ६० ॥

तपाकसंस्कारसंस्कृतं कृत्वा ५६ मेषवन्नदन्मृतसंजीवनीवैभवादुदरांतरिति विशेषः विनिष्पतत्
विनिर्गतवान् अड्भावश्चार्षः ५८ संहत्य समेत्य ५९ प्रार्थितेन प्रार्थितास्तु रद्दयसंहारेण महर्षि २८
णागस्त्येन श्राद्धे श्राद्धव्यापारमनुभूय भक्षित इति सोऽसुरो वातापिः ६० ॥ राम

195 A

ततस्त्वल्वलः श्राद्धांतेसंपन्नमित्युक्त्वाद्धस्तोदकंचदत्त्वाभ्रातरंनिष्क्रमस्वेत्यभ्यभाषत ६१ ६२ मया

ततःसंपन्नमित्युक्त्वादत्त्वाहस्तेवनेजलं भ्रातरंनिष्क्रमस्वेतिइल्वलःसमभाषत ६१ सत
दाभाषमाणंतभ्रातरंविप्रघातिनं अब्रवीत्प्रहसन्धीमानगस्त्योमुनिसत्तमः ६२ कुतोनि
ष्क्रामितवाशक्तिर्मयाजीर्णस्यरक्षसः भ्रातुस्तमेषरूपस्यगतस्ययमसादनं ६३ अथतस्य
वचःश्रुत्वाभ्रातुर्निधनसंश्रितं प्रधर्षयितुमारेभेमुनिंक्रोधान्निशाचरः ६४ सोभ्यद्रवद्
द्विजेंद्रंतंमुनिनादीप्ततेजसा चक्षुषानलकल्पेननिर्दग्धोनिधनंगतः ६५ तस्यायमाश्र
मोभ्रातुस्तस्यकवनशोभितः विप्रानुकंपयायेनकर्मेदंदुष्करंकृतं ६६ एवंकथयमा
नस्यतस्यसौमित्रिणासह रामस्यास्तंगतःसूर्यःसंध्याकालोभ्यवर्तत ६७ उपास्यप
श्चिमांसंध्यांसहभ्रात्रायथाविधि प्रविवेशाश्रमपदंतमृषिंचाभ्यवादयत् ६८ स
म्यक्प्रतिगृहीतस्तुमुनिनातेनराघवः न्यवसत्तांनिशामेकांप्राश्यमूलफलानि
च ६९ तस्यांरात्र्यांव्यतीतायामुदितेरविमंडले भ्रातरंतमगस्त्यस्यआमंत्रयतराघवः ७०
अभिवादयेत्वांभगवन्सुखमस्युषितोनिशां आमंत्रयेत्वांगच्छामिगुरुंतेद्रष्टुमग्रजं
गम्यतामितितेनोक्तोजगामरघुनंदनः यथोद्दिष्टेनमार्गेणवनंतच्चावलोकयन् ७२

जीर्णस्यभक्षितेनिःशेषः ६३ प्रधर्षयितुंहिंसितुं ६४ चक्षुषाचक्षुर्वीक्षणेनअनलकल्पेनाग्नि

वि

निवारान् जलकदंबान्ः वंजुलोऽशोकः तिनिशः स्पंदनः चिरिविल्वो नक्तमालः ७३ ७४ ७५ यथा
क्षांताः स्निग्धाः स्निग्धपत्रा वृक्षा दृश्यंत इति शेषः अतो निकटस्थ आश्रमः ७७ अगस्त्यविंध्यस्तंभयतीत्य

रा॰आ॰
९६

निवारान्पनसान्सालान्वंजुलांस्तिनिशांस्तथा चिरिविल्वान्मधूकांश्च विल्वानथच तिंदु
कान् ७३ पुष्पितान्पुष्पिताग्राभिर्लताभिरुपशोभितान् ददर्श रामः शतशस्तत्र कांतारपादे
पान् ७४ हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् मत्तैः शकुनिसंघैश्च शतशः प्रतिना
दितान् ७५ ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः पृष्ठतोनुगतं वीरं लक्ष्मणं लक्ष्मिवर्ध
नं ७६ स्निग्धपत्रा यथा वृक्षा यथा क्षांता मृगद्विजाः आश्रमो नातिदूरस्थो महर्षेर्भावितात्
मनः ७७ अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा आश्रमो दृश्यते तस्य परि
श्रांतश्रमापहः ७८ प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः प्रशांतमृगयूथश्च ना
नाशकुनिनादितः ७९ निगृह्य तरसा मृत्युं लोकानां हितकाम्यया दक्षिणा दिक्कृ
ता येन शरण्या पुण्यकर्मणा ८० ॥

२८

गस्त्यः पृषोदरादिः स्वेन कर्मणा विंध्यस्तंभनकर्मणा प
रिश्रांतश्रमापहंता ७८ प्राज्यैर्भूरिभिर्धूमैः पाकयज्ञधूमैराकुलं वनं यस्मिन् ७९ ८० ॥

यस्य प्रभावाद्राक्षसैरियमगस्त्याश्रमपदेशावर्तिनी दक्षिणा दिग्वाट् दृश्यते केवलं त्रासात् रक्षोभिर्भी
त्या नोपभुज्यते न स्वदेशत्वेनाङ्गीक्रियत इत्यर्थः ८१ निर्वैराः प्राणिषु वैररहिताः प्रशान्ताः स्वकर्तृ
त्वकर्माणः ८२ भगवतोगस्त्यस्य महिम्ना प्रदक्षिणा एतदाश्रमाविच्छेदेन निर्वैरत्वादिसंपादनसा
मर्थ्यात् क्रूरकर्मभीरक्षोभिर्दुर्धर्षा नोनाम्ना च नाम्नापि संप्रदायदिगेव दक्षिणेति त्रिषु लोकेषु प्र-

तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ८१ य
दाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ८२
नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः
८३ मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः संदेशं पालयंस्तस्य विन्ध्यशैलो न वर्धते ८४
अयं दीर्घायुषस्तस्य लोके विख्यातकर्मणः अगस्त्यस्याश्रमः श्रीमान् विनीतमृगसेवि
तः ८५ एष लोकार्चितः साधुर्हिते नित्यं रतः सतां अस्मानधिगतानेष श्रेयसा योजयि
ष्यति आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिं शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्र
भो ८६ ॥

थिता ८३ मेरुस्पर्धया भास्करमार्गं निरोद्धुं वर्धितकामोप्यचलो विंध्योगस्त्यस्य संदेशं
मदागमनपर्यंतमावर्धस्वेत्येवमाज्ञां पालयन्न वर्धते त्याद्यापि तिष्ठतीत्यर्थः ८४ ८५ अधिगतान् स्वाश्र
मं प्राप्तान् श्रेयसा योजयिष्यति दिव्यशास्त्रादिदानेनेति गम्यते भिसंधिः ८६ प्रभो स्वगुणसमर्थे

८८ क्रूरो निर्दयः शठो मृदुविप्रियकारी नृशंसो घातकः तथाविधः ई हेतामहिस्रः ८९ पतंगा ग
रुडादयः धर्मं स्वर्गादिजनकं ९० अत्र आश्रमे सिद्धाः तपःसंतिघोषः नवैर्देहै दिव्यदेहैः ९१ अत्राश्र

रा॰ आ॰
२१
197

न२

अत्र देवाः सगंधर्वाः सिद्धाश्च परमर्षयः अगस्त्यं नियताहाराः सततं पर्युपासते ८८ नात्र जी
वेन्मृषावादी क्रूरो वा यदि वा शठः नृशंसः पापवृत्तो वा मुनिरेष तथाविधः ८९ अत्र दे
वाश्च यक्षाश्च नागाश्च पतगैः सह वसंति नियताहारा धर्ममाराधयिष्णवः ९० अत्र सि
द्धा महात्मानो विमानैः सूर्यसन्निभैः त्यक्त्वा देहान्नवैर्देहैः स्वर्याताः परमर्षयः ९१ यक्ष
त्वममरत्वं च राज्यानि विविधानि च अत्र देवाः प्रयच्छंति भूतैराराधिताः शुभैः ९२ आ
गताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः निवेदयेह मां प्राप्तमृषये सह सीतया ९३ इत्या ॥
र्षे रामायणे आरण्यकांडे एकादशः सर्गः ११ स प्रविश्याश्रमपदं लक्ष्मणो राघवानु ॥
जः अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह १ राजा दशरथो नाम ज्येष्ठस्तस्य सुतो
बली रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया २ ॥

॥ ॥ श्रीरामः

मे भूतैः प्राणिभिः कर्तृभिः शुभैः सत्कर्मभिराराधिता देवादय आश्रममाहात्म्यादल्पकालेनैव
राज्यादीनि प्रयच्छंतीत्यर्थः ९२ ९३ इत्यारण्ये रामाभिरामे श्रीरामीये रामायणतिलके एकाद

२१

197A

स्थितः शुभकारी अनुकूलस्तदिच्छावशवर्त्ति सर्वविषयानुरागो भक्तिस्तद्वान् भक्तः यदीति संभा
वनायां वहुदिनैर्वनेवासादस्माकं वरणं तवापि संभावितमित्यर्थः ३ भगवंतं द्रष्टुमिच्छामहे तेनोद
दीनार्थमागताः इति निवेद्यतामित्यर्थः ४ अग्निशरणमग्निहोत्रगृहं गत्वा निवेदयितं ५ श्रे

लक्ष्मणो नाम तस्याहं भ्राता त्ववरजोऽस्थितः अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ३ ते
वयं वनमत्युग्रं प्रविष्टाः पितृशासनात् द्रष्टुमिच्छामहे सर्वे भगवंतं निवेद्यतां ४ तस्य
तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः तथेत्युक्त्वाग्निशरणं प्रविवेश निवेदितुं ५
स प्रविश्य मुनिश्रेष्ठं तपसा दुःप्रधर्षणं कृतांजलिरुवाचेदं रामागमनमंजसा ६ य
थोक्तं लक्ष्मणेनैव शिष्योगस्त्यस्य संमतः पुत्रो दशरथस्यैषो रामो लक्ष्मण एव च ७
प्रविष्टावाश्रमपदं सीतया सह भार्यया द्रष्टुं भवंतमायातौ शुश्रूषार्थमरिंदमौ य
दत्रानंतरं तत्वमाज्ञापयितुमर्हसि ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणं ९

जसा शीघ्रं ६ संमतः इष्टः ७ द्रष्टुं तदनंतरं किं यत्कालं शुश्रूषार्थं चागतौ ८ अनंतरं तदं
वक्तव्यं तत्वं उपस्थितं भगवदागमनं श्रवणानंदमनुभूयेत्यर्थ इति तीर्थः ९ ॥

रा॰ आ॰ मां द्रष्टुं समागत इति यतो हि दिष्ट्या मम सभाग्येन किंचांतर्भवित एपर्यो हशि: मामात्मानं दर्शयितुं यत्न
११ वैनेव मनश्चिरस्य चिरकालस्यागमनेऽप्यागतस्तत दिष्ट्या मत्संयोगेनामृतेनेत्यर्थः १० तदेवाह मन
198 सेति एतद्रागमनमत्सहितपकांक्षितं इच्छाकृते तेनियावत्सत्कृतः आचारोपचारव्यवहारैरित्यर्थः
११ किमसौ न प्रवेशितः कस्माद्धेतोर्विलंबः कृत इत्यर्थः १२ अभिवाद्य आगमन नियोग प्रयुक्त

वैदेहीं च महाभागामिदं वचनमब्रवीत् दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः १० म
नसा कांक्षितं ह्यस्य मयाप्यागमनं प्रति गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः ११
प्रवेश्यतां समीपं मे किमसौ न प्रवेशितः एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना १२ अ
भिवाद्याब्रवीच्छिष्यस्तथेति नियतांजलिः तदा निष्क्रम्य संभ्रांतः शिष्यो लक्ष्मणमब्रवीत्
कोऽसौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयं ततो गत्वाश्रमपदं शिष्येण सह लक्ष्मणः १४ दर्श
यामास काकुत्स्थं सीतां च जनकात्मजां तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन् १५

पुनरभिवादनं कृत्वा तथेति आनयामीत्येवं १३ स्वयं प्रविशतु भगवतावरोतहृतां तत्रात्रास्य शिष्य
मत्वापेतेति भावः आश्रमपदं आश्रमप्रांतदेशं १४ लक्ष्मणः काकुत्स्थं रामं दर्शयामास शिष्य
मितिशेषः तद्द्रष्टुं रामं शिष्यः अगस्त्यवचनं उच्यत इति वचनं अगस्त्योक्तं वाक्यं प्रश्रितं प्रीतिप्र २१
कं ब्रुवन् प्रावेशयदित्यन्वयः १५ ॥

198A

सुसत्कृतं पाद्यार्घ्यादिभिरागत्यामार्गप्रदर्शनेन च सत्कृतं १६ आगत्याश्रमस्य देवतास्थानद
र्शनमाह सतत्रेति तत्राश्रमे स रामः ब्रह्मणो हिरण्यगर्भस्य कल्पितस्थानं अग्निरत्र रुद्रः भगः
सूर्यमंडलाभिमानी १७ १८ धाता कार्यप्रजापतिः विधाता विश्वकर्मेति कतकः १९ गाय

प्राविशायद्यस्यान्यायं सत्कारार्हः सुसत्कृतं प्रविवेश ततो रामः सीतया सह लक्ष्मणः १६
प्रशांतहरिणाकीर्णमाश्रमं ह्यवलोकयन् सतत्र ब्रह्मणःस्थानं मग्नेःस्थानं तथैव च १७
विष्णोःस्थानं महेंद्रस्य स्थानं चैव विवस्वतः सोमस्थानं भगस्थानं स्थानं कौवेरमेव च धा
तुर्विधातुःस्थानं च वायोःस्थानं तथैव च स्थानं च पाशहस्तस्य वरुणस्य महात्मनः १९
स्थानं तथैव गायत्र्याः वसूनां स्थानमेव च स्थानं च नागराजस्य गरुडस्थानमेव च २० का
र्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् २१
तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसं अब्रवीद्वचनं वीरो लक्ष्मणं लक्ष्मिवर्द्धनं २२

त्रीसरस्वतीसावित्र्योरप्युपलक्षणं २० एषां स्थानानि पश्यतीत्यन्वयः एतेन पूज्यस्थानं एता
वता देवानां पूजा च प्रकीर्तिता सूचितं अभिनिष्पतत् अवभासमानः आर्षः अभ्युत्थानेन कृतवा
नित्यर्थः २१ मुनीनामग्रतः स्थितमिति शेषः ईदृशं तं मार्गसंदर्शी ददर्शेत्यन्वयः २२ ॥

श्री
रा॰ आ॰
३२
199

औदार्येणानेनोविशेषं ज्ञापितवानौचित्येन २३ एवमगस्त्यमुक्त्वा लक्ष्मणं प्रतिबोधयित्वा आयनतः आश्रमाद्
गच्छतः तस्य ऋषेः पादौ जग्राह हस्ताभ्यां मूर्ध्ना च पादौ स्पृष्ट्वा नमश्चकारेत्यर्थः २४ योगमहिम्ना रामश
ब्द्वद्याप्रीनतःकृत्य २५ प्रतिगृह्य उपस्थापनपूर्वमालिंगनेत्यर्थः २६ अग्निं तु वैश्वदेवं विस्तरेण दैवाग्निमिति
वैश्वदेवहोमं कृत्वेत्यर्थः अतिथीन् रामादीन् २७ आसीनं पश्चादासीनमित्यर्थः इति प्राचः मम तु भाति

वहिर्लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः औदार्येणावगच्छामि निधानं तपसामिदं २३ एव
मुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसं जग्राहापततस्तस्य पादौ च रघुनन्दनः २४ अभिवाद्य तु
धर्मात्मा तस्थौ रामः कृताञ्जलिः सीतया सह वैदेह्या तदा रामः सलक्ष्मणः २५ प्रतिगृह्य च का
कुत्स्थमर्चयित्वासनोदकैः कुशलप्रश्नमुक्त्वा च आस्यतामिति सोऽब्रवीत् २६ अग्निं हुत्वा प्रदा
यार्घ्यमतिथीन् प्रतिपूज्य च वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ २७ प्रथमं चोपविश्याथ
धर्मज्ञो मुनिपुंगवः उवाच राममासीनं प्राञ्जलिं धर्मकोविदं अन्यथा खलु काकुत्स्थ तपस्वी स
मुदाचरन् दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् २९

प्रथममिति भोजनं ददावित्यनेनान्वेति अथोपविश्य अतिथिपूजानन्तरं यातावत्पर्यन्तमनुप्रवेश
नमिति २८ एवं तत्रिविधपूजानन्तरं वितेत्याशंक्य समाधिस्थः महात्मा धर्ममुवाचेत्याह अन्यथेति अ ३२
न्यथा समुदाचरन् एवमतिथिपूजनमकुर्वन्नित्यर्थः दुःसाक्षी कूटसाक्षी एवं च प्रत्यवायपरि
हारायैवमतिथिपूजावश्यकीत्याशयः २९ ॥

199A

तदर्थिको तिथिश्च नास्तीत्याह राजन्नेति सर्वलोकनियंतृत्वेनेश्वरत्वं गमितं धर्मचारी धर्माचरणे
नतत्परत्वं तेन ईदृशानामपि प्रियातिथिः सन् प्राप्तोतः पूजनीयो मान्यश्च मान्यत्वेनेतः परं त्वमेवास्माक
माराधनीय इति सूचितम् ३० ३१ हेम्ना वज्रेण च भूषितं वैस्त्रवमिति परम्परामात्रस्थेनावरु
णादस्मदत्तं यज्ञमेण तदेव वरुणालस्यदाय महेंद्राग्नस्मै निदिष्टवानिति कतकः योगेन महेंद्रः

राजा सर्वस्य लोकस्य धर्मचारी महायशाः पूजनीयश्च मान्यश्च भवानाप्तः प्रियातिथिः ३०
एवमुक्त्वा फलैर्मूलैः पुष्पैश्चान्यैश्च राघवं पूजयित्वा यथाकामं ततोगस्त्यस्तमब्रवीत् ३१
इदं दिव्यं महच्चापं हेमवज्रविभूषितं वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ३२ अ
मोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः दत्तो मम महेंद्रेण तूणी चाक्षयसायकौ ३३ सं
व ५ पूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः महारजतकोशोयमसिर्हेमविभूषितः अ
नेन धनुषा राम हत्वा संख्ये महासुरान् आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसां ३५
तद्धनुस्तौ च तूणी च शरं खड्गं च मानद जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ३६

पदेनानात्र वरुणप्रवेशस्मे ३२ ब्रह्मणा दत्तो ब्रह्मदत्तस्तदा ख्यास्त्रत् तूणी चेति चेन धनुःशरयो
रुभयोरिंद्राद्दत्तत्वं गम्यते ३३ महारजितं सुवर्णं हेमविभूषितोस्य च्छिद्रेशो ३४ ३५ वज्रं वा
ज्रधरो यथेत्यनेन तदीयमेव त्वया स्वीक्रियत इति ध्वनितं ३६ ॥ राम

रा·अ·
२२
200

वराग्रहंवरस्यविसीरायुधंजनमायुधंच ३२ इत्यार्षेरामायणेतिलकेद्वादशःसर्गः १२ रामप्रीतोस्मि
लक्ष्मणत्वयिचपरितुष्टोस्मिरामसेवातत्परत्वेनपरितोषःभगवद्विषयप्रीतेरेवभक्तित्वेननवबद्धकोहमि
तिध्वनितं स्मर्तव्यमिति आस्तीलीढिमध्यमपुरुषद्विवचनं १ अथश्रमेणाश्रधरामनादिप्रयुक्तखेदादिका
र्यकारीश्रमःखेदोदुःखंप्रवृत्तश्रमस्तज्जंदुःखंवाधतेमैथिलीमितिशेषःअतएवैयव्यक्तमस्वकेटनेक

एवमुक्त्वामहातेजाःसमस्तंतद्रघूत्तमं दत्वारामस्यभगवानगस्त्यःपुनरब्रवीत् ३२ इत्यार्षेश्रीरा
मायणेआर·द्वादशःसर्गः १२ रामप्रीतोस्मिभद्रंतेपरितुष्टोस्मिलक्ष्मण अभिवादयितुंयन्मां
मांप्राप्तौस्थःसहसीतया १ अध्वश्रमेणवांखेदोबाधतेप्रचुरश्रमः व्यक्तमुत्कंठतेवापिमैथिली
जनकात्मजा २ एषाचसुकुमारीचदुःखैश्चनविमानिता प्राज्यदोषंवनंप्राप्ताभर्तृस्नेहप्रचो
दिता ३ यथैषारमतेरामइहसीतातथाकुरु दुष्करंकृतवत्येषावनेत्वामभिगच्छती ४ एषाहि
प्रकृतिःस्त्रीणामासृष्टेरघुनंदन समस्थमनुरज्यंतेविष
मस्थंत्यजंतिच ५ ॥ राम

विद्विग्यांतर्ये इतिशेषः १ नविमानिताइतःप्राक् कदापिनपीडितावैदेःखेदजनकैःदुःखैरितिप्राचे
तरंप्राज्यदोषंप्रभूतदोषं ३ ४ दुष्करत्वप्रतिपादनशेषतयालोकव्यवहारमाह एषेतिआसृष्टेःसृष्टिमा
रभ्यसमस्थंधनधान्यादियुक्ततयासम्यगवस्थितं विषमस्थंदारिद्र्यरोगादिग्रस्तं ५ राम

200A

एकत्रानवस्थानादिधर्मकतां चलमनुगच्छन्ति वद्धकालागतस्नेहं वंधच्छेदेन शस्त्रतैक्ष्ण्यानुगतः
नियकार्यकरणे वाय्वादिशैघ्र्यमनुगमः ६ श्लाघ्या दोषराहित्येन सर्वैः कर्तृणां संपदाम सज्जिः प्रशंस
नीया व्यपदेश्या पतिव्रतासु अग्रगण्या ७ अयं देशो मदाश्रमरूपः आगमनमात्रेणालंकृतः हे रा

गतक्लमानां लोलत्वं गुणास्त्याणां तीक्ष्णतां तथा गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः
६ इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता श्लाघ्या च व्यपदेश्या च यथा देवी ह्यरुन्धती ७
अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह वैदेह्या चानया राम वत्स्यसि त्वमरिंदम ८ एव
मुक्तस्तु मुनिना राघवः संयताञ्जलिः उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलं धन्यो
स्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगवः गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति ९
किं तु व्यादिश मे देशं सोदकं बहुकाननं यत्राश्रमपदं कृत्वा वसेयं निरतः सुखं ११ ततो
ब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितं ध्यात्वा मुहूर्तं धर्मात्मा ततो वाचं वचः शुभं १२
इतो द्वियोजने तात बहुमूलफलोदकः देशो बहुमृगः श्रीमान् पंचवट्यभिविश्रुतः त
त्र गत्वाश्रमपदं कृत्वा सौमित्रिणा सह रमस्व त्वं पितुर्वाक्यं यथोक्तमनुपालय १४

मपत्र देशोऽतः परं वत्स्यसि सालंकृतो भविष्यतीति किं वक्तव्यमित्यर्थः ८ किं तु किंचिद्वक्तव्य
मस्तीत्यर्थः व्यादिश बोधय यत्राश्रमपदं वासस्थानं निरतः प्रीतः ११ ध्यात्वा वाम्मीचिंत देशमिति शे
षः तत उवाचेत्यर्थे संधिरार्षः १२ तत्र पंचवटसमूहसत्वात्पंचवटीति नाम्नाभिविश्रुतः प्रसिद्धः
१४

रा॰ आ॰ एषवृत्तांतः पितृवचनपरिपालनायवनवासरूपः तवस्नेहतपसः प्रभावेनचविदितः नोदितः स्वगयवृत्तांतो
२४ तपसाज्ञातोयतनेकस्थितः दशरथस्यचवृत्तांतः कैकेयीवशात्प्राणत्यागादिरूपस्तत्तएवमेविदितः १५ यदिद
201 वासप्रतिज्ञाय आराधयिष्याद्दं अगस्त्यंतंमहात्मानं शेषंचवनवासस्यसौम्यवत्स्याम्यहमितिअनेनमम
समीपेइहमदाश्रमेवासंप्रतिज्ञायपुनर्मांप्रतिव्यादिशामेवासमित्येतद्दर्शितंन्मूलंनेहृदयस्थंछंदअभिप्रा

विदितोह्येषवृत्तांतोममसर्वस्तवानघ तपसश्चप्रभावेनस्नेहाद्दशरथस्यच १५ हृदयस्थश्चते
छंदोविज्ञातस्तपसामया इहवासंप्रतिज्ञायमयासहतपोवने १६ अतश्चत्वामहंब्रूमिगच्छ
पंचवटीमिति सहिरम्योवनोद्देशोमैथिलीतत्ररंस्यते १७ सदेशः श्लाघनीयश्चनातिदू
रेचराघव गोदावर्याः समीपेचमैथिलीतत्ररंस्यते १८ प्राज्यमूलफलश्चैवनानाद्विजगणा
युतः विविक्तश्चमहाबाहोपुण्योरम्यस्तथैवच १९ ॥ राम ॥

योमयात्वात्तंअत्रावस्थानेप्रतिज्ञातंतत्सर्वंपुनर्निर्वाह्योनभवति अत्रागत्यसागमनाभावादित्येवंरूपः २४
तिभावः १६ अतस्त्वदभिप्रायज्ञानोऽत्रापिपंचवटींगच्छेतिब्रूमिब्रवीमिनतुशिष्टव्यवहारोचितमपीदृतिहृ
तिब्रवीमित्यर्थः तद्वनार्थवादमाह सहीति १७ विविक्तः एकांतः पुण्यः पुण्यजनकोरम्याद्दृष्टिमनसोः
१९

201A

परिरक्षितो शाक्तस्तापसानामितिशेषः भवानपीत्यनेन स्वस्यामितापसरक्षणसामर्थ्यंबो
धनेन स्वाश्रमेरात्तसापीडसहविताअत्रपंचवट्याश्रमे पालयिष्यसि प्रतिज्ञातपालननिर्वा
हं करिष्यसि २० अस्य मधुकवनस्योत्तरेणोत्पन्नः न्यग्रोधतडपलक्षितमाश्रमं गच्छता २२

भवानपि सदाचारः शक्तश्च परिरक्षितो अपि चात्र वसन्नाम तापसानुपालयिष्या
ति २० एतदालक्ष्यते वीर मधूकानाम महावनं उत्तरेणास्य गंतव्यं न्यग्रोधमपि गच्छ
तो २१ ततः स्थलमुपारुह्य पर्वतस्याविदूरतः ख्यातः पंचवटीत्येव नित्यपुष्पित
काननः २२ अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह सत्कृत्यामंत्रयामास त
मृषिं सत्यवादिनं २३ तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवंदनौ तमाश्रमं पंचवटीं
जग्मतुः सहसीतया २४ गृहीतचापौ तु नराधिपात्मजौ विषक्ततूणीसमरेष्वका
तरौ यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पंचवटीं समाहितौ २५ इत्यार्षे रा॰ आ॰
त्रयोदशः १३ अथ पंचवटीं गच्छन्नंतरा रघुनंदनः आससाद महाकायं गृध्रं भीम

स्थलं निर्वणं देशं उपारुह्य प्राप्य कस्यचित्पर्वतस्याविदूरतः समीपतः पंचवटीत्येव ख्यातो दे
शः २२ सत्कृत्य प्रदक्षिणनमस्कारादिभिः २३ विषक्ते तूणीयुयोस्ते पूर्वपदे प्रवतं २५
इत्यारण्ये रामायणे त्रयोदशोऽध्यायः १३ अथांतरा मध्ये १ राम

तंपक्षिणंपक्षिणंमेनातेविज्ञातवंतौ तंराक्षसंब्रुवाणौपरस्परंकथयंतौकोभवानितिपप्रच्छतुरितिशेषः
रा०आ० आत्मनःपितुःश्रीरामस्यतवपितुरित्यर्थः ३४ वचने वंशनामप्रश्नविषयकवचनमित्यर्थः स्वात्मति
२५

202

तेदृष्ट्वातौमहाभागौवनस्थंरामलक्ष्मणौ मेनातेराक्षसंपक्षिब्रुवाणौकोभवानिति २ सतौ
मधुरयावाचासौम्ययाप्रीणयन्निव उवाचवत्समांविद्धिवयस्यंपितुरात्मनः ३ सतंपितृसखं
मत्वापूजयामासराघवः सतस्यकुलमव्यग्रमथपप्रच्छनामच ४ रामस्यवचनंश्रुत्वाकुल
मात्मानमेवच आचचक्षेद्विजस्तस्मैसर्वभूतसमुद्भवं ५ पूर्वकालेमहाबाहोयेप्रजापतयो
भवन् तान्मेनिगदतःसर्वानादितःशृणुराघव ६ कर्दमःप्रथमस्तेषांविकृतस्तदनं
तरः शेषश्चसंश्रयश्चैवप्रचेताःपुलहस्तथा ७ स्थाणुर्मरीचिरत्रिश्चक्रतुश्चैवमहाबलः
पुलस्त्यश्चांगिराश्चैवबहुपुत्रश्चवीर्यवान् ८ दक्षोविवस्वानपरोरिष्टनेमिश्चराघव कश्य
पश्चमहातेजास्तेषामासीच्चपश्चिमः ९ प्रजापतेस्तुदक्षस्यबभूवुरितिविश्रुतः षष्टिर्दुहि
तरोरामयशस्विन्योमहायशाः १० ॥

कथनप्रसंगात्सर्वभूतसमुद्भवमाचचक्षेत् २५
त्यर्थः आत्मानमात्मनामेवेत्यर्थः ५ पूर्वकालेब्रह्मणोहरादिकालेतान् ६ कर्दमाद्याःसप्तदश
प्रजापतयोबभूवुः ७ ८ ९ दक्षस्यषष्टिर्दुहितरोबभूवुरित्यन्वयःमहायशइतिरामस्यसंबुद्धिः १०

202A

दक्षकन्यानां काश्यपपत्नीनां नामान्याह अदितिमित्यादि अष्टाविंशपत्नदलां काश्यपायत्रयोदशोत्प
न्नतोक्तेः वक्ष्यमाणसंतानोपयोगिन्याह दिवि तिवा ॥ तन्मनाः स्ववंशपुत्राभिलाषवती ३२ दितिरत्र

काश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः अदितिं च दितिं चैव दनुमपि च कालकां ॥ ११
ताम्राक्रोधवशां चैव मनुं चाप्यनलामपि तास्तु कन्यास्ततः प्रीतः काश्यपः पुनरब्रवीत् १२
पुत्रांस्त्रैलोक्यभर्तॄन् वै जनयिष्यथ मत्समान् अदितिस्तन्मना या तु दितिश्च दनुरेव च १३
कालका च महाबाहो शेषास्त्वमनसोऽभवत् अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिंदम १४
आदित्या वसवो रुद्रा अश्विनौ च परंतप दितिस्तु जनयत्पुत्रान् दैत्यांस्तात यशस्विनः १५
तेषामियं वसुमती पुरासीत् सवनार्णवा दनुस्तु जनयत्पुत्रमश्वग्रीवमरिंदम १६ नरकं
कालकं चैव कालकाप्यजनायत क्रौञ्चीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीं १७ ताम्रा
तु सुषुवे कन्याः पञ्चैता लोकविश्रुताः उलूकाञ्जनयत्क्रौञ्ची भासी भासानजनायत १८
श्येनी श्येनांस्तथा गृध्रांश्च व्यजायत सुतेजसः धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥

कालकानां विशेषणं अमनस्त्वं संध्यामनोरथदीनः तत्फलं तासां कन्यासंतानं वक्ष्यति १४ अश्विनौ
चेत्संतानास्त्रयस्त्रिंशत् १५ तेषां दितिपुत्राणां वनैरर्णवैश्च सहिता सर्वा नार्णवा १६ क्रौञ्चादिसंतान

महाभारतटी० आ० ५५ ॥

संबोधनाम ममघो भद्रं ते इति प्रयोगः हे राम ते भद्रं मम तस्त्रीणीति विशेषः २० क्रोधवशा काश्यपस्य पत्नी तस्याः द-
रा॰ आ॰ शापत्यान्याह मृगीं चेति २१ सृमराः श्यामकेशयुक्ताः चमराः श्वेतकेशयुक्ताः इति भेदः २३ हरयः सिं
२६
203

चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी शुकी नतां विजज्ञे तु नतायां विनता सुता २० द
श क्रोधवशा राम विजज्ञेप्यात्मसंभवाः मृगीं च मृगमंदां च हरीं भद्रमदामपि २१ मातंगी-
मथ शार्दूलीं श्वेतां च सुरभिं तथा सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि २२ अपत्यं तु मृ-
गाः सर्वे मृग्या नरवरोत्तम ऋक्षाश्च मृगमंदायाः सृमराश्चमरास्तथा २३ ततस्त्विरावतीं ना-
म जज्ञे भद्रमदा सुतां तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः २४ हर्याश्च हरयोपत्यं
वानराश्च तपस्विनः गोलांगूलवशार्दूली व्याघ्रांश्चाजनयन्सुतान् २५ मातंग्यास्त्वथ
मातंगा अपत्यं मनुजर्षभ दिशागजं तु काकुत्स्थ श्वेताप्यजनयन्सुतान् २६ ततो दु-
हितरौ राम सुरभिर्द्व्यजायत रोहिणीं नाम भद्रं ते गंधर्वीं च यशस्विनीं २७ रोहि-
ण्यजनयद्गा वै गंधर्वी वाजिनः सुतान् सुरसाजनयन्नागान् राम कद्रूश्च पन्नगान् २८

हा गोलांगूला इत्यर्थः इति सर्वान्वयि २५ २६ २७ गावो गा इत्यर्थः नागा बहुफणाः सर्पा तदन्ये प- २६
न्नगा इति तीर्थः निर्विषा नागास्तदन्ये पन्नगा इति कतकः २८ ॥

203A

जनयन्नूरुजनयदित्यर्थः २९ उरसः बाहुमध्यात् केचित् बाहुभ्यामिति पाठः ३० अनलापिव्यजाय
तेत्यनेन नकश्यपस्याष्टानामपि पत्नीनां संतानानां स्वस्ववंशप्रदर्शनमाह विनता चेत्यादि शुकीयो
शीशुकी पुत्री नतानस्या विनता पुत्रीत्यर्थः स्वरसः कद्रूश्च नाम्ना स्मृते ३१ नागसहस्रं पन्नगसहस्रा-
मित्यर्थः अतो नोक्तेन विरोधः ३२ श्येनीपुत्रमिति न बतान्ना पुत्र्यो शुकी श्येन सा श्येनी शुकीयो

मनुर्मनुष्यान्जनयत्कश्यपस्य महात्मनः ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्च मनुजर्ष
भ २९ मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इ
तिश्रुतिः ३० सर्वान्पुण्यफलान्वृक्षाननलापि व्यजायत विनता च शुकीपौत्री कद्रू
श्च सुरसा स्वसा ३१ कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरान् द्वौ पुत्रौ विनतायास्तु गरु
डोरुण एव च ३२ तस्माज्जातोहमरुणात्संपातिश्च ममाग्रजः जटायुरिति मां विद्धि श्ये
नीपुत्रमरिंदम ३३ सोहं वाससहायस्ते भविष्यामि यदीच्छसि सीतां च तात रक्षिष्ये
त्वयि याते सलक्ष्मणे ३४ जटायुषं तु प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्नतोभवत् पि
तुर्हि शुश्राव सखित्वमात्मवान्जटायुषा संकथितं पुनः पुनः ३५ ॥

शीपौत्र्या अरुणस्य कश्यपभार्येति चेन्न तत्संतानपरंपरापवित्रा अन्यैषां नीतिदोषः विधिनिषेध
योर्मनुष्याधिकारत्वात् वासः सहायः वासस्थाने सीतारक्षणे सहायभूतः यदीच्छसि उक्तार्थ-
मिति शेषः तदेवाह सीतामिति त्वयि याते मृगयायार्थं ३३ ३४ ३५ ॥

परिदायरक्षणार्थंदत्वायुषेतिशेषःपरिधायेतिपाठेपरिवार्येत्यर्थः ३६ इत्यारण्येरामा॰चतुर्दशःसर्गः १४
रा॰व्या॰ व्यालःश्वापदसर्पयोरितिकोशःमृगाहरिणादयः १ यंदेशंमुनिरब्रवीत्तद्यथोद्दिष्टंतंदेशमागताःस्मस्त्व
३१

204

सतत्रसीतांपरिधायमैथिलींसहैवतेनातिबलेनपक्षिणा जगामतांपंचवटींसलक्ष्मणोरिपून्
दिधक्षन्सवनानिपालयन् ३६ इत्यार्षेश्रीरामायणेवाल्मीकीयेआरण्यकांडेचतुर्दशःसर्गः
१४ ततःपंचवटींगत्वानानाव्यालमृगायुतां उवाचलक्ष्मणंरामोभ्रातरंदीप्ततेजसं १ आगता
स्मयथोद्दिष्टमिमंदेशंमहर्षिणा अयंपंचवटीदेशःसौम्यःपुष्पितकाननः २ सर्वतश्चार्यतांदृ
ष्टिःकाननेनिपुणोह्यसि आश्रमःकतरस्मिन्नोदेशेभवतिसंमतः ३ रमतेयत्रवैदेहीत्वमहंचै
वलक्ष्मण तादृशोदृश्यतांदेशःसन्निकृष्टजलाशयः ४ वनरामण्यकंयत्रजलरामण्यकंतथा
सन्निकृष्टंचयस्मिंस्तुसमित्पुष्पकुशोदकं ५ एवमुक्तस्तुरामेणलक्ष्मणःसंयताञ्जलिः
सीतासमक्षंकाकुत्स्थमिदंवचनमब्रवीत् ६ ॥

यः २ दृष्टिःश्चा ३१
र्यतांप्रेर्यतामित्यर्थःनिपुणआश्रमोचितदेशज्ञानइतिशेषःसंमतःसीतायाइतिशेषः ३ तदेवाह
रमतइतितवरमसेत्यहंरमेइत्यर्थः ४ वनरामणकंवनस्यरमणीयत्वंसंयताञ्जलिःबद्धाञ्जलिः ६

204A

हेकाकुत्स्थत्वयिस्थितेविद्यमानेवर्षशतमपिअहंपरवानेवत्वदधीनएवनकदाचिदपिमेस्वातंत्र्यमित्यर्थः
स्वयंतुत्वमेवरुचिरोदेशइतिविचार्यतत्ररुचिरेदेशेक्रियतामितिवद ७ विमृशन्पर्यालोचयन् ८ हस्ते
नहस्तेनहस्तेलक्ष्मणस्यहस्तेलक्ष्मणंगृहीत्वेत्यर्थः अनेनस्नेहाधिक्यमंतरंगत्वंसामीप्यंचदर्शितं ९

परवानस्मिकाकुत्स्थत्वयिवर्षशतेस्थिते स्वयंतुरुचिरेदेशेक्रियतामितिमांवद ७ सुप्रीत
स्तेनवाक्येनलक्ष्मणस्यमहाद्युतिः विमृशन्रोचयामासदेशंसर्वगुणान्वितं ८ सतंरु
चिरमाक्रम्यदेशमाश्रमकर्मणि हस्तेगृहीत्वाहस्तेनरामःसौमित्रिमब्रवीत् ९ अयंदे
मा शःसमःश्रीमान्पुष्पितैस्तरुभिर्वृतः इहाश्रमपदंरम्यंयथावत्कर्तुमर्हसि १० इयमादित्य
संकाशैःपद्मैःसुरभिगंधिभिः अदूरेदृश्यतेरम्यापद्मिनीपद्मशोभिता ११ यथाख्यातमा
गस्त्येनमुनिनाभावितात्मना इयंगोदावरीरम्यापुष्पितैस्तरुभिर्वृता १२ हंसकारंडा
वाकीर्णाचक्रवाकोपशोभिता नातिदूरेनचासन्नेमृगयूथनिपीडिता १३ ॥ ॥

१० आदित्यसंकाशैस्तद्वदुज्ज्वलैरितिशेषः पद्मशोभिता पद्मश्रियाशोभायुक्ता ११ यथाख्याते
तथैवेयंगोदावरीदृश्यतइत्यर्थः १२ मृगयूथैःपानार्थमागतैर्निपीडितानिविडेतियावत् १३

प्रांशव उन्नताः फुल्लैः विकसितपुष्पवद्भिः १४ सौवर्णैः सुवर्णाभैः परमभक्तिभिर्गवाक्षितां गतानाइवा
रा॰ आ॰ भक्तिभिर्गवाक्षताकारनीलपीतादिवर्णरचनारूपालंकारैरलंकृताः १५ सालाः प्राहृतविशेषाः १६
३८
205

मयूरनादिता रम्याः प्रांशवो बहुकंदराः दृश्यंते गिरयः सौम्याः फुल्लैस्तरुभिरावृताः १४
सौवर्णै राजतैस्ताम्रैर्देशे देशे तथा शुभैः गवाक्षिता इवाभांति गजाः परमभक्तिभिः १५ सा
लैस्तालैस्तमालैश्च खर्जूरैः पनसैर्द्रुमैः नीवारैस्तिनिशैश्चैव पुन्नागैश्चोपशोभिता १६
चूतैरशोकैस्तिलकैः केतकैरपि चंपकैः पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः १७ स्यं
दनैश्चंदनैर्नीपैः पनसैर्लकुचैरपि धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः १८ इदं
पुण्यमिदं रम्यं इदं बहुमृगद्विजं इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षिणा १९ एवमु
क्तस्तु रामेण लक्ष्मणः परवीरहा अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः २० पर्ण
शालां सुविपुलां तत्र संघातमृत्तिकां सुस्तंभां मस्करैर्दीर्घैः कृतवंशां सुशोभनां २१

१७ १८ इदं स्थलं पक्षिणा जटायुना १९ २० संघातमृत्तिकां भित्तिरूपेण संघातप्राप्तमृत्तिकां यस्यां ३८
सा दीर्घैर्मस्करैर्वेणुभिः कृतवंशां कृतवंशकार्यां २१ ॥ रामायनमः

205A

श्रान्तौर्यतितिर्यगवंशपरिवृतेपोपरीतिशेषः दृढपाशावपाशितां दृढबंधनबद्धां २२ तलं भूतलं राघवस्यार्थे
नवासं एकान्तभूतले चकारेतिशेषः २३ सगत्वेति एवं संपादनानन्तरमितिशेषः सफलाः मार्गस्य हृते भागरहि

शमीशाखाभिरास्तीर्य दृढपाशावपाशितां कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा २२ स
मीकृततलां रम्यां चकार सुमहाबलः निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमं २३ स गत्वा लक्ष्म
णः श्रीमान्नदीं गोदावरीं तदा स्नात्वा पद्मानि चादाय सफलः पुनरागतः २४ ततः पुष्पबा
लिं कृत्वा शान्तिं च स यथाविधि दर्शयामास रामाय तदाश्रमपदं कृतं २५ स तं दृष्ट्वा कृतं सौ
म्यमाश्रमं सह सीतया राघवः पर्णशालायां हर्षमाहारयत्परं २६ सुसंहृष्टः परिष्वज्य बाहु
भ्यां लक्ष्मणं तदा अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् २७ प्रीतोस्मि ते महत्कर्म त्व
या कृतमरिंदम प्रदेयो यन्निमित्तं ते परिष्वंगो मया कृतः २८

त्वा स्वयमेवेतिशेषः शांतिं वास्तुयागेति २५ आहारयत् प्राप्तवान् २६ २७ हे हेतो महदिति कर्मणा तदा तफलः २४ कृ
ते प्रदेयोऽस्मर्थ्यर्थे उचितः यन्निमित्तं यत्प्रदेयनिमित्तं ते मया परिष्वंगः कृतो न्यस्य देयस्याभावात् २८ ॥

भावोभिप्रायःकृतमपकारःनसंस्मरतःनस्मरतःकिंतुजीवत्येवपितृवद्देवत्वयापरिपालनादितिभावः २९
रा॰आ॰ ३० ३१ इत्यारण्येरामाभिरामेश्रीरामीयेरामायणतिलकेपंचदशःसर्गः १५ अथकविःशूर्पणखादर्शनं
३४ वक्तुकामोटीपकहेमंतंवर्णयति लक्ष्मणमुखेनवसतइतिपंचचत्वारिंशतिशेषःइहोरामस्येतिशेषःका

206

भावस्तेनकृतज्ञेनधर्मज्ञेनचलक्ष्मण त्वयापुत्रेणधर्मात्मानसंवृत्तःपितामम २९ एवंलक्ष्मणम
क्वातुराघवोलक्ष्मिवर्धनः तस्मिन्देशेबहुफलेन्यवसत्ससुखंसुखी ३० कंचित्कालंसधर्मा
त्मासीतयालक्ष्मणेनच अन्वास्यमानोन्यवसत्स्वर्गलोकेयथामरः ३१ इत्यार्षेरामायणेआ
रण्यकांडेपंचदशःसर्गः १५ वसतस्तस्यतुसुखंराघवस्यमहात्मनः शरद्व्यपायेहेमंतऋतु
रिष्टःप्रवर्तत १ सकदाचित्प्रभातायांशर्वर्यांरघुनंदनः प्रययावभिषेकार्थंरम्यांगोदाव
रींनदीं २ प्रह्वःकलशहस्तस्तंसीतयासहवीर्यवान् पृष्ठतोनुव्रजन्भ्रातासौमित्रिरिदमब्र
आ वीत् अयंसकालःसंप्राप्तःप्रियोयस्तेप्रियंवद अलंकृतइवाभातियेनसंवत्सरःशुभः ४

मिनांचशरद्व्यपायेशरद्गतगमनेहेमंतरितिऋतुकइतिसंधिरार्षःभिन्नपदंवा १ २ पृष्ठतःरामस्ये ३४
तिशेषः ३ येनहेमंतेनशुभोयंसंवत्सरःसपक्वसस्यादिसंपत्त्याअलंकृतइवाभाति ४ ॥

206A

हेमंतधर्मानाह नीहारेणपरुषःकठिनस्पर्शःशरीरं वस्त्रादिस्पर्शमसहशरीरइतिकवितजलानुप
भोगःशैत्यातिशयात्सभगद्वेषः ५ कालेप्याग्रयणानुष्ठानकालेनवाग्रयणप्रजाभिःनवान्नप्राशा
नायपरशाग्रयणाख्यंकर्मतदुपप्रजाभिःपितृन्देवांश्चसंतर्प्यकृताग्रयणकाःसंतोविगतकल्मषाश्च
भवन् ६ प्राज्यंभूरियथाभवतितथासंपन्नोनप्राप्तिविषयःकामोयेषांतेप्राज्यकामाःसंपन्नतरगोर

नीहारपरुषोलोकःपृथिवीसस्यशालिनी जलान्यनुपभोग्यानिसुभोगोहव्यवाहनः ५
नवाग्रयणप्रजाभिरभ्यर्च्यपितृदेवताः कृताग्रयणकाःकालेसंतोविगतकल्मषाः ६ प्रा
ज्यकामाजनपदाःसंपन्नतरगोरसाः विचरंतिमहीपालायत्रार्थेविजिगीषवः ७ से
वमानेदृढंसूर्येदिशामंतकसेवितां विहीनतिलकेवस्त्रीनोत्तरादिक्प्रकाशते ८ प्रकृत्या
हिमकोशाढ्योदूरसूर्यश्चसांप्रतं यथार्थनामासुव्यक्तंहिमवान्हिमवान्गिरिः ९ ॥

साःबहुलतरक्षीरादयोजनपदाभवंतीतिशेषः तथाभूतेषुयात्रार्थंदर्शनार्थं ७ अंतकसेवितांदि
शंदक्षिणां ८ प्रकृत्यास्वभावेनहिमकोशैर्घनीभूतहिमसमूहैराढ्योहिमवानितिसांप्रतंया
तोदूरसूर्योतस्सुव्यक्तंप्रकटंहिमवानसनहिमवानितियथार्थनामाभवति ९ ॥ ॥

रा॰व्या॰ मध्याह्ने सुखः संचारो येषु तेन तथा मध्याह्ने स्पर्शतः शीतस्यातपस्पर्शनः सुखजनकाः अत एव सुभगादित्याः सु
८० सेव्यादित्याः छायाः सलिला निचदुर्भगा निश्चसेव्यानि येषु ९ नीहारः स्पर्शावरकं हिमं मृदुं सूर्याः ई
207 षद्रश्मिसूर्याः पटुशीताः शून्यारण्याः हिमेनाशितत्पर्णत्वात् हिमध्वस्तपंकजाः ॥ निवृत्ताकाशशय्या
यमाः निवृत्तानां वृतप्रदेशशयनाः पुष्यनीतपुष्यनक्षत्रबोधितरात्रिकालपरिमाणाः हिमारु

त्यंतसुखसंचारा मध्याह्ने स्पर्शतः सुखाः दिवसाः सुभगादित्याः छायासलिलदुर्भगाः ९ मृ
दुसूर्याः सनीहाराः पटुशीताः समाहितः शून्यारण्यहिमध्वस्ता दिवसा भांति सांप्रतं ११ निवृ
त्ताकाशशयनाः पुष्यनीता हिमारुणाः शीतवृद्धतरायामास्त्रियामा यांति सांप्रतं १२ रवि
संक्रांतसौभाग्यस्तुषारारुणमंडलः निश्वासांध इवादर्शश्चंद्रमा न प्रकाशते १२ ॥ राम

णाः हिमधूसराः कपोतवर्णा अरुणाभाः शीतं वृद्धतरं यासु ताः आयामा दैर्घ्यवत्यः त्रियामा रात्रयः ८०
१२ रवौ संक्रांतं सौभाग्यं सुभगत्वं उपभोग्यत्वरूपं यस्य सः तुषारधूसरमंडलः निश्वासांधो नि
श्वासमलिन आदर्श इव न प्रकाशते १३ ॥ राम

207A

आतपश्रणमाग्रानपेनवैवर्णएप्रामासीनेव लत्तनेसन्नभमात्रेणानन्तशोभनद्रमर्थः १४ प्रकृत्याशीतल
स्पर्शः पश्चिमदिग्वायुः सांप्रतंहिमविह्वलात्कालेमाघः कालेद्विगुणशीतलः १५ वाष्पऊष्मानेनमुक्त्वा
निम्नगाणांनिप्रातःकालेकूपोदकादिष्ववनादष्पूष्मामाडुर्भवतिरम्यनभवप्रममाकांमिनितीर्थैः य
वगोधूमाद्यकुरेष्ववप्रणायविंदुदर्शनाद्धृतेषुचनद्दर्शनाद्वाष्पछन्नानिवाष्पेनेवजन्नैलयोम्मनो १६ ख

ज्योत्स्नानघारमलिनापौर्णमास्यानराजते सीतेवचातपश्पामिलस्तेनेनचशोभते १४
प्रकृत्याशीतलस्पर्शोहिमवेद्धश्चसांप्रतं प्रवातिपश्चिमोवायुःकालेद्विगुणशीतलः १५
वाष्पच्छन्नान्यरण्यानियवगोधूमवंतिच शोभंतेभ्युदितेसूर्येनदद्भिःक्रौंचसारसैः १६
खर्जूरपुष्पाकृतिभिःशिरोभिःपूर्णतंडुलैः शोभंतेकिंचिदालंवाःशालयःकनकप्रभा १७
मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः दूरमभ्युदितःसूर्यःशशांकइवलक्ष्यते १८ अग्रा
ह्यवीर्यःपूर्वाह्णेमध्याह्नेस्पर्शतःसुखः संसक्तःकिंचिदापांडुरातपःशोभितेक्षितौ १९

नैरपुष्पाकृतित्वंप्रलंवत्वेनपीनत्वेनचकिंचिदालंवाःकिंचिन्नम्राःकनकप्रभाःपरिणतत्वात् १७ नी
हारोहिमानिशापद्ववःपर्वतायदर्शनसंपादनक्षमः ततसंवृतैरुपसर्पद्भिर्मयूखैरुपलक्षितःश
शांकइवसदृशस्तद्रूपर्थः अग्राह्यवीर्यः ईषत्ग्राह्योष्मत्वःस्पर्शसुखःसालस्पर्शः १९ ॥ ॥ ॥

अवश्यायो हिमबिंदुः २० प्रतिसंहरते करं दुःस्पर्शशैत्यवशादिति भावः २१ समुपासीना जलसमीपदेशा
मिति शेषः नावगाहंति नावगाहंते २२ अवश्यायतमोभ्यां नद्धा रोद्धा नीहारतमसावृताः प्रसुप्ता इव २३ वा

अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला वनानां शोभते भूमिर्निविष्टतरुणातपा २० स्पृशंस्तु
विपुलं शीतमुदकं द्विरदः सुखं अत्यंततृषितो वन्यः प्रतिसंहरते करं २१ एते हि समुपासीना विह
गा जलचारिणः नावगाहंति सलिलमप्रगल्भा इवाहवं २२ अवश्यायतमोनद्धा नीहारतमसावृताः
प्रसुप्ता इव लक्ष्यंते विपुष्पा वनराजयः २३ बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः हिमार्द्रवालु
कैस्तीरैः सरितो भांति सांप्रतं २४ तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च शैत्यादगाग्रस्थमपि प्राये
णरसवज्जलं २५ जराजर्जरितैः पत्रैः शीर्णकेसरकर्णिकैः नालशेषा हिमध्वस्ता न भांति कमला
कराः २६ अस्मिंस्तु पुरुषव्याघ्र काले दुःखसमन्वितः तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे
२७ त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् तपस्वी नियताहारः शेते शीते महीतले २८

ष्पो धूमः ऊष्मा वा २४ अगाग्रस्थं पर्वताग्रस्थं २५ जरया कालकृतया जर्जरितानि पर्णानि येषां तैः पत्रैः शी
र्णानि केसराणि कर्णिकाश्च येषां तैः २६ २७ २८ ॥ ॥ ॥ ॥

208A

१० ३० निरुद्धः सर्वेन्द्रियैः क्रियापरनारीविषये निषेधनम् अत्र वादी इन्द्रियनिवर्तनेन यस्य सः न ग्रहे न जितेन्द्रि
यत्वं ११ सोऽपि प्रतीतसौख्यसाधनान् सर्वार्थान् तान् सर्वान् आत्मनाश्रितः त्वत्सदृशाय वह्नाः स्वात्मवान् आत्मना इन्द्र
यासंगत्यागपूर्वकं त्वद्विषयमननादिमानित्यर्थः इति कनकः १२ सर्वोऽपि जितएव स्वाधीनः कृतः यतो वन

सोऽपि वेलामिमां नूनम् अभिषेकार्थम् अयनः कृतः सुकृतिभिर्नित्यं संप्रयाति सरयूं नदी १९ अनंत
नम्रः एकस्मिन् हृदः सुकुमारो हि मार्दितः वाक्यं नपरस्यां प्रेत सरयूम् अवगाहते २० पद्मपत्रेक्षणः एष
मः श्रीमान्निरुद्धरोमहान् धर्मतः सत्यवादी च क्रिनिषेधो जितेन्द्रियः २१ प्रियाभिभाषी मधु
रो दीर्घबाहुररिंदमः संभवाविविधानसौख्यानप्राप्य सर्वान् आत्मनाश्रितः २२ जितः स्वर्गस्त्व
याद्य भरतेन महात्मना वनस्थमपि तापस्ये यस्त्वामनुविधीयते २३ न पितृमनुवर्तन्ते मात्रकं
द्विपदा इति खातो लोकप्रवादोऽयं भरतेनान्यथा कृतः २४ भर्ता दशरथो यस्याः साधुश्च भरतः
सुतः कथं नु सा वा कैकेयी तादृशी क्रूरदर्शिनी २५ ॥

स्थमपित्वां नापसेतापसधर्मे स्थित्वा अन
विधीयते अनुकरोति सेवते इत्यर्थः धीकेन्द्रैर्वादिकसङ्ग्रहं २३ द्विपदा मनुष्याः पितृस्वभावं नानु
वर्तन्ते किं तु मातृकं स्वभावम् अनुवर्तन्ते इति प्रसिद्धो लोकवादो भरतेनान्यथा कृतः पितृस्वभाव एवा
नीहतो न मातुरित्यर्थः २४ एवं भरतेन सत्वाकेकेयीनिंदनिभमेत्याह २५ ॥ ॥

वा॰ रा॰
आ॰
४२
209

स्नेहान्नभरतसमयोः स्नेहात् ३६ नगर्हितव्या देवकृतत्वात्तत्कृतेः तामेवपूर्वोक्तामेव ३७ वालि[illegible]शीक्रियते
गुणाश्रयस्यभरतस्यवियोगमसहमानाचाचलत्वंप्राप्नोतीत्यर्थः ३८ स्नेहमेवप्रकाशयतिसंस्मरामीतिप्रि
याणिप्रियकेनचिदुच्यमानानिकर्णेकठोराण्यपिभवंतीतिमधुराणीतिहृद्यानिमंत्रवत्परहृदयवंधनानि।

इत्येवंलक्ष्मणेवाक्यंस्नेहाद्ब्रुवतिधार्मिके। परिवादंजनन्यास्तमसहन्राघवोऽब्रवीत् ३६ नतेंऽवाम
ध्यमामातागर्हितव्याकदाचन तामेवेक्ष्वाकुनाथस्यभरतस्यकथांकुरु ३७ निश्चितैवहिमेबुद्धिर्व
नवासेदृढव्रता भरतस्नेहसंतप्तावालिशीक्रियतेपुनः ३८ संस्मराम्यस्यवाक्यानिप्रियाणिमधु
राणिच हृद्यान्यमृतकल्पानिमनःप्रह्लादनानिच ३९ कदाह्यहंसमेष्यामिभरतेनमहात्मना श
त्रुघ्नेनचवीरेणत्वयाचरघुनंदन ४० इत्येवंविलपंस्तत्रप्राप्यगोदावरींनदीं चक्रेऽभिषेकंकाकु
त्स्थःसानुजःसहसीतया ४१ तर्पयित्वाथसलिलैस्तेपितॄन्दैवतानिच स्तुवंतिस्मोदितंसूर्यं
दैवतांश्चतथानघ ४२ कृताभिषेकःसरराजरामःसीताद्वितीयःसहलक्ष्मणेन कृताभिषेक
स्त्वगराजपुत्र्यारुद्रःसनंदीर्भगवानिवेशः ४३ इत्यार्षेरामायणेआरण्यकांडेषोडशःसर्गः १६

सामान्येनामाधुर्यमुक्त्वातिशयेनाह अमृतकल्पानीतिअतएवमनःप्रह्लादनानि ३९ त्वयेमस्सहि ४२
नरतिशेषः ४० ४१ ४२ रुद्रोपमायांसहायाविशेषितंतंदर्शयति ४३ इत्यारण्येरामाभिरामे षोडशस्सर्गः १६

209A

ततः स्वमाश्रमं गताः १ पौर्वाह्णिकं प्रातःकालिकं पर्णशालावाप्यां ३ चित्रया चित्रानक्षत्रेण ४५ शूर्पणखान

कृताभिषेको रामस्तु सीता सौमित्रिरेव च तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमं १ आश्र
मं तदुपागम्य राघवः सहलक्ष्मणः कृत्वा पौर्वाह्णिकं कर्म पर्णशालामुपागमत् २ उवास स सु
खं तत्र पूज्यमानो महर्षिभिः स रामः पर्णशालायामासीनः सह सीतया ३ विरराज महाबा
हुश्चित्रया चन्द्रमा इव लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ४ तदासीनस्य रामस्य कथा
संसक्तचेतसः तं देशं राक्षसी काचिदाजगाम यदृच्छया ५ सा तु शूर्पणखा नाम दशग्रीवस्य
रक्षसः भगिनी राममासाद्य ददर्श त्रिदशोपमं ६ दीप्तास्यं च महाबाहुं पद्मपत्रायतेक्षणं
गजविक्रान्तगमनं जटामण्डलधारिणं ७ सुकुमारं महासत्वं पार्थिवव्यञ्जनान्वितं राममि
न्दीवरश्यामं कन्दर्पसदृशप्रभं ८ बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता सुमुखं दुर्मुखी राम
वृत्तमध्यं महोदरी ९ विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा प्रियरूपं विरूपा सा सुस्व
रं भैरवस्वना १० ॥ ॥

खमहत्वात्संज्ञायामिति ङीपोऽभावः ६ दीप्तास्यं कान्तिमुखं गज
स्येव मन्दतया विक्रान्तं गमनं यस्य ७ व्यञ्जनं लक्षणं ८ सुमुखमित्यादि विषयालंकारोऽत्र ९ १०

दारुणा सुदारुणामिति शेषः दक्षिणं सभाषिणं वामभाषिणं वामभाषिणी दुष्टभाषिणी ॥ शरीरजः का
मः १२ तत्त्वं यथा तथा आख्यातुमर्हसि १३ शूर्पणख्येति पोमीक ऋजुबुद्धितया नयेव १४ १५ १६ नियोगात्त्वा
वा॰ रा॰ आ॰ ८३ 210 त्तावल्लात् यंत्रितः नियतः धर्मकांक्षीपि रक्षाकानिर्वहणेन रूपधर्माभिलाषी धर्मार्थं नैसैवधर्मस्य परि

तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ॥ शरीरज
समाविष्टा राक्षसी राममब्रवीत् जटी तापसवेषेण सभार्यः शरचापधृत् १२ आगतस्त्वमिमं
देशं कथं राक्षससेवितं किमागमनकृत्यं ते तत्त्वमाख्यातुमाख्यातुमर्हसि १३ एवमुक्तस्तु रा
क्षस्याः शूर्पणख्याः परंतपः ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे १४ आसीद्दशरथो नाम रा
जा त्रिदशविक्रमः तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः १५ भ्रातायं लक्ष्मणो नाम य
वीयान्मामनुव्रतः इयं भार्या च वैदेही मम सीतेति विश्रुता १६ नियोगात्तु नरेंद्रस्य पितुर्मा
तुश्च यंत्रितः धर्मार्थं धर्मकांक्षी च वनं वस्तुमिहागतः १७ त्वां तु वेदितुमिच्छामि कस्य त्वं का =५=
सि कस्य वा त्वं हि तावन्मनोज्ञांगी राक्षसी प्रतिभासि मे १८ इह वा किंनिमित्तं त्वमागता ब्रू
हि तत्त्वतः सा ब्रवीद्वचनं श्रुत्वा राक्षसी मदनार्दिता १९ ॥ ॥ ॥ ॥

पालनाय १७ कस्य त्वं कस्येति शेषः कासि कं नामासि कस्य वंशजेति शेषः राक्षसी एवं मनोज्ञांगत्वस्य ८३
कामरूपत्वं विना ऽसंभवात् कामरूपत्वं राक्षसीत्वं विना नेति भावः १८ मदनार्दिता रामदर्शनादिति शे

210A

२० यदि ते श्रोत्रमागतः श्रावणः श्रुत एव भविष्यतीति भावः २१ सदाप्रवृद्धनिद्रत्वमन्वय २२ भ्रातरौ खरदूषणौ वि
भीषणाद्वीन्त्रिशिरःप्रभृतीन् स्वस्वभाववत्त्वान्ततोऽहं २२ तानहं रावणादीन् वीर्येण समतिक्रान्ता तानन्ततोऽधिकाः तस्मात्समति
क्रान्ताऽहं दर्पसत्त्वाभ्यां त्वामिमिच्छमय राहितेन साधोऽस्मि हे राम त्वां ताः पूर्वदर्शनात्प्रथमदर्शनतस्त्वामारभ्य यद्वा ऽ

श्रूयतां राम तत्त्वार्थं वक्ष्यामि वचनं मम अहं शूर्पणखा नाम राक्षसी कामरूपिणी २० अरण्यं विच
रामीदमेका सर्वभयंकरा रावणो नाम मे भ्राता यदि ते श्रोत्रमागतः २१ विभीषणस्तु धर्मात्मा
न तु राक्षसचेष्टितः प्रवृद्धनिद्रश्च सदा कुम्भकर्णो महाबलः २२ प्रख्यातवीर्यौ च रणे भ्रातरौ खर
दूषणौ तानहं समतिक्रान्ता राम त्वा पूर्वदर्शनात् समुपेतास्मि भावेन भर्तारं पुरुषोत्तमम् अ
हं प्रभावसंपन्ना स्वच्छन्दबलगामिनी चिराय भव भर्ता मे सीतया किं करिष्यसि २५ ॥ ॥

सर्वदर्शनात् देवादिदर्शिनः मा गां दृष्ट्वा दिव्यतद्रूपदर्शनाद्धेतोः भावेन त्वां पुरुषोत्तमं भर्तारं समुपेतास्मि २४
प्रभावसंपन्ना मद्भक्तेन भावेन शृङ्गारेण संपन्ना यद्वा प्रभावेन शक्त्यतिशयेन संपन्ना अत एव स्वच्छन्देन स्वे
च्छया बलेन च सर्वलोकगमनशीला यदेवमतश्चिराय भवेति २५ ॥ ॥ ॥ ॥

रा॰ रा॰
आ॰
४४
211

आत्मनोदेवयोनिभेदत्वेनाभिमतग्रहणसामर्थ्याभिमानेनतस्मिन्रामस्पृहत्वंयेसीतारूपेणमाह विरूपाचेतिविरू
कार्हत्त्वात्रामस्यभार्याहरणविषयेमस्थितंमांत्वद्वाक्यैर्भेत्तुंनवर्तयितुंनशक्यमित्यर्थः मामितिद्वि
तीयाश्लोकादस्मात् ४ तत्रमूर्खत्वमुपपादयतियतिप्राकृतमस्त्रीरस्त्रीकेकेयीएकपदेद्वाक् ५ संयु
गेखरहंतारमित्यन्वयः ६ ७ ॥

वा॰ अपि वा एष हितस्तव प्रलाप एव वा संगतः स्यादित्याह दोषं गुणं वेति कस्यचित् विसंदिग्धस्य कार्यस्य निश्चये निश्चयार्थमि
रा॰ आ॰ त्यर्थं अज्ञात्वा हिते को गुणः को दोषः क उपायः कोऽपाय इति यदि त्वं पृष्टः स्यात्तदा एवं वक्तुमर्हसि गुणदो
८८ षादिकमित्यर्थः मया तु निश्चितकार्ये केवलं साहाय्ये नियुक्तोसि नानेन जल्पः संगत इति भावः ८ ९
शनेनैव राजनि सचिवेन विनीतेन वाच्यमित्याह संपृष्टेनेति उद्यताञ्जलिनेत्यनेन विनीतता दर्शिता

दोषं गुणं वा संपृष्टस्त्वमेवं वक्तुमर्हसि अपाये वाप्युपाये वा कार्यस्यास्य विनिश्चये ८ संपृष्टेन
तु वक्तव्यं सचिवेन विपश्चिता उद्यताञ्जलिना राज्ञो य इच्छेद्भूतिमात्मनः ९ वाक्यमप्रतिकूलं
तु मृदुपूर्वं शुभं हितं उपचारेण युक्तं च वक्तव्यो वसुधाधिपः १० सावमर्दं तु यद्वाक्यमथवा
हितमुच्यते नाभिनन्देत तद्राजा मानार्थी मानवर्जितं ११ पञ्च रूपाणि राजानो धारयन्त्यमि
तौजसः अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च १२ औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नतां
म् धारयन्ति महात्मानो राजानः क्षणदाचर १३ ॥

९ उपचारेण राजनीतिमार्गेण युक्तं १० सावमर्दं तिरस्कारसहितं अथवा यद्यपि
हितं तथापि नाभिनन्देत तेन त्वत्प्रोक्तमवमर्दसहितं मानहीनं वचः श्रुत्वा न क्षमिष्यतीति भावः ११
ततो वक्तुरनिष्टमपीत्याह पंचेति केषां पंचेत्यत आह अग्नेरिति १२ कानि रूपाणीत्यत आह क्रमेण औष्ण्यमिति
औष्ण्यं तेजः सौम्यं दयार्द्रचित्तत्वं दण्डः दुष्टनिग्रहः प्रसन्नता हर्षो वक्तरि तेषां दर्शनात् तस्मात्पूज्याः १३ ॥ ८८

255A धर्मराजधर्मं १४ अभ्यागतमतिथिमित्यनेनगृहागतातिथ्यं स्वयंपतिगुणदोषप्रश्ने किंममहितप्रश्ने
वाइंदृष्टंवक्तुंयुक्तंनचैतदेकमपिमयादृष्टमितिभावः अपिचअपितुमयानोप्रतिपन्नावदेवोक्तंतवाह

तस्मात्त्वंकः स्वयस्यास्तुमान्याः सुमानुनिम्नदा नेतुधर्ममविज्ञायकेवलंमोहमाश्रित १४ अ
भ्यागतेनदोषाजस्त्यामकृषंवदसीदृशं गुणदोषोनपृष्ठामित्वमेवात्मनिरागतम १५ मयोक्तम
पिचेत्वयावनाप्रतिमितविक्रम अस्मितस्मभवान्कृत्येसहायकर्तुमर्हसि १६ श्रुत्वातत्कर्मसा
हाय्यंयत्कार्यंवचनान्मम सोवृत्तस्त्वंमृगोभूत्वाविचचारजनविष्टभिः १७ आश्रमेतस्यरामस्यसी
तायाः प्रभुलेवतूर प्रलोभयित्वावैदेहीयथेष्टंगन्तमर्हसि १८ त्वांहिमायामयंदृष्ट्वाकांचनंजात
विस्मया आनयेनमितितिप्रमवरूतिमैथिली १९ अपक्रान्तेचकाकुत्स्थेदूरंगत्वाप्युदाहर
हासीतेलक्ष्मणेत्येवरामवाक्यानुरूपकं २० तच्छ्रुत्वारामपदवींसीतयाचप्रचोदितः अनुगच्छ
तिसंभ्रान्तसौमित्रिरपिसौहृदात् २१ अपक्रान्तेचकाकुत्स्थेलक्ष्मणेचयथासुखं आहरिष्यामिवै
देहींसहस्राक्षःशचीमिव २२ एवंकृत्वात्विदंकार्यंयथेष्टंगच्छराक्षस राज्यस्यार्धंप्रदास्यामिमा
रीचतवसुव्रत २३ ॥

अस्मिंसीतापहारस्येकृत्येममभवान्मयानियुक्तः साहाय्यंकर्तुमर्हसीति १९ किंतत्कर्मतत्वंसाहाय्यं
तत्राहश्रुत्वेतिसाहाय्येममवचनाद्यत्कार्यंतत्कर्मश्रुणुइतिसंबंधः १०।१५ रामवाक्यानुरूपंध्वनिसदृ

रामायणटी० ४० ॥

शिवं मार्गं गच्छ सौम्यो भूत्वा प्रस्थितो भवेत्यर्थः किं च शिवं मनोहरं मार्गं मृगरूपेण गच्छ शीघ्रं हि २४ २५ अ
थ राजन्नात्मवाक्याकरणे दण्डमाह नोचेदिति मद्वचनानुष्ठाने मरणमेवाननुष्ठाने तु जीवनमतो वद्धूधना
दिप्राप्तिश्च एवं प्रार्थनया कृतेऽपि बलान्मद्वलप्रहेतुकमरणभयात्वं च करिष्यस्येव २६ रामात्प्राप
दयेऽवकदाचिज्जीवनं संभावितं एवं मद्वचनाकरणे तु सर्वथाप्यमृत्युरेवेत्याह आसाद्येति तं रामं संप्रा

गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये अहं त्वानुगमिष्यामि सरथो दण्डकावने २४ प्राप्य
सीतामयुद्धेन वंचयित्वा तु राघवं लंकां प्रति गमिष्यामि कृतकार्यः सह त्वया २५ नोचेत्करोषि
मारीच हन्मि त्वामहमद्य वै एतत्कार्यमवश्यं मे बलादपि करिष्यसि २६ राज्ञो विप्रतिकूल
स्थो न जातु सुखमेधते आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरुध्यतः एतद्यथा
वत्परिगृह्य बुद्ध्या यदत्र पथ्यं कुरु तत्तथा त्वं २७ इत्यार्षे रामायणे आरण्यकाण्डे चत्वारिंशः सर्गः
४० आज्ञप्तो रावणेनेत्थं प्रतिकूलं च राजवत् अब्रवीत्परुषं वाक्यं निःशङ्को राक्षसाधिपं १॥

योऽनुक्तनाशनिश्चयः एतत्सर्वमङ्गीकृत्य वचनं २७ इति रामाभिरामे श्रीरामीये रामायणतिलके आर
ण्यकाण्डे चत्वारिंशः सर्गः ४० राजवृत्तं राजयोग्यं रावणेनाज्ञप्तः राम लक्ष्मण प्रतारणरूपं कार्यं प्र
तिकूले अवश्यं अवश्यं करिष्यामीत्येवं प्रतिकूलवाक्यसहितं यथा तथाज्ञप्तोऽस्मीति निःशङ्को मारीचः
परुषं प्राह तेनार्थेन तस्य वा १ ॥

256A

विनाशः विनाशोपायः १ स्त्रीविना तयासहावस्थानमितिशेषः कोनाभिनंदतिकेनपापकृताउपायतः ३
पापव्याजेन ३ नयोपदेष्टारस्ततोहिनवीर्यास्तवपाचव्य येतांवेतोवलतेरणशत्रुणोपरुद्धंविनश्यंतेतद
द्रुमिवेति ४ स्वकृतेनस्वनिर्मितविनाशोपायेन ५ येत्वामेवंकुपथमारूढंननिग्रह्णंतिनवारयंतीतिशे

केनायमुपदिष्टस्तेविनाशः पापकर्मणा सपुत्रस्यसराज्यस्यसामात्यस्यनिशाचर १ कस्त्वया
सुखिनारामजायाभिनंदतिपापकृत केनेदमुपदिष्टंतेमृत्युद्वारमुपायतः २ शत्रवस्तवसुव्यक्तं
हीनवीर्यानिशाचर इच्छंतित्वांविनश्यंतेमुपरुद्धंवलीयसा ३ केनेदमुपदिष्टंतेक्षुद्रेणाहि
तवुद्धिना यस्त्वामिच्छतिनश्यंतंस्वकृतेननिशाचर ४ वध्याः खलुनवध्यंतेसचिवास्तवरावण
येत्वामुत्पथमारूढंननिगृह्णंतिसर्वशः ५ साध्वमात्यैः कामवृत्तोहिराजाकापथमाश्रितः नि
ग्राह्यः सर्वथासद्भिः सनिग्राह्योनगृह्यसे ६ धर्ममर्थंचकामंचयशश्चजयतांवर स्वामिप्रसा
दात्सचिवाःप्राप्नुवंतिनिशाचर ७ विपर्ययेतुतत्सर्वंव्यर्थंभवतिरावण व्यसनंस्वामिवैगुण्या
त्प्राप्नुवंतीतरेजनाः ८ ॥

मात्यास्तेवध्यावधयोग्याकृतस्त्वयानवध्यंतइत्यर्थः ६ तत्रनीतिशास्त्रमाहसाध्वमात्यैरिति ७ कृत
स्तैरेवमनुष्ठेयंतयाहधर्ममितिविति ८ विपर्ययेस्वामिवैगुण्येप्रधानकेवलंतेषामेवव्यसनप्राप्तिः किं
तुसर्वजनानामितराहइतरेजनाइतिअपीतिशेषः ९ ॥
॥

वा०
रा०प्रा०
५०
257

१० नीत्योनक्रूरदंडेनप्रतिकूलेनसप्रकृतीनामिनिरोषः ११ नीत्यामंत्राः नीत्येणोपायप्रयोक्ताराः तेनन
मंत्रिणाहिणाराज्ञासहभुंज्यतेत्वममनयास्माप्यतेमंदबुद्धिः सारथियेषां तेरथाःयथाविषमेसारथिभिः
सहनश्यंतितथानेराजानोमंत्रिभिः सहनश्यंति १२ पुक्तधर्ममनुष्ठितः प्रक्तधर्मानुष्ठातारः साधवोनी
तिमार्गनिष्ठाः सपरिच्छदाः सपरिजना १३ नीत्यादंडेनप्रजानांप्रतिकूलेनरक्षमाणाप्रजानंदंगोमायु

राजन्मूलोहिधर्मस्यप्रशास्त्रजयतांवर तस्मात्सर्वास्ववस्थासुरक्षितव्यानराधिपः १० राज्येपा
लयितेणाकोननीत्यानतिपुणवर नचातिप्रतिकूलेननाविनीतेनराक्षस ११ येनीत्यासे
वाः सचिवाभुंज्यतेसहितेनवै विषमेषुरथाःशीघ्रंमंदसारथयोयथा १२ बहवः साधवोलो
केपुक्तधर्ममनुष्ठितः परेषामपराधेनविनष्टाःसपरिच्छदाः १३ स्वामिनाप्रतिकूलेनप्र
जास्तीक्ष्णेनरावण रक्षमाणानवर्धन्तेमृगागोमायुनायथा १४ अवश्यंविनशिष्यंतिसर्वे
रावणराक्षसाः येषांत्वंकर्कशोराजादुर्बुद्धिरजितेन्द्रियः १५ तदिदंकाकतालीयंघोरमा
सादितंमया अत्रत्वंशोचनीयोसि ससैन्योविनशिष्यसि १६ ॥ ॥

नाम्मृगवानजीवेनरक्षमाणामृगाइव १४ कर्कशः क्रूरबुद्धिः कठिनश्च १५ तदिदंत्वत्तोमरणरू
पंघोरंकाकतालीयमाकस्मिकं मयासादितंयद्यपितथापितन्नमितत्याशोकःक्रियते जातस्य
हिध्रुवोमृत्युरिति पायात् तथापित्वंससैन्योविनशिष्यसि यतः अत्रार्थेत्वंशोचनीयोसि १६ ॥ ५०

257A

ननुममसमरणं कथं निश्चितं तत्राह मामिति मां निहत्य रामस्त्वां सबांधवं मचिराद्वधिष्यति तस्माद्भयथा
पि मरणं निश्चितं ततो वा रामाद्रावणप्राधनेन वधेन कृतकृत्यो स्मि यन्न मत्परेण शरिणा हतो प्रियेण राज्ञो बला।
न्मरणाय तया रोषात्प्रायुक्तो मत्स्यः सर्वांदनातत्प्राय मत्त्यो रथमश्वेनेनर्द्रमरणेन नष्टाश्वेः राज्ञा मारितः स्या
पौवो रकरानाद्यभावश्रवणान्तर्मनो मरणेन कृतकृत्यो हमिति निद्धं परि टस्य ज्ञाने वा स्वतनपसायरो

मां निहत्य तु रामो सावचिरात्त्वां वधिष्यसि अनेन कृतकृत्यो स्मि म्रियेचाप्यरिणा हतः १७ द
र्शनादेव रामस्य हतं मामवधारय आत्मानं च हतं विद्धि हृत्वा सीतां सबांधवं १८ आनयिष्यसि
चेत्सीतामाश्रमात्सहितो मया नैव त्वमपि नाहं वै नैव लंका न राक्षसः १९ निवार्यमाणस्तु
मया हितैषिणा न मृष्यसे वाक्यमिदं निशाचर परेतकल्पा हि गतायुषो नरा हितं न गृह्णंति
सुहृद्भिरीरितं २० इत्यार्षे रामायणे वाल्मीकीये आरण्यकांडे एकचत्वारिंशः सर्गः ४१ ॥

नत्वमुद्दवितत्राह निबोधं १७ आत्मानं रावणं सबांधवमात्मानमित्यन्वयः १८ कदाचिदपि मया जी
वतो सहैव सीतामानयिष्यसि तदा पश्चादपि सर्ववधो निश्चित इत्यर्थः १९ न मृष्यसे प्रतिकूलत्वं ध्यानय
गिरः हृणामीत्यर्थः परेतकल्पाः मृतप्रायाः २० इति रा॰ श्री॰ रा॰ आ॰ एकचत्वारिंशः ४१ ॥ ॥

वा॰
रा॰ आ॰
५१

258

एविचरप्रभोः रावणाय ह्ययंश्रुत्वैव निधनं मरणरूपं तस्मात् गृध्रावेवमब्रवीत् नमहं चरस्मर्थः १ तथाहं
जीवन्निर्जहुः स्वमप्याह दृष्ट्वाहमिति पुनः यदा यैतेन नष्टे हेम विष्णामितदोद्यमानविशेषणेन रामे
णजीवितनिहतं नष्टमेव एकाकीनवजीवितेन नष्टं २ यमदंडहतस्येत्सोरामः प्रतिरूपोयमदंडस्य

एवमुक्त्वा तपरुषं मारीचो रावणं ततः गत्वावेवमब्रवीद्दीनो भयाद्रात्रिंचरप्रभोः १ दृष्ट्वा
हं पुनस्तेन शरचापासिधारिणा मद्वधोद्यतशस्त्रेण निहतं जीवितं च मे २ नहि रामं पराक्र
म्य जीवन्प्रतिनिवर्तते वर्ततेप्रतिरूपोसौ यमदंडहतस्य ते ३ किंतु कर्तुं मया शक्यमेवं त्व
यि दुरात्मनि एष गच्छाम्यहं तात स्वस्ति ते स्तु निशाचर ४ प्रहृष्टस्त्वभवत्तेन वचनेन स राक्ष
सः परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ५ एतच्छौटीर्ययुक्तं ते मच्छंदवशवर्तिन इ
दानीमसि मारीचः पूर्वमन्यो हि राक्षसः ६ आरुह्यतामयं शीघ्रं खगो रत्नविभूषितः म
यासह रथो युक्तः पिशाचवदनैः खरैः ७ ॥

तिरूपो वर्तते ३ यथाशक्यपरिहारमनर्थं प्रोयति किं तु इति ४ तेनवचनेन गच्छामीति वचनेन स
संश्लिष्टं गाढं मच्छंदवशवर्तिनः मदभिप्रायवशवर्तिनः ५ शौटीर्यं वीर्यं तद्युक्तं एतद्वचो योग्यमि
तिशेषः इदानीं मारीचोसि स्वप्रकृतिं प्राप्तोसि पूर्वमन्यो हि राक्षसस्तदा विपरीतस्तिशेषः ६ खगः आ

= १ श्री... ५१

258A

स्नेनेणमृगलक्षणरहिते समये ८ ९ आश्रममंडलात् मारीचाश्रममंडलादित्यर्थः पत्तनं नगरं योध राजधानी राजधानीं तिनभेदः पत्तनशब्दोऽर्धर्चादिः १० ११ १२ १३ १४ १५ मणिप्रवरश्रेष्ठमाग्रः इंद्रनील

प्रतो भयि त्वा वैदेही यथेष्टं गंतमर्हसि तांस्थेनेव समं सीतामानयिष्यामि मैथिली ८ न नस्तथेत्युवाचैनं रावणं ताटकासुतः ततो रावणमारीचौ विमानमिव तं रथं ९ आरुह्या ययतः प्रीतौ तस्मादाश्रममंडलात् तथैव तत्र पुष्पाणि पत्तनानि वनानि च १० गिरीश्च स रितः सर्वा राष्ट्राणि नगराणि च समेत्य दंडकारण्यं राघवस्याश्रमं ततः ११ ददर्शाथ सह मा रीचो रावणो वाक्यमब्रवीत् एतदाश्रमपदं दृष्टं पुष्पैः कदलीवृतं १२ क्रियतां तत्सखे शीघ्रं तं रीचं रावणो राक्षसाधिपः अवतीर्य रथात्तस्मात्ततः कांचनभूषणात् १३ क्रियतां तन्मया वृष्टी ग्रेय दर्शनं वयमागतः स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा १४ मृगो भूत्वाश्रमद्वारि रामस्य विचचार ह स तु रूपं समास्थाय महदद्भुतदर्शनं १५ मणिप्रवरशृंगाग्रः सिता सितमुखाकृतिः रक्तपद्मोत्पलमुखैरिंद्रनीलोत्पलश्रवाः १६ ॥ ॥

रत्नाकारसृंगाग्रः मणिशृंगः केवलं इंद्रनीले इति कविसमयः इति कनकः क्वचित् सिताकृविद। सितासितमुखाकृतिः शोभायमानः तेदेवाह रक्तपद्मोत्पले इति उत्पलं नीलोत्पलं इंद्रनीलवत्तश्रवः

भ.टी.स.का. ॥ ५८ ॥

वा०　मधूकपुष्पसदृशपार्श्वहृदयः केजपद्मेति किंजल्कसदृशवर्णः १७ सुसंहतः स्निग्धसंधिर्वपुः १८

रा० आ०　१९ प्रज्वलयन् प्रदीपयन् २० पादपलानि विचरन् भक्षयन् गच्छन् गते गच्छति २१ विटपमिति क्रिया

१५२

259

किंचिदभ्युन्नतग्रीवः इन्द्रनीलनिभोदरः मधूकनिभपार्श्वश्च कंजकिंजल्कसंनिभः १७ वै
डूर्यसंकाशखुरस्तनुजंघः सुसंहतः इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वविराजितः १८ मनो
हरः स्निग्धवर्णो रत्नैर्नानाविधैर्वृतः क्षणेन राक्षसो जातो मृगः परमशोभनः १९ वनं प्र
ज्वलयन् रम्यं रामाश्रमपदं च तत् मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः २० प्रलोभना
र्थं वैदेह्या नानाधातुविचित्रितः विचरन् गच्छते सम्यक् शाद्वलानि समन्ततः २१ रूप्यैर्बि
न्दुशतैश्चित्रो भूत्वा च प्रियदर्शनः विटपीनां किसलयान्भङ्क्त्वादन् विचचार ह २२ कदली
गृहकं गत्वा कर्णिकारानितस्ततः समाश्रयन्मन्दगतिं सीतासंदर्शनं ततः २३ राजीवचि
त्रपृष्ठः स विरराज महामृगः रामाश्रमपदाभ्याशे विचचार यथासुखम् २४ पुनर्गत्वा
निवृत्तश्च विचचार मृगोत्तमः गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते २५ ॥ ॥

विशेषणं विटपीनामिति दीर्घ आर्षः छेदोनुरोधात् भक्त्वादन् निपाते आर्ष अनुनासिक
लोपः २२ कदलीगृहकं कदलीवाटिकां कर्णिकाभान् मन्दं च गत्वा समाश्रयन् सीतासंदर्शनमपे
हीतवान् ततो मदगतिं समाश्रयन् विचचार राजव २३ २४ २५ ॥ ॥ १५२

259A

मृगयूथानिगच्छतितस्यपृष्ठतोगच्छतीत्यर्थः २९ २२ विनिष्पतन्प्रागल्भ्येनकुर्वन्इत्यर्थः विद्रवंतिग्रस्ता
ननिवृत्यादितिशेषः २५ मृगवधरतोपिभावस्यरावणस्यसंछादनार्थंसंस्पृष्टान्नपिमृगान्नभक्षयति ३१
प्रपचयोग्रहणंप्रत्याख्योनकृतक्रमानामपचयोग्रामाणिपिप्पिरांतकालोपयोगपवान्स्वरभिर्भासोजातपु
ष्पफलद्रुमःइतिसंतापयतिसौमित्रेक्रूरस्वेनवनानिलःइतिचपंपातीरेरामोक्तेश्चकिंचाग्रेद्वादशमासान्त

विकीर्णेश्चपुनर्भूमौपुनरेवनिर्षेदुरिति आश्रमद्वारमागम्यमृगयूथानिगच्छति २९ मृगयू
थैरनुगतःपुनरेवनिवर्तते सीतादर्शनमाकांक्षन्राक्षसोमृगतांगतः २७ परिभ्रमतिचित्राणि
मंडलानिविनिष्पतन् समुद्वीक्ष्यचसर्वेतंमृगायेमेवनेचराः २८ उपगम्यसमाघ्रायविद्रवंति
दिशोदश राक्षसःसोपितान्वन्यान्मृगान्मृगवधेरतः २५ प्रच्छादनार्थंभावस्यनभक्षयतिसंस्पृशा
न् तस्मिन्नेवततःकालेवैदेहीशुभलोचना ३० कुसुमापचयेव्यग्रापादपानभ्यवर्तत कर्णिका
रानशोकांश्चूतांश्चमदिरेक्षणा ३१ ॥

रंयथैषामानंगीकरोतितत्रैनोहन्तीतिरावणश्रुतिरतानतोहनूमद्दर्शनकालेतंप्रतिसीतावाक्यंवर्तते
दशमोमासोद्वावशेषौप्लवंगमइतिसंगच्छतेमासेश्चक्राशंभ्याहरणेहिमार्गशुक्लाष्टम्यांततोवीगवया
दशमसमास्यानस्यवर्तमानत्वात्किंरसंगतेवस्यात्तत्कुलक्षपतांतेनहनूमनलदर्शनात् ३१ ॥ ॥

वा॰ अनर्हा वनवासस्य मनेन नगरस्वासः सुचितः ३१ रूप्यं रजतं धातवो गैरिकादयस्तान्स्पृष्टा पारोमपुलकं ३२

रा॰ आ॰ ३३ ३४ इत्यार्षे रामा॰ टि॰ वना॰ द्विपञ्चाशः सर्गः ५२ सा तमिति मृष्टहाटकं शुद्धहेम तत्स्पृष्टा पार्श्ववर्णं चक्रंदस्या

५२

260

कुसुमान्यपचिन्वंती चचार रुचिरानना। अनर्हा वनवासस्य सा तं रत्नमयं मृगं ३२ मुक्तामणिवि
चित्रांगमद्राक्षीत्परमांगना। तं वै रुचिरदंतोष्ठं रूप्यधातुतनूरुहं विस्मयोत्फुल्लनयना सस्नेहं स
मुदैक्षत स च तां रामदयितां पश्यन्मायामयो मृगः ३४ विचचार ततस्तत्र दीपयन्निव तद्वनं
अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगं ३५ विस्मयं परमं सीता जगाम जनकात्मजा। इत्यार्षे रामा
यणे आर॰ द्विपञ्चाशः सर्गः ५२ सा तं संप्रेक्ष्य सुश्रोणी कुसुमानि विचिन्वती हेमराजतवर्णा
भ्यां पार्श्वाभ्यामुपशोभितं १ प्रहृष्टा चानवद्यांगी मृष्टहाटकवर्णिनी भर्तारमपि चाक्रंद
लक्ष्मणं चैव सायुधं २ आहूयाहूय च पुनस्तं मृगं साधु वीक्षते आगच्छागच्छ शीघ्रं वै आर्य
पुत्र सहानुजः ३ तावाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ वीक्षमाणौ तु तं देशं तदा ददृ
शतुर्मृगं ४ शंकमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् तमेवैनमहं मन्ये मारीचं रा
क्षसं मृगं ५

हृतवानस्म्यहमनेकधा दिः चक्रंदेति रोदनार्थेन भाविशुभमपि सूचितं कविना २३ तावाहूतौ सीतयेति ५२

260A

मृगयांचरेतःसंकुर्वतःउपोधिनामृगरूपछलेन ६ अस्यमायाविदोमायायाकृतासाम्रगरूपमिदंकृतं
मायेयंमृगरूपेणापरिणतेत्यर्थः भ्रातृमन्मकामापुतेगंधर्वपुरवदापातरमणीयं ७ नास्तिएवंमृगपादानंक
मृगाणांसंभवात् ८ काकुत्स्थलक्ष्मणंप्रतिवार्यनायंरात्तसोपिनचित्रमृगोनेततन्मृगणांविचित्रत्वयाकार्यंइ

वंतेनोमृगयाहृष्टाःपापेनोपाधिनावने अनेननिहताराम राजानःपापरूपिणा ६ अस्यमाया
विदोमायामृगरूपमिदंकृतं भ्रातृमन्मुरूषव्याघ्रगंधर्वपुरसन्निभं ७ मृगोह्येवंविदोरत्नविचि
त्रोनास्तिराघव जगत्यांजगतीनाथमायैषाहिनसंशयः ८ एवंब्रुवाणंकाकुत्स्थंप्रतिवार्यशुचि
स्मिता उवाचसीतासंहृष्टाछद्मनाहृतचेतना ९ आर्यपुत्राभिरामोसौमृगोहरतिमेमनः
आनयैनंमहाबाहोक्रीडार्थंनोभविष्यति १० इहाश्रमपदेस्माकंबहवःपुण्यदर्शनाः मृगाश्च
रंतिसहितामृमराःसमराःस्तथा ११ ऋक्षाःपृषतसंघाश्चवानराःकिन्नरास्तथा विहरंतिमहा
बाहोरूपश्रेष्ठामहाबलाः १२ नचान्यःसदृशोराजन्दृष्टःपूर्वोमृगोमया तेजसाक्षमयादीप्त्या
यथायंमृगसत्तमः १३ ॥

मुक्तेत्यर्थः पापेनाधर्मवनेनहताचेतनायेव ९ नोस्माकंअयोध्यागमनोत्तरंतत्रत्यसख्याभिप्रायेणाव
हृवचनं १० मृमराःश्वमराःकुरंगपृषतकृपुष्टा ११ १२ अन्यःसदृशःएतत्सदृशोन्यइत्यर्थः तेजसाविचित्र
गतिसामर्थ्येनक्षमयासौम्यभावेनदीप्त्यादेहकांत्या १३ ॥
॥

वा. प्राणासत्त्रिभवेनाह्लादकत्वं १४ स्वरसंपत्श्रुतिसमृद्धिः १५ नवगरहूणांनवकर्नरकग्रहूणांजीवतोग्रहूणामा
रा.सु. श्चर्यभूतंभवतियतोतोविस्मयंजनयिष्यति १६ १७ १८ हतोपियदितेग्रहूणंप्राप्नोतितदापिमेप्रयोजन।
५४ मित्याह अजिनमिति १९ शष्पबृस्यावालत्वणपरिकल्पितनापस्यासनेविनितायामस्यजाम्बूनदमयत्व

26)

नानावर्णाविचित्रोमोरत्नभूतोममाग्रतः द्योतयन्वनमथाग्रेयोवतेपावकसन्निभः २० अहोरू
पमहोलक्ष्मीःस्वरसंपच्चशोभना मृगोद्भुतोविचित्रोगौहृदयंहरतीवमे २१ यदिग्रहणमभ्ये
तिजीवन्नेवमृगःत्वव आश्चर्यभूतंभवतिविस्मयंजनयिष्यसि २२ समाप्तवनवासानाराज्यस्था
नाःपुनःपुनः अन्तःपुरेविभूषार्थोमृगएवभविष्यति २३ भरतस्यार्यपुत्रस्यश्वश्रूणांचममप्रभो
मृगरूपमिदंदिव्यंविस्मयंजनयिष्यति २४ जीवनयदितेभ्येतिग्रहणंमृगसत्तमः अजिनंनर
शार्दूलरुचिरंतुभविष्यति २५ निहतस्यास्यसत्त्वस्यजाम्बूनदमयत्वचि शष्पबृस्यांविनीतायामिच्छाम्य
हमुपासितुं २६ कामवृत्तमिदंरौद्रंस्त्रीणामसदृशंमतं वपुषात्वस्यसत्त्वस्यविस्मयोजनितोमम
२७ ॥

विदपासितुंतंनसमीपस्थांतंरक्ष्यामी यद्धाभगवदुपासनोकर्तुमिच्छामीमर्थः २८ इदंकामेनस्वप्रयोजा
नेच्छयापतिनियोजनरूपंरौद्रंअतएवस्त्रीणामसदृशंकेकेयीवत् इतिममनिर्बंधेननयाभिप्रायस्यमन।
स्यवपुषाममविस्मयोजनितइतिज्ञानइतिकौतुकनिर्बन्धमर्थमनुचितमपिकरोमीतिशेषः २९ ॥ ५४

261A

काञ्चनरूपेणेति पारे रूपेण मृगेण रूपं मृगेपि विज्ञेयमिति हलायुधः नदत्रसदृशानानाविंहगलविन
तानन्मृगसदृशो २२ राघवस्यापिसंभाविता संभावितवृत्तान्तनिरूपणकुशलमनेरपिमनोविस्मयमा
गतश्रामतस्तिवदभ्रूवभ्रूविनयवतायाः श्रावत्यात् २३ तदेवाहलोभितइति २४ रूपेणअलौकिकविवि
वसरूपेणइत्यर्थः सर्वप्रहृष्टरूपेणहेतुनाअयपथमृगोनभविष्यती नभविष्यतिजीवनमस्यनसंभावितमि

तेनकांचनरोमाणातुमणिप्रवरशृंगिणा तरुणादित्यवर्णेननक्षत्रपथवर्चसा २२ बभूवरा
घवस्यापिमनोविस्मयमागतं इतिसीतावचःश्रुत्वा दृष्ट्वाचमृगमद्भुतं २३ लोभितस्तेनरूपेण
सीतयाचप्रचोदितः उवाचराघवोहृष्टोभ्रातरंलक्ष्मणंवचः २४ पश्यलक्ष्मणवैदेह्याःस्पृहाम्मृग
सितामिमां रूपश्रेष्ठतयाह्येषमृगोद्यनभविष्यति २५ नवनेनंदनोद्देशेनचैत्ररथसंश्रये कुतः
पृथिव्यांसौमित्रेयोस्यकश्चित्समोमृगः २६ प्रतिलोमानुलोमाश्चरुचिरारोमराजयः शोभंते
मृगमाश्रिताश्चित्राःकनकबिंदुभिः २७ ॥

स्पर्धः श्रायेणामृगात्मत्रनसंभावितमित्यर्थइतिकतकः २५ नंदनइन्द्रोद्यानं कीर्तनेयस्यनत्ववनेचै
त्ररथसंश्रयेनदाख्यवनेपिनयोस्यकश्चित्समोमृगः सपृथिव्यामस्तिइतिकुतःसंभाव्यतइत्यर्थः २६
तदेवाहप्रतिलोमेत्यादिकनकबिंदुभिःसहिताःरोमराजयइत्यन्वयः २७ ॥ ॥

वा॰ रा॰ आ॰ २५५ 262

प्यनद्रुदाविफन् २८ मसारगल्लर्कमुखःशंखमुक्तानिभोदरः इतिपाठे मसारः इंद्रनीलस्तस्य गल्लर्कः स्वष
कमलदाकारस्तस्य संपुट इतितीर्थः अतिरूपः इदमिष्ट्यमितिरूपयितमशाकाः पाठोनेयसमादि २९ इः
मांसहेतोरपिविहारार्थं वसंतिकिंपुनरेवंविथतस्त्राभार्थमितिभावः ३१ महावने राजर्षिर्विनिष्पापः व्य
वसायेन मृगवधोद्यमेनानिवीर्यतेसंगत्सेते न सुवनेऊतोयननधाद्ध्यातवइति मणिरत्नसुवर्णचय

पश्यास्यंजृंभमाणास्यदीप्तमग्निशिखोपमं जिह्वांमुखान्निःसरंतींमेघादिवयथातडिद् २८ मसा
रगल्लर्कमुखः शंखमुक्तानिभोदरः कस्यनामाभिरूपोसौनमनोलोभयेन्मृगः २९ कस्यरूपमि
दंदृष्ट्वाजांबूनदमयप्रभं नानारत्नमयंदिव्यंनमनोविस्मयंव्रजेत् ३० मांसहेतोरपिमृगान्वि
हारार्थंचधन्विनः घ्नंतिलक्ष्मणराजानोमृगयायांमहावने ३१ धनानिव्यवसायेनविचीयंते
महावने धातवोविविधाश्चापिमणिरत्नसुवर्णिनः तत्सारमखिलंनृणांधनंनिचयवर्द्धनं
मनसाचिंतितंसर्वंयथाशुक्रस्यलक्ष्मण ३२ ॥

पुत्राद्दृष्णाधातवः वज्रादिमणिसुवर्णादियुक्तालाभादिधातव इतियावत् ३२ निचयवर्द्धनेनद्रव्ये
यंनृणांसारमितिपशालंभवतिशुक्रेवस्तसपर्यंगाशुक्रमकाणमब्रमणामितिश्रुतेः एवंचशुक्रस्य
लोकेयथाप्रसन्नतद्रूपमाप्यन्नस्यमनसाचिंतितंसर्वंसंकल्पमात्रसिद्धंसर्वंभोगवस्तुयथासर्वंस्यात्तथा
रतेरनद्दत् ३३ ॥ २५५

262A

नवक्तव्यापि विचार्य कर्तव्येत्याह अर्थीति अर्थीपेतः प्रमानयेनार्थक्रमेन अर्थनिमित्तेन कर्तव्येनक्र
मेणानन्तसौदर्या(?) दारित्व्रमदद्योः विचारयन्नेव प्रजनितित्क्षेपारन्नार्थन्तमेवार्था अर्थसंपादनवत्तराः अर्थि
प्रासवत्ता अर्थ अर्थपरद्वाच्यमाहुः २४ अतोविचारितैवात्र प्रवृत्तिरित्याह एतस्येति अवकर्तव्यम्‌एतन्न
लेनमहतोर्थस्यासिद्धिरितिगरुदत्तामये २५ अस्यपराध्वेनमेवदर्शायतिनेतिकदल्याद्येनकार

अर्थीयेनार्थक्रमेणनसंत्रत्नयाविचारयन्‌ नमर्थमर्थप्राप्नुत्ताप्राहुरर्थास्तल्लक्षणं २४ एत
स्यमृगारत्वस्यएपार्थेकांचननवि उपवस्यनिवेदहीमयासहस्रमथमा २५ नकादलीन
प्रियकीनप्रवीणीनचाविकी भवेदतस्यसदृशीस्पर्शेनानेननसुमतिः २६ एषचैवमृगश्री
मायप्रदिष्योनभञ्जरः उभावेतौमृगौगादिष्योतारामृगमहीमृगौ २७ ॥ ॥

लीमृदुत्वकर्दूस्नीलाग्ररोमाम्‌गविशेषः कदलीप्रियकीमृदुत्वमस्रसायनरोमपुक्तोमृगः प्रियक
लस्यरंप्रियकीप्रवेणीअजविशेषसंबंधिनी आविकी अविनक्रमेत्येकेनभङ्गिः सर्वथासादृश्याभा
ववोधनायअनेनएतदीयत्वचा २६ यत्रनभञ्जरोमृगः मृगाणिरोनत्तत्ररूपः नदेवाह नारामृ
गेति २७ ॥

वा॰ अथतल्लक्षणामननमंगीकृत्यापिप्रवृत्तिमाह यदिवेति राक्षसमायैषानमृगइतियथार्थोवदसियदिवातथै
रा॰आ॰ वैषभवेत्तथाप्यस्यवधोमयाकर्तव्यएवराक्षसवधस्यप्रतिज्ञातत्वात् ३८ ३९ उत्थायप्रादुर्भूयडन्मुख
५९ वा ४० पुरस्तात्पूर्वंइहदण्डकारण्येस्वगर्भोश्वतरीमिवेति अश्वतरीस्वगर्भेणम्रियतइतिप्रसिद्धिः अश्वतरी

263

यदिवायन्तथायन्मांभवेद्वदसिलक्ष्मण मायैषाराक्षसस्येतिकर्तव्योस्यवधोमया ३८ एतेन
हिनृशंसेनमारीचेनाकृतात्मना वनेविचरतापूर्वंहिंसितामुनिपुंगवाः ३९ उत्थायबहवोयेन
मृगयायांजनाधिपाः निहताःपरमेष्वासास्तस्माद्वध्यस्त्वयंमृगः ४० पुरस्तादिहवातापिःपरि
भूयतपस्विनः उदरस्थोद्विजान्हन्तिस्वगर्भोश्वतरीमिव ४१ सकदाचिच्चिराल्लोकेआससाद
महामुनिं अगस्त्यंतेजसायुक्तंभक्ष्यस्तस्यबभूवह ४२ समुत्थानेचतद्रूपंकर्तुकामंसमीक्ष्य
ते उत्स्मयित्वातुभगवान्वातापिमिदमब्रवीत् ४३ त्वयाविगण्यवातापेपरिभूताश्चतेजसा
जीवलोकेद्विजश्रेष्ठास्तस्मादसिजरांगतः ४४ ॥

गर्दभाद्वडवायामुत्पन्नेतितीर्थः अश्वतरीकर्कटीतिपरे वृश्चिकइतिकतकः अत्राद्यव्याख्यैवज्यायसी
तस्यागर्भस्योदरपाटनेनैवनिःसरणमितिसर्वजनप्रसिद्धेः ४१ ४२ समुत्थानेस्वदेहोत्थानेतद्रूपंउत्स्म
यित्वाईषद्धसित्वा ४३ अविगण्यअविचार्यपापतस्माद्विजपरिभवजपापेनेनजरांजीर्णतांता ४४ ॥ ॥ ५९

263A

योमारीवोमहिंपमतिमन्येनानिक्रामेतनदातोपिमारीवाख्यवानापिरिवनभवेदेवनजीवेदेव ४५
उक्रमेवार्थपुनरेवाहदार्याय भवेदितिमामागानः प्राज्ञोमारीवोःगास्येनवानापिरिवपाहतोभवेतम
विष्यतीमर्थः सन्नहः धनः कवचारिष्णुक्रः यत्रितः पत्नवानवापारांनरहीनः ४६ अस्माकंयत्कुमममा
वमपकंकर्तव्यंनरस्यामेतदरक्षणाविषयेप्रायतेस्थितनन्यथाकुंमवमावयानास्तिश्वसकर्तव्यमाह

तदुक्तोपिनभवदववानापिरिवलक्षणमहियोतिमन्येतपर्मनित्यंजितेंद्रियं भवेद्वतोयं
वानापिरागस्येनेवमागतः इहत्वंभवमन्नहोयवितोरक्तमैथिली अस्मामायतमस्माकंय
क्रुमरक्षुनंदन अहमेनंवधिष्यामिग्रहीष्यामथवारणे ४७ यावज्जीवामिसौमित्रेम्रगा
मानयितंद्रुतं पणपलक्षणंवैदेहस्यामस्गतव्यिगतास्पृहा ४८ नवाप्रयानयास्येषमृगोद्य
नभविष्यति अप्रमतेननतेभाव्यमाश्रमस्थेनसीतया ४९ ॥ राम ॥

अहमिति अत्रपूर्वश्लोकस्यानर्थपूर्वश्लोकेणअर्थचित्तितार्थत्रयाणांहीनोनियतत्वाद्दितः सोनारक्तयदस्मा
कंक्रममवतारग्रहणप्रयोजनंनतदस्मामायतेआनेयवसाधनीयमित्यपिसूचितं ४७ यावत्गृह्णामि।
गमिष्यामीत्यर्थः आनयितंआनेतुनत्रहेतुः पृष्ठमिति ४८ प्रधानयासर्वानमयानभविष्यातिनजीविष्य
तिअनेनजीवनोग्रहणामसृणकर्मेतिदर्शितंनेनयासीतयासहतिशेषः अनयाआश्रमेतिकर्तव्यवेत्।

= [illegible]

बा॰ यावद्दिति तावदश्रमेतेन भाव्यमित्यन्वयः ५॰ श्रदक्षिणेन समर्थेन सर्वतः सर्वदिग्वर्त्तिरक्षोभ्यः ५।
रा॰ प्रा॰ इत्यार्षे रामायणे तिलके विचनारिंशः सर्गः ४२ ˜˜˜ स्मरूः स्वयमुषि १ मध्ये स्थूलत्रये यविनन्ते आत्मवि।
५० भूषणं चापमप्यवीरालंकारं नातस्याममविभूषणं मनेना गस्यपरते वस्सवमिति स्यचिन्तं कलापो नाम्णीरे १

264

यावन्नृषतमेकेन सायकेन निहन्म्यहं हवैतच्चर्म आदाय शीघ्रमेष्यामि लक्ष्मण ५॰ प्रदक्षि
णेनातिबलेन मपक्षिणा जटायुषा बुद्धिमता च लक्ष्मण भवाप्रमत्तः प्रतिगृह्य मैथिलीं प्रतिक्षणं
सर्वतः एव शंकितः ५। इत्यार्षे रामायणे आरण्यकाण्डे विचत्वारिंशः सर्गः ४३ तयन्तु तं समु
दिश्य भ्रातरं रघुनन्दनः दधार असिं महातेजा जाम्बूनदमयत्सरुं १ ततस्त्रिविनतं चापमादा
यात्मविभूषणं आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः २ तं वन्यराजो राजेन्द्रमापतन्तं
निरीक्ष्य वै बभूवान्तर्हितः त्रासात् पुनः संदर्शने भवत् ३ बद्धासिर्धनुरादाय प्राद्रवद्यतो मृ
गः तं स रूपं पतिरूपेणा ग्रतः पश्यन्तमिवाग्रतः ४ अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिर्महावने अ
तिवृत्तमिषोः पातात् लोभयानं कदाचन ५ ॥

वन्यस्तनः वन्यानां मृगाणां राजा विचित्रमृगत्वात् पुनः संदर्शने दृष्टविषये ३ रूपेण स्वरूपेण आग्रतो यो
तयन्तं योतमानमिव स्थितं ५ अतिवृत्तं अतिक्रान्तं कदाचन लोभयानं हस्तप्राप्तमिव दृश्यमानं ५ ॥ ५०

264A

शोकितमिष्टयातादितिशेषः वनोद्देशेषु कुचित्दृश्यमानं क्वचिदृश्यमाने ६ छिन्नाभ्रसंवीतचन्द्रसा
दृश्यापपादकमुत्तरार्धं ७ दर्शनादर्शनेनैव हेतुकवन्द्रावसमृगतोगतो मारीचो साश्रमस्य हेराघवतञ्जार्थः

शोकितेन समुद्भ्रान्तेन स्तेनामिवाम्बरे दृश्यमानम दृश्यं च वनोद्देशेषु केषुचित् ६ छिन्नाभ्रैरिव
संवीतं शारदं चन्द्रमण्डले मुहूर्तादेव ददृशे मुहूर्तराद्वकाशते ७ दर्शनादर्शनेनैव सोपाकर्ष
तराघवं सुदूरमाश्रमस्यास्य मारीचो मृगतांगतः ८ आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मो
हितः अथावतस्थे सुश्रान्तश्छायामाश्रित्य शाद्वले ९ स तमुन्मादयामास मृगरूपो निशाचरः
मृगैः परिवृतो धावन्नदूरात्प्रत्यदृश्यत १० गृहीतुकामं दृष्ट्वा तं पुनरेवाभ्यधावत तत्क्षणादेव
संत्रासात्पुनरन्तर्हितो भवेत् ११ पुनरेव ततो दूराद्वृक्षखण्डाद्विनिःसृतः दृष्ट्वा रामो महातेजास्तं
हन्तुं कृतनिश्चयः १२ भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः सूर्यरश्मिप्रतीकाशं ज्वलन्तमरि
मर्दनं १३ संधाय सुदृढे चापे विकृष्य बलवद्बली तमेव मृगमुद्दिश्य ज्वलन्तमिव पन्नगं १४

८ तेन दर्शनादर्शनेन विलोभ्य मोहयता मारीचेन मोहितो विवितः विवशस्तत्क्षणकलोभपरवशः स्वसुत
संभ्रान्तश्छायामाश्रित्यावतस्थे ९ उन्मादयामास बहुदूरदेशनेन चित्तविभ्रमं चकार १० ११ भूयः कुपितस्तत्र

वा·
रा·आ
५८
265

ब्रह्मविनिर्मितमस्त्रं ब्रह्मास्त्रं ब्रह्मदत्तं बाणं च मृगरूपस्य तद्रूपस्य मायाकृतरूपेण पदत्वस्य विपरीतस्थित
स्य १५ मारीचस्यैव हृदयं अनन्तं तत्कृतमायामृगाकारमात्रस्य तालमात्रमुत्प्लुत्य पारे वेगकृतवेधात्तु इति शे
षः १६ १७ तद्वचनं राघवस्य वचनं दध्यौ ध्यानं कृतवान् केन प्रकारेण तेनोपायेन सीता लक्ष्मणं प्रस्थापयेत् तावत्

मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितं स भृशं मृगरूपस्य विनिर्भिद्य शरोत्तमः १५ मारीच
स्यैव हृदयं विभेदाशनिसन्निभः तालमात्रमथोत्प्लुत्य न्यपतत्स भृशातुरः १६ व्यनदद्भैरवं ना
दं धरण्यामल्पजीवितः म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुं १७ स्मृत्वा तद्वचनं रक्षो द
ध्यौ केन तु लक्ष्मणं इह प्रस्थापयेत्सीतां तां शून्ये रावणो हरेत् १८ स प्राप्तकालमादाय चका
र च ततः स्वनं सदृशं राघवस्यैव हा सीते लक्ष्मणेति च १९ तेन मर्मणि निर्विद्धः शरेणानुपमेन
हि मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमास्थितः २० चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् तं
दृष्ट्वा पतितं भूमौ राक्षसं भीमदर्शनं २१ रामो रुधिरसिक्ताङ्गं चेष्टमानं महीतले जगाम म
नसा सीतां लक्ष्मणस्य वचः स्मरन् २२ ॥

येन रावणो हरेदिति दध्यौ १८ प्राप्तकालमाज्ञाय रावणोक्तमुपायमेव प्राप्तं मत्वा १९ मर्मणि प्राणस्थाने
रक्तम् इदं राक्षसं रूपमास्थितः पूर्वोक्तरूपं च चक्रे त्यजन् मृगः २० सुमहाकायाः महाशरीरे २१ २२ ॥ ५८

265A

लक्ष्मणवचनवाद्दपवाद्दमारीचस्यानिति २३ सीताकथंभवेत्किंश्रूर्यैपनाटपितालक्ष्मणंप्रेषयेत्तउत्त।
धीराभवेदितिसर्थ: २४ कामवस्थांश्रुपैयापरितिपाघ: हृष्टतनूरुह: श्रामादिवेरामोविततनु: वृक्षतनुपतन्न
नेनसर्वकार्यनिष्पतिरितिहृष्टाद्रामोविततनु: २५ तद्वनटवृतमनुष्यरूपतानाञ्जयशोकादिमनेनकथ्या।
नोतिकविश्वपिसर्वलोकवेद्यंतथैवाह तत्ररामभयमितितानिकमर्थंतद्हृष्टतनूरुह: इतिहृष्टपदेनश्रा

मारीचस्तुमायैषापूर्वोक्तालक्ष्मणेनतु ततथाह्यभवच्चाद्यमारीचोयंमयाहत: २४ हासी
तेलक्ष्मणेत्येवमाक्रुश्यतुमहास्वने ममारराक्षस:सोयंश्रुत्वासीताकथंभवेत् २५ लक्ष्मणश्च
महाबाहु:कामवस्थांगमिष्यति इतिसंचिन्त्यधर्मात्मारामोहृष्टतनूरुह: २६ तत्ररामंभयं
तीव्रमाविवेशविषादजं राक्षसंमृगरूपंतंहत्वाश्रुत्वाचतत्स्वनं २७ निहत्यपृषतंचान्यंमांस
मादायराघव: त्वरमाणोजनस्थानंससाराभिमुखस्तदा २८ इत्यार्षेरामायणेआरण्यकाण्डेचतु
श्चत्वारिंश:सर्ग: ४४ आर्तस्वरंतुतंभर्तुर्विज्ञायसदृशंवने उवाचलक्ष्मणंसीतागच्छजानी
हिराघवं १ नहिमेजीवितंस्थानेहृदयंवावतिष्ठते क्रोशत:परमार्तस्यश्रुत:शब्दोमयाभृशं
२ ॥

गेवक्ष्यतितथात् २८ पृषतंमृगंजनस्थानमभिमुखंजनस्थानंवर्तनिजाश्रमाभिमुखं २७ इत्यारण्येरा।
मायणतिलकेचतुश्चत्वारिंश:सर्ग: ४४ अथसीताराघवविषयशोकतनाटतेनलक्ष्मणंप्रहापयतिश्रा
र्तेतिभर्तु:स्वरंसदृशंस्वरंभर्तु:स्वरस्येवज्ञात्वेत्यर्थ: १ क्रोशत:रामस्य २ ॥ ॥

वा॰ रा॰ अ॰ ५५

266

३ आज्ञायपृष्ठमनंप्रश्नमतेननेभाव्यमाश्रमस्थेनसीतयेमंक्रमनुचिंत्येत्यर्थः ४ त्वमितात्वमिनेवपु
त्रवत्तदानुयोगाहृतः ५ ततेवाहृयत्वमितिनाभिपृष्यसेनप्राप्नोमिश्वरितिमत्कृतेमत्परिग्रहार्थं ६ ७ वि
प्रवृत्तिस्थलंयथातथाविप्राच्युतिपृष्ठतरेवद्वत्सेणविदायकथंगच्छामीम्यहाकिंहीतियोगामः प्र
थानंयस्मसयस्थानस्तमिहागतस्तस्मिनरामेसंप्राप्यमापन्नेसतिमयातिष्ठत्यानत्वद्वसद्वत्सेणनजीवे

आक्रंदमानेनवनेभ्रातरेवान्नमर्हसि तेतिभ्रमभिधावनंभ्रातरेपारक्षितः ३ रक्षसांवध।
मापन्नसिदानामिवगोवृषं नजगामसतयाक्तस्तभ्रातुराज्ञायपृष्ठासन ४ नमुवाचततस्तत्र
त्वमितापनकान्यया सौमित्रेमित्ररूपेणभ्रातुस्त्वमसिपृष्ठवत् ५ यस्त्वमस्यामवस्थायां
भ्रातरंनाभिपद्यसे इच्छसित्वंविनश्यंतंरामंलक्ष्मणमत्कृते ६ लोभात्तुमत्कृतेनूनंनानुगच्छ
सिराघवं व्यसनंतेप्रियंमन्येस्नेहोभ्रातरिनास्तिते ७ तेनतिष्ठसिविस्रब्धस्तमपश्यन्महा
द्युति किंहिसंशयमापन्नेतस्मिन्निहमयाभवेत ८ ॥ ॥

त्याकिंकर्तव्यंभवेत्तदभावेमरणमेवश्रेयस्तद्येनकेनापिभवत्त्वत्रतस्माद्वान्येनजंतुनावास्वतोबुद्धि
प्रवेषणादिनावेतिभावः अग्रजांचंधनिः रावतसंहारप्रधानकार्यकरणायागतस्यतवतद्वातर्वातस्मि
नकार्येइदमदवस्थित्यासंशयमापन्नेइच्छजीवंत्वमयाकिंकार्यंभवेत्सर्वत्रोत्यतिस्थितिसंहारेषु
तवभ्रातुरहमेवसहकारिणीप्रकृतस्त्वंसंहारोपक्रमतस्थित्यानिवर्तनइति ८ ॥ ॥ ५५

266A

९ एवं बोधितस्ततोऽपि मानुष्यनटेन न लोकव्यवहारानुसारात्तल्लग्नो ॰ यदिदमाह स्म अब्रवीदिति १० ॥ १२
न मया विधृतं तेन सौरदेवत्वमर्थ्यं न स विधृतो न शक्रेण तद्रमकस्त्वाह योगममिति १३ बलवतामिन्द्रादीनामपि ब
लेन तस्य बलमनिवार्यमशेषम् १४ तवनया १५ स सरोगयुक्तेन स्पृष्टं न स्पृशामस्य न भवति देवतः अपारी देव

कर्तव्यमिह हतिं हन्तापयन्नथानस्त्वमागतः एवं श्रुत्वा गौवेदेही वाष्पशोकसमन्विता ९ अब्रवील
क्ष्मणः त्वं तामीतामस्यागवधूमिव पन्नगाम्स्वगन्धर्वदेवदानवगात्तमेः १० अथाकाले त्वं वैदेहीम
ताजितेन संशयः देवि देव मनुष्येषु गन्धर्वेषु पतत्रिषु ११ राक्षसेषु पिशाचेषु किंनरेषु मृगेषु च
दानवेषु च घोरेषु न स विद्येत शोभने १२ यो रामं प्रतियुध्येत समरे वासवोपमं अवध्यः समरे
रामो नैवं त्वं वक्तुमर्हसि १३ न त्वामस्मिन्वने हातुमुत्सहे राघवं विना अनिवार्यं बलं तस्य बलै
र्बलवतामपि १४ त्रिभिर्लोकैः समुदितैः सश्वरैः सामरैरपि हृदयं निर्वृतं तेऽस्तु संतापस्त्यज्यतां
तव १५ आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमं न स तस्य स्वरो व्यक्तं न कश्चिदपि दैवतः १६ गो
र्धर्वनगरप्रख्या माया सा तस्य रक्षसः न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना १७ ॥ ॥

तामसंबंधी कश्चित्स्वरश्चापि नैतत्पूर्वः तदापि पर्यं कायुक्तानात्वमपीत्यर्थः १६ किंनरहिं गंधर्वनगरप्र
ख्यातद्दष्टमिथ्यात स्वरस्ते सा मायैवं देवं वन्यनार्थं न तत्कृतोयं स्वरस्त्यर्थः त्वन्न्यासरूपतयामपि निर्दिष्टासि प्र
नः तोस्मत्तोन्नो त्वत्सहे रघुनन्दनान्वयः १७ ॥
॥

वा० रा० आ० १० खरस्य निधने रामेण कृते मतिर्जनस्थानवधं जनस्थानवर्तिनस्तु परिकररक्षोवधं श्रुत्वा निलस्य हृतेनैव राद
मन्वयः ॥ व्याहरंति स्म सधा मोहनार्थं मनस्तोल्पकृतेनोऽस्महे १९ हिंसैव साधुजनपीडैव विहारो येषां तेन
षाड्दण्डकावनं विप्रत स्वरामस्यावेक्षणं न चिंतयितुमर्हसि २० अनार्यकरुणारंभ अनार्या क्रामितया करु
णा पापाभमव्यसनेपि महिषयथा आरंभा महत्तत्ताणारंभाय सज्जनस्तेवा यन २१ तेन राम व्यसनं प्रियं मन्येन अत्र

रामेण त्वं वरो रोहे न त्वं न्यक्कुर्मिहोत्सहे हतं वैरा श्रुकस्माणिव यमैतैर्निशाचरः १८ खरस्य
निधने देवि जनस्थानवधं प्रति राक्षसा विविधा वाचो व्याहरंति महावने १९ हिंसाविहारा वैदे
हि न चिंतयितुमर्हसि लक्ष्मणेनैव मुक्तास्तु क्रुद्धा सरक्तलोचना २० अब्रवीत्परुषं वाक्यं लक्ष्म
णं सत्यवादिनं अनार्यकरुणारंभ नृशंसकुलपांसन २१ अहं तव प्रियं मन्ये रामस्य व्यसनं
महत् रामस्य व्यसने दृष्ट्वा तेनैतानि प्रभाषसे २२ नैव चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत्
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु २३ सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि मम हेतोः
प्रतिच्छन्नः प्रयुक्तो भरतेन वा २४ ॥

राम व्यसनं राम स्वप्रतिज्ञानार्थं सर्वरक्षोवधरूपस्य हानिस्तत्प्रयत्नेनेति गच्छतामर्थे अत एषां मद्विष
याकरुणा अनार्या क्रामिता प्रधानकार्यविरोधिनान्तरितिवोध्य २२ अथ पुनर्नैटवरा हते वैमात्रिस्य प
त्नेषु शान्तिमान् सुदुष्टः स्वतराडुष्टहृदयः २४ ॥ ॥ १०

2 6 7

ॐ

267A

तत्रस्थितिमत्यादिग्रहरूपं २५ उपसंश्लिष्यउपभुज्य २६ २७ २८ अप्रतिरूपमसंतानुचितं २९
तोन्नाः हेमाः भद्रकराः फेनोहेवितिदः स्तनभारस्य विमादौ रीति पाषः ३० वतेवराः देवाइतिपाषः
३१ यस्तुरूपगुणसंपदुपश्रावितिप्रोजननाययसमानमेमेवावागतोवरहेभ... विपाकसेतत
पवदोषादयोविनष्टवतीमास्तत्रविनापाविपरीतमतित्वातांपिकइत्यर्थः अत्रेनपोनोपछा ः

तत्रस्थितिसौमित्रेत्वयापि भर्त्स्यता । कथमीदृशरूपामेतामसंपश्यसि भेत्तुं २५ उ
पसंश्लिष्यभर्तारं कामये पृथक् जनं समक्षं तव सौमित्रे प्राणांस्त्यक्ष्यामि संशयं २६
रामं विना क्षणमपि नव जीवामि भूतले रक्तः परुषं वाक्यं श्रुत्वा रोमहर्षणं २७ अ
ब्रवीत् लक्ष्मणः सीतां प्रांजलिः संजितेन्द्रियः उत्तरं नोत्सहे वक्तुं दैवतं भवती मम २८ वा
क्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि स्वभावस्त्वेष नारीणामेषु लोकेषु दृश्यते २९
विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे
३० श्रोत्रयोरुभयोर्मध्ये तप्तनाराचसन्निभं उपश्रृण्वन्तु मे सर्वे साक्षिणो हि वनेचराः ३१
न्यायवादी यथा वाक्यमुक्तोहं परुषं त्वया धिक्त्वामद्य विनश्यन्तीं यन्मामेवं विपाके
से ३२

पः तेनरावत्सकुलस्यनाशेछावतीत्वांपिकयतोयदर्थमामेवंतिविपाक
सेवदोसिशतेनगदं यदाविपसतीशांकितयाप्रतिहतापरिणाममरूपाणविनश्यन्तींतांपिक
यन्मात्वदस्पष्टंवदाक्रमणायामयमेवंविपाकसेतदाक्रांतेषुकिल्लेवंसभावेनेति ३२ ॥

रा. पुनर्द्वैधानुसारेणाह स्त्रीत्वात्तदुष्टस्वभावेन क्रौर्येणायुक्तां तेगुरुवाक्ये स्थितनियोगेस्थितं मामे
बा.अ. वं ब्रूषे इति पोषातोयत्र काकुत्स्थस्तत्र गच्छामि गामिष्यते स्वस्त्यस्तु सर्वत इति शेषः ३३ वाणी
१०१

268

स्त्रीदुष्टस्वभावेण गुरुवाक्ये व्यवस्थितं गच्छा
मि यत्र काकुत्स्थः स्वस्ति तेस्तु वरानने ३३ ततस्त
तो विपणल्लादित्सम ग्रावनदेवताः निमित्तानि हि घो
राणि यानि प्राडुर्भवंति मे ३४ अपि त्वां सह रामेण पश्ये
यं पुनरागताः लक्ष्मणेनैवमुक्ता तु रुदंती जनका
त्मजा प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता
३५ गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण
आबंधिष्येथवा त्यक्ष्ये विषमे देहमात्मनः
३६

१०१

निर्देशी [illegible] निमित्तानि मे
प्राडुर्भवंतीति तेस्त्वत्र सीतां संकल्पानो हं रामेण सह पुनरागतस्त्वां पश्येयं यत्तदपि संभवेदित्यर्थः ३४
किमनेन मम आत्म्य पुरुषप्रसंगः शकांत इति मन्यमाना खरा सं प्रकाशयति लक्ष्मणेनेति ३५ ३६

268 A

ने

ग्रीवांधेक्ष्यरज्ज्वाकंठमितिशेषः विषमेभ्यत्वाविषमैस्थित्वाततःप्रयातैतिशेषः सर्वथाकर्तव्य
मर्थमाह प्रवेक्ष्यामिहुताशनेअतएवात्रवापरंत्वन्यकिः अनेनसाक्षात्द्वावर्णान्हनेनाभिध्यामि
किंतर्हिस्वरूपेणप्रौस्थितामायथैवतद्दसंगमिष्यामीतिध्वनितं तदुक्तं शौरामस्य
भगाभार्यांतावगोप्तसम्प्रभुः सीताविशालनयनाचकमेकालनोदितः रहेहनामायथावि
षचातीविजनेवने समाहृतेमनस्वकृतापसीकिलकामिनी वितापसाचनद्भावस्यतादृशी

पिवामिवाविषंतीक्ष्णंप्रवेक्ष्यामिहुताशनं
नचाहंराघवादन्यंकदापिपुरुषंस्पृशे ॥९०

रर्थःपातिं तदावं लंकायामेवहृदिकृतंतत्प्रमोभ्यमाहरिष्यामीतिभावमित्यर्थः जगामसा
सावृक्षिमावसस्थेष्वशुचिस्मिता प्रपद्ययावकंदेवमार्गंनागोविश्वनोमुखे आत्मानंदीपवत्
षसवंभनहर्तेस्थितामित्यायथप्रोक्ताकानन्का शेतवद्यएकंजम्बाराममपत्नीवर्णास्विनीस्थायं
तीसन सातस्यारामसमुन्मीलिततया अथावसम्यगाहगवानहृस्वबाहोमहेश्वरः आवि।
९६ रामात्सुदीप्तान्मार्तजसानि हान्निवससामायामयीसीतांसमवरावर्णावधेच्छयासीतामादायरामे

रा॰ हृत्वात्तु रावणो वधं रामोल्लक्ष्मणोसंयुतः समादाय भवत्सीतां शोकाकुलितमानसः साम्प्र
टी॰व्या॰ त्यथाय भूतानां सीतामायामयी पुनः विवेश पावकं दीप्तं ददाह ज्वलितोपि तामुष्णयामस्या
१०२ मयीसीतां भगवाननुग्रहोधितिः रामायादर्शयत्सीतां पावकोसौ सुरेश्वरः एतत्पातिव्रतीनां
269 वेमाहात्म्यं कथ्यते मया स्त्रीणां सर्वेषामेनमायास्वतमिदं स्मृतमिति उत्तरत्वश्च
तस्यैव प्रत्याये अनेन स्त्रीणां जातिभ्रंशाकरा यदि त्वग्निप्रवेशान दोषंय
ध्वनितं कदाचिदन्यपुरुषेण स्पर्शाद्युत्पन्नदयः अत्रपन्तिमन्त्रियाने प्रैतेषा
घः तेन विराधस्पर्शोपि न हानिः तदापतिसन्निधानात् किंच साक्षा
द्भगवती स्पर्शो रावणो विराधवत् लाला देवर्षिप्रिये देवे च सर्वं रावणस्य व
धो न स्यादिति मायासीतारचना किंचास्य कार्यं हनुमत्पुच्छा
ग्निनालोकादाहः अन्यथा रावणावेशेन लोकेमात्लाग्निनाक
यो नत्र गात्रदाहः स्यात् एतदुक्तिप्रवेशेन तत्र कार्यं साम
र्थ्येन सेतिमंतव्यं किंचैवं प्रतिज्ञायरावणस्पर्शेन १०२
गन्मातुः प्रतिज्ञाभंगः स्यात् ३० ॥ ओंपं
कजाक्षायनमः ॥

2६९A

आक्रम्य लक्ष्मणं प्रतिज्ञायदुःखात्सकलकरणानां पाटिवदुद्दरं प्रजग्धानेत्यनेन सर्वेन्द्रियोपरमणं
विनानेमदुःखपूर्णेर्पतिमसंचितंग्रन्थघाणाकोववलआयानस्यैवस्त्री षुप्रसिध्याहसंगतिः स्यात् ३८
विमनाः सौमित्रिः तां रुदतीमातेर्मूपामातेस्यैवकृतरूपामालोकान्नुसारतआ[illegible]स्यामासस्तावर्ते
नाकीविद्धवाच आश्वासनव्याजेन रामनविलवेकरोतीतिकोपेनेतिशेषः ३९ अभिवाद्यम

इति लक्ष्मणमाक्रम्य सीता शोकसमन्विता पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ३८
तामार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य विशालनेत्रां आश्वासयामास न चैव भर्तुस्तं
भ्रातरं किंचिदुवाच सीता ३९ ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किंचिदभिप्रणम्य च अवेक्षमाणो बहुशश्च मैथिलीं जगाम रामस्य समीपमात्मवान् ४० इत्यार्षे रामायणे आरण्यकाण्डे पंचचत्वारिंशः सर्गः ४५

नमेतिशेषः किंचिदभिप्रणम्येतिकायिकः सअंकः अत्रकिंविदित्यनेन कोपः सूचितः यद्यपि कोपेपि पर्योचितनस्पवहारस्याशालक्ष्मणस्यानुचितस्तथापि प्रातिलोम्यैनैव स्वच्छायां सदृशी तस्याआंबप्रवेशनवमनछायाग्रआकिंचिन्याञ्जलितं किंचिदेवनमनमित्यनेन सूचितं कष्टम् ।नो रामेणाविनात्यक्ता मेतिवहूपेणोवेक्षमाणः अग्निप्रविष्टानेवनिचवीक्ष्याणः ४०. इत्यारण्ये

पंचवटीका. ५४

रा॰ नचिरादिव शीघ्रमेवेत्यर्थः विकांक्षन् विशेषेण कांक्षमाणः तत्सविधगमनमिच्छन्नित्यर्थः
वा॰ अ कालिः शंकायामपि तेन रामं विरुद्धं शंकमानः शीघ्रमित्तो ऽनपसरणे कार्यनाशात् रामो
१०२ पि विरुद्धः स्यादिति शंकमानः शीघ्रं जगामेति व्यप अतएव व्यवहितं एव सर्गांते मारीचस्यते
270 च्चाप्युद्धातं रक्षोता विवयामदूनोचिंता मुत्का ततः पुनः रामोगमनमध्ये मितत्वस्य गवयप्रवृत्तिरुक्तासा

तयापरुषमुक्तस्तु कुपितो राघवानुजः सविकांक्षन्भृशं रामं प्रतस्थे नचिरादिव १
तदासाद्य दशग्रीवः क्षिप्रमंतरमास्थितः अभिचक्राम वैदेहीं परिव्राजकरूपधृक् २
श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही वामे चांसेवसज्याथ शुभे यष्टिकमंड
लू ३ परिव्राजकरूपेण वैदेहीमन्ववर्तत तामाससादातिबलो भ्रातृभ्यां रहितां
वने ४ रहितां सूर्यचंद्राभ्यां संध्यामिव महत्तमः तामपश्यत्ततो बालां राजपुत्रीं यश
स्विनीं ५ रोहिणीं शशिना हीनां ग्रहवद्भृशदारुणः तमुग्रं पापकर्माणं
जनस्थानगता द्रुमाः ६ ॥

विलेवायैव १ तदालक्ष्मण
स्यापगमे अंतरं रामलक्ष्मणयोरपसरणेनावकाशमासाद्य प्राप्य २ शिखी ऽपानही तिष्ठौ १०३
त्यादिवदितिः अनेनोत्रिदंडिसंन्यासं वृषसावितः तदुक्तं भारते रावणोक्तैः ... त्वामुं ऽः कुंडी
त्रिदंडीगीतिं तत्रमंऽऽत्यनेन जाटलेवाहितिः कुंडकमंडलुः यष्टिस्त्रिदेशानिका भ्रातृभ्यां परस्प
रंभ्रातृभ्यां रामलक्ष्मणाभ्यां ४५ ग्रहवत्केतुवत् स्नेहशोन्वयः ६ ॥

270A

शोकग्रस्तो नाः शोकग्रस्तवाहा खिन्नदीनं वीक्ष्य तं तदा समाक्रन्द दृष्ट्वा तद्वयानत्वा स्मितं मंदं गन्तुमारेभे रत्न
त्रयः ७ अनंतरं ग्रपकारस्योम्यच्छिद्र नदंतेरेऽभयहोरनदपी कोत्ति ८ उपनस्येच्छा तेसमीपमाप
त्स्यथः अतिपोवनानामिव ९ विशेचिग्रात्मनन्तरं भव्यरूपेणापरमपातयन् ...येणा १० ॥

संदृश्य नग्रकं पंतेन भवानिव मारुतः शोकग्रस्तो नाश्च तं दृष्ट्वा वीक्ष्य तं तरक्तलोचनं ७
स्मितं गन्तुमारेभे भयाक्रान्ता वरानना रामस्य तेन रेभे स्वदपाग्रीवस्त दंतेर ८ उपनस्ये
च वैदेही भिन्नस्वरूपेण रावणः अभव्यो भव्यरूपेण भर्तारमनुगाचती ९ अभिवृतेत वे
देहीं चिंतामिव घनेस्वरः सहसा भव्यरूपेण त्वेणः क्रूपइवाहतः १० अतिष्ठत्प्रेक्ष्य
वैदेहीं रामपत्नीं यशस्विनीं निष्ठंप्रेक्ष्य च तदा पत्नीं रामस्य रावणः ११ शुभां रुचि
रदंतोष्ठीं पूर्णचन्द्रनिभाननां आसीनां पर्णशालायां बाष्पशोकाभिपीडितां १२
सतां पद्मपलाशाक्षीं पीतकौशेयवासिनीं अभिगच्छत वैदेहीं हृष्टचेता निशाचरः १३
दृष्ट्वा कामशराविद्धो ब्रह्मघोषमुदीरयन् अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः
१४ ॥

बाष्पैः शोकेन चाभिपीडितां त्वमसौ याम विपुपमां र यसे दनवनो तिवाष्पशोको रामस्यसतपांक
येत्यापानतोर्पः १२ १३ ब्रह्मघोषं ब्राह्मणं मन्त्राभिज्ञान्माप वेदघोषमुदीरयन् कुर्वन् १४ ॥

रा॰ १५ रौप्यकांचनमुत्तमकांचनं १६ ह्रीर्गौरी श्रीरैश्वर्यप्रधाना भगवच्छक्तिः लक्ष्मीः सौभाग्यप्रधा
बा॰ श्रा नाभूतिर्गिरिमादिसिद्धिः रतिः कामपत्नी स्वैरचारिणी स्ववने आगमनात्प्रशंसा सत्यस्य प्रपंचः स
१०४ मा इत्यादि समा इति समसंख्यानाः शिखरिणः जंदकुसुमलवल्लभशास्त्राग्राः १७ १८ संप्रगल्भितोग्रा
271

तांस्तु तमो त्रिलोकानां पुष्पहीनामिव श्रियं विभ्राजमानां वपुषा रावणः प्रशशंस ह १५
रौप्यकांचनवर्णाभे पीतकौशेयवासिनि कमलानां शुभां मालां पद्मिनीव च बिभ्रति
१६ ह्रीः श्रीः कीर्तिः शुभा लक्ष्मीरप्सरा वा शुभानने भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारि-
णी १७ समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव विशाले विमले नेत्रे रक्तान्ते कृष्ण-
तारके १८ विशालं जघनं पीनमूरू करिकरोपमौ एतावुपचितौ वृत्तौ संहतौ संप्रगल्भि-
तौ १९ पीनोन्नतमुखौ कान्तौ स्निग्धतालफलोपमौ मणिप्रवेकाभरणौ रुचिरौ ते प-
योधरौ २० चारुस्मिते चारुदति चारुनेत्रे विलासिनि मनो हरसि मे रामे नदीकूल-
मिवाम्भसा २१ करान्तमितमध्यासि सुकेशी संहतस्तनि नैव देवी न गन्धर्वी न यक्षी न
च किंनरी नैवंरूपा मया नारी दृष्टपूर्वा महीतले रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते २३ १०४

लिंगान्नादेः संजातमप्रगल्भौ संप्रवलितागावितिपाठे आलिंगनीयतावित्यर्थः १९ मणिप्रवेको मणि-
श्रेष्ठः २० नदीकूलं स्वकूलं २१ करान्तेनाङ्गुष्ठप्रदेशिनीचक्रप्रमाणेनाभितमध्यं यस्याः
स्त्रियाः भवेत् २२ रूपं सुकुमारता वयः कान्तारवासश्चेति त्रीणि एतानि उन्माथयन्ति विकलं करोतीति २३

271A

प्रतिक्रामन्निरीक्षमाणं चेद्राजधिष्ठितस्थाने राक्षसपराक्रमा मांसंभवादेवंवचनं २४ २५ आचरितुमप
भोक्तेत्वयक्तं तेनेत्संयुक्तं माल्यादिवरं अन्यत्तु विफलमितिभावः २६ २७ २८ द्वीपिव्याघ्रासौ

इहवासश्च कान्तारे चित्तमुन्मादयन्तिमे साधुतेकामभद्रं तेनैवं वस्तुमिहार्हसि २४
गान्धर्वा मानुषाय वासो घोराणां कामरूपिणां प्रासादाग्राणि रम्याणि नगरोपवनानि च
२५ सम्पन्नानि सुगन्धीनि युक्तान्याचरितं त्वया वरं माल्यं वरं पानं वरं वस्त्रं च शोभने २६
भर्त्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे का त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते २
७ वसूनां वा वरारोहे देवता प्रतिभासि मे नेह गच्छन्ति गन्धर्वा न देवा न च किन्नराः २८
राक्षसानामयं वासः कथं तु त्वमिहागता इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा
काः २९ ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसे मदान्वितानां घोराणां कुञ्ज
राणां तरस्विनां ३० कथमेका महारण्ये न बिभेषि वरानने कासि कस्य कुतश्च
त्वं किंनिमित्तं च दण्डकान् ३१ एकाचरसि कल्याणि घोरान्राक्षससेवितान् इति प्रश
स्ता वैदेही रावणेन महात्मना ३२ द्विजातिवेषेणहितं दृष्ट्वा रावणमागतं सर्वैरति
थिसत्कारैः पूजयामास मैथिली ३३ ॥

दुर्निर्विदं २९ तरक्षवस्त
गादनः बिभ्यसे बिभेषि ३१
प्रशस्ता कृतप्रशंसा ३२ द्विजातिवेषेणागतमागतं रावणं दृष्ट्वा द्विजातिवेषोयं रावण इति ज्ञा
त्वापि अतिथिसत्कारैः अतिथियोग्यसत्कारैर्याचनाभिनिमंत्रणं कृत्य ३३ ॥

रा· तदा पाद्यदानोत्तरकाले सोमम्दर्शनं तं सिद्धं पक्रममत्रमति अब्रवीत् २४ पात्रं कमंडलुः कुशं भंत
वा·आ इत्युक्त्वा रक्षितउभयचारिण उपायान्तो ब्राह्मणात्तं प्रति पत्ये रावणेन कृतानां कामायवस्त्रवुम्न
१५ व्यापदंशादीनांदर्शनात् उद्देश्य उपेदिततमभाक्यामिति विचार्येति शेषः तथागतब्राह्मणवेषे
272 णागतं रावणं ब्राह्मणं वदेवमेयमंत्रयत पादांतरत्वआपण्कल्पित अयमेवरत्नः संहारोपाय

उपानीयासनं सर्वं पाद्येनाभिनिमंत्र्यच अब्रवीत्सिद्धमित्येवं तदा तं सौम्यदर्शनं २४
छिंदति वेषेणासमीक्ष्य मैथिली समागतं पात्रं कुसुंभदारिणं अथाकर्मण्युद्दिष्टमुपा
यदर्शनात् मामंत्रयत्ब्राह्मणवत्तथागतं २५ इयं ब्रसी ब्राह्मणकाममास्सतामि
दं च पाद्यं प्रतिगृह्यतामिति उदंचासिद्धवन्नजातमुत्तमत्वदर्थमग्रमहोपभुज्यताम्
निमंत्र्यमाणा प्रतिपूर्णभाषिणी नरेंद्रपत्नीं प्रसमीक्ष्य मैथिली प्रसह्य तस्याहरणे
धृतमनः समर्पयामास वधाय रावणः ततः सवेषं मृगयागतं पतिं प्रतीक्षमाणा सह
लक्ष्मणं तदा निरीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ २७ इत्यार्षे

रा·आ·षट्चत्वारिंशः ४६

इमि दर्शनादित्यादिवि ... ष्टदमत्र — निमंत्र्यप्रकारः इयंह श्री १०५
सीत्यादि वन्यजातं वन्यपदार्थजातं त्वदर्थमेव सिद्धं कृतं तं तादृशं हेयोपभुज्यतां ... पर्वाने मे च्यमा
णा रावणः हरणमनोहृदं निश्चितं समर्पयामास सम्यकं वधायकृतवानित्यर्थः २७ आत्मवधा
यरखना यायन्तस्याः प्रसह्य एव बंधोभनाकारमागतं मृगयायासनिगतं इत्यभत्येषट्चत्वारिं

272A रावणेनातिवति आत्मानं जिहीर्षुणा परिव्राजकरूपेण रावणेन दृष्टा वैदेही आत्मना स्वयमेवा
त्मानं पापयत् १ ननु एतावन्मात्रेऽनृतेऽर्थे किं प्रतिवचनेनेत्याह ब्राह्मणश्चेति पतद्भ्रष्टं कस्याप्यर्थी
तथ्यः अनुक्तः अनुक्तमतिवचनः २ ३ सर्वकामसमृद्धिनी श्रीस्यादित्यादि ४ राजमंत्रिभिः

रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा परिव्राजकरूपेण शशंसात्मानमात्मना १
पि ब्राह्मणश्चातिथिश्चैव अनुक्तो हि शपेत मां इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् २ दु
हिता जनकस्याहं मैथिलस्य महात्मनः सीता नाम्नास्मि भद्रं ते रामस्य महिषी प्रिया ३
उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने भुञ्जाना मानुषान् भोगान् सर्वकामसमृद्धिनी
४ तत्र त्रयोदशे वर्षे राजामन्त्रयत प्रभुः अभिषेचयितुं रामं समेतो राजमन्त्रिभिः ५
तस्मिन् संभ्रियमाणे तु राघवस्याभिषेचने कैकेयी नाम भर्तारं ममार्या याचते वरं ६
परिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनं ७ द्वाव
याचत भर्तारं सत्यसंधं नृपोत्तमं नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये च कदाचन ८ ॥

राज्ञो राज्यनिर्वाहके मंत्रिभिरित्यर्थः ५ संभ्रियमाणे संपाद्यमानसंभारे इत्यर्थः तस्मीरं दशरथं
ममार्या मम श्वश्रूः अमार्यैनिकोविपादः ६ मे श्वशुरं सुकृतेन परिगृह्य वरद्वयेनास्य
कृतेन वशीकृत्य यद्वा धर्मेणा शापयित्वेत्यर्थः मम भर्तुः प्रव्राजनं भरतस्याभिषेचनमिति ७ द्वौ
वरावयाचत ८ ॥

स॰
वा॰ आ॰
१६
273

९ अन्वयैरनुगतार्थैः समप्रयोजनैरुपभोगाद्यैर्मे रथैः याचतः सर्वाण्येतानि वस्तूनि तन्मे ह्यासा
मिरामाभिषेचनविघ्नमाकांक्षति याच्यमानोपि न स्थापयाचकारनांगीकृतवतीवयसापि चवि
पाकः वनानिगमनकाले इतिपाठः नन्विदं समुके ऊनषोडशवर्षो रामोतिविश्वामित्रं प्रतिद
शरथोक्तेः उषितान्द्वादशसमा इति अत्रोक्तेश्च तिवत न अत्यन्तरत्वात् अंतिनरुणावस्थायामपिप
ञ्चपत्यक्तवस्थायामपि राज्यं त्यक्त्वा निरपेक्षितात्पर्येनास्य यानयोक्तेः यद्वाति क्रान्ते पंचवि

पंचमे जीवितस्यांतो रामो यदि भिषिच्यते इति ब्रुवाणां कैकेयीं प्रश्रयेण स पार्थि
वः अयाचतार्थैरन्वर्थैर्नैवयाञ्चां चकार सा ममभर्तामहातेजा वयसा पंचविपाकः
१० अष्टादशाहिवर्षाणि मम जन्मनि राघव पूर्ते रामेति प्रोच्यते लोकोऽसम्यवान्यो ल
वान्याचः ११ विशालाक्षो महाबाहुः सर्वभूतहितेरतः कामार्तस्य महाराजः पि
तादशरथः स्वयं १२ कैकेय्याः प्रियकामार्थं तं रामं नाभिषेचयेत् आभिषेकाय तः
पितुः समीपं राममागतं १३

पाठइत्यर्थः ममभर्तावयसामहातेजा अतिश्रयान्
त्यर्थः पंचविपाकः सार्थसिद्धं पंचविपाकत्वेनास्येऽयमेवपत्ये न स्वैनैवजन्महेतामेन
ततोऽपि केकि कि चित्स्यां तिसर्वायुतेन यो क्रीरतितनि १० तथाममजन्मतो वनप्रवेशः सम
येऽतीतानीत्यर्थः गणपतत्त्यावमेकत्वे मम पंचतुलन्मात्र पंचमहाभनपंचेद्वियाह का दृष्ट
मनोवृत्यागो अष्टादशावर्षाणि पर्वाणि जन्मनि कार्यं गण्यतन्मतीभतमाप्रकीर्तितस्यमिति ११

कामार्ता कैकेयी कामार्ता १२।३
१६

273A १४ १५ मृहतात्मोचयन्नदत्तवरानुपाल्तनेनेति रोषः । १६ १७ वैमात्रया आदिषु विमातृ शब्दया
दीपिकायामीत्यसहोदरो भ्रातेत्यर्थः विभिन्नाया मातुरपत्यं वैमात्रः १८ १९ ॥ कैकेय्याः कृ

कैकेयी मम भर्त्ता हि तामितुवाच कृतं वचः । न चापि ज्ञा समाज्ञं मम मे इष्टं एवं राघव १४
भरताय प्रदानं च तु दाज्यमकंटकं नयानं च वत्सदत्तख्यं नं वर्षाणि पञ्च च १५ वनं
प्रव्रजनकाले तस्य पितुर्मे भवयान्ततान न तथेत्युवाच ताराम: कैकेयीमकृतोभयः १६
चकार तद्वचः श्रुत्वा भर्त्तामम दृढव्रतः ददात्र प्राणितं प्रष्टुं यामत्पञ्चयात्मचान्नत १७ प्रा
तज्ञात्मना रामस्य सुव्रतेत्य तन्मनुतेमम न तस्य भ्राता त्वेवमाद्यो लक्ष्मणो नाम वीर्यवान्
रामस्य पुरुषव्याघ्रः सहायः समरेरिहा सभ्राता लक्ष्मणो नाम ब्रह्मचारी दृढव्रतः १९
अनुगाचृहस्तः पाणिः प्रव्रजंतं मया सह जटी तापसरूपेण मया सह सहानुजः २० प्रविष्टो
दंडकारण्य धर्मनित्यो दृढव्रतः ते वयं प्रच्युता राज्यात्कैकेय्यास्तु कृते त्रयः २१ विचराम
द्विजश्रेष्ठ वनं गंभीरमोजसा समाश्वास मुहूर्तं तु शक्यं वस्तुमिह त्वया २२ ॥

तेन ब्रिमितं २१ यदि वस्तुं शक्यं तर्हि मुहूर्तं समाश्वस निश्रमं नऊर्वित्यर्थः २२ २२
नमो भगवते वासुदेवाय नमः २२ ॥

रा.
वा.आ
१०७

274

हत्वाआदायेतिछेदः आदानमांसन्दर्शयामित्यर्थः ४ गोत्रमार्षंकुलंप्रसिद्धंवंशमाहृतंयद्वागोत्रंपि

आगमिष्यतितेभर्त्तावन्यमादायपुष्कलं रुरुंगोधांवराहंच्चहत्वादायामिषंबहु
२३ सत्वंनामचगोत्रंचकुलमाचक्ष्वतत्वतः एकश्चदंडकारण्येकिमर्थंचरसिद्विज २४
एवंब्रुवंत्यांसीतायांरामपत्न्यांमहाबलः प्रत्युवाचोत्तरंतीव्रंरावणोराक्षसाधिपः २५
येनवित्रासितालोकाः सदेवासुरमानुषः अहंसरावणोनामसीतेरक्षोगणेश्वरः २६
त्वांतुकांचनवर्णाभांदृष्ट्वाकौशेयवासिनी रतिंस्वकेषुदारेषुनाधिगच्छाम्यनिंदिते
बह्वीनामुत्तमस्त्रीणां माहृतानामितस्ततः सर्वासामेवभद्रंतेममाग्रमहिषीभव २८
लंकानामसमुद्रस्यमध्येममहापुरी सागरेणपरिक्षिप्तानिविष्टागिरिमूर्द्धनि २९
तत्रसीतेमयासार्धंवनेषुविचरिष्यसि नचास्यवनवासस्यस्पृहयिष्यसिभामिनि ३० १०७

त्वकुलंकुलंमाचक्ष्व २४ २५ २६ दृष्ट्वाएवंकृत्वायदर्शयंचेत्यर्थः २७ २८ २९ वनेषुउपवनेषु ३०

274A

पंचेत्यादि सोयो नीतमोगुणप्रधानात्मा जातवानहं कृतमशोभगवन्मायया त्वानाच्छादनादेवशक्ति
: सर्वथानतत्तोरावणः कथमेवं वदतीति यद्यहं जागमेव तत्वनाविद्वान् गुरोलेभातसीतारामो सर्वस्वमपि
त्यतन्मात्रतानरावणस्यास्त्येवत्यपि अहं राज्ञा समेवाविस्मपुराणादि विरोधात् तथा चोक्तं विष्णुपुरा
णेमैत्रेयं प्रत्युवाच हिरण्यकशिपुत्वे च रावणत्वे च विष्णुना अवापनिहतो भोगानप्राप्यानमरैरपि न तत्र
तेन तेनैव निहतः स कस्यपुनः सप्रमः शिशुपालत्वे न पुनः संशाप्यैव हेतो एतादृक्षामप्यहंमत्रो न सर्वधर्म
भूतोवर कौतहूलपरोत्तन एषोभवकमहसि एतएतः३ देत्यस्य स्पत्ववेधायामिवत्तलोकोत्पात
प श्यंत विनाशकारिणः एवं तत्तुदत्यात् नान्दसिहरूपमाविष्कृत्न न ब्रह्मरणवकणापाविरभ्यमित्य
प वेनमनस्यभूत निरोन शाङ्ग एव नसमभूतेमतन्मन नामेति रजोद्रेक प्रेरितेकाग्रमतिस्तद्भावनायो गतनो

पंचदासः सहस्राणि सर्वाभरणभूषिताः सीते परिचरिष्यंति भार्या भवसि मे यदि ३२

वामवधहेतवं कोनिरामिशायामेषाखिलत्रैलोक्याधिकारिणीदशाननत्वे भोगसंपदमवापत्तान सि
अनादीतिषने परब्रह्मभूते भगवत्स्मालंबनीकृतमनसस्तत्रलयं दशाननत्वेभोगप्राप्त्यर्थान तथा
ज्ञानकोसमासक्त चेतसोदाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीत् नाथ मच्युतत्वमासक्तिविष
यत्वं मनःकरणमासमानुपबुद्धिरेव केवलमभूत विपर्ययत्वं निविपत्यवत्नंपार्थः नासीत्तद्विसमयेऽवि
ष्णुत्वबुद्धिर्नासीदित्यभावः पुनरच्युत विनिपातनमात्रफलमेव लेभमेडलस्वाघ्रवेदिराजकु
लसंभवः शिशुपालत्वे वाग्पतेत्ववलाम्य वभगवन्नामकारणानि प्रभवेन्नामानि।
गोविंदादीनि कारणानि गोविंदादीनि प्रत्युत्ततमेतत्कारणकर्णानितेषामपि नामपरणामेवाग्युतना
म्नामनवरतमनेकजन्मसंवर्द्धितविद्वेषानुबंधिचित्तोविनिंदन्सन्तमेनादिद्वारा मकोतनं च तत्स्पृहफल ९

री॰
वा॰ श्रा
१०
275

पद्मदलायतमनसुन्दरं लसत्पीतवस्त्राधार्य्यमलंकिरीटकेयूरवरहारकौस्तुभशोभितमुदारग्रीवं चतुर्वाहुंशंख
चक्रगदाधरमतिप्रौढवैराग्यभावाद्दरेन भोजनस्नानासनशयनादिषु वस्त्रान्तरेष्वपि नैवापश्यत्पादवस्यात्मव
तमसः तेन तमेव रागक्रोधापहारं यस्तमेव हृदये धारयत्रात्मवृत्यापि भगवद्दिव्यचक्रानुस्मार्त्तोऽभवत्तम
त्वग्नितेजः स्वरूपं परमब्रह्मस्वरूपमपगतनरागेहृद्यादिदोषं भगवंतं श्रद्धालोभिः तावद्धि भवचक्रेण
प्रबुध्यापादितः तेनानंतस्मरणाद्भूयोऽविलम्ब्यमेव यो भगवंतं वांतमुपनीतवत्यास्मिन्नेव लयमुपयोप
तनवामिषितेभगवानिक्रीर्तितः संस्मृत ब्रह्मेऽवाप्नुयं येनाप्यखिलहरतरादिस्त्वं संफलं प्रपंच
ति किमन्तसमयकेभक्तिमतामिति लोकहृद्याप्तिमीता साहृदयपापसीमा नावह्यहरणत्त्वातृताविव
संपन्नानहे ये भगवतः प्रवृत्तिः एवं च हृदयपाक्तिनां यहान्नहा प्रकारेण न्यस्याय योतन प्रयाणसत्तोऽपीदी
नाविषफलमेवं विस्मृपुराणोक्तिरीत्यैव भगवतेऽउक्तं एतेनैवाणाकृत्ताः पुंसः हंतस्ते भगवान्
स्वयमेति एतेऽन्विनेनपवीक्ता अवतारात्मख्यात्वप्रपुरामस्यते पुंसः परमेश्वरस्यतस्यावतारा
रा अंशेणाख्यादयः कलाः यद्यपि कृष्णास्याप्यपवने व दृशमेनत्राणेनावतीर्णस्य विष्णोर्द्वियानिरा
मनकाम्यायुक्तेः अन्नहरागत्मनः केशोस्मिनकृस्ता महाभुते इति विष्णुपुराणायुक्तेः हितोय भगवतो
प्यवमेवभागतेष्यवमेव एतेनांशमात्रामिवावतीर्णस्येति दशमस्य श्लोकव्याख्यानमपास्तं तथापि
तत्कारणकृतेन नाम्नात्रैलाभारकृपोः त्तानकार्यानाटनाम्बुपाद्विचक्रादीनामस्यत्ततोदर्शना
वस्त्रव भगवानित्युक्तेः नैयावतारामायवतारणंततोऽन्यननुमितिप्रकाशः श्रीधरोऽपि मस्या
यवतारााणां सर्वतत्र सर्वशक्तिमत्वेऽपि यावदुपयोगमेव तानेपाविष्कारः अतानाविष्कारस्व
वरूपः कृष्णोस्तिस्यात्म्यः यूप्यामित्रमराणां स्महृ तवसविहित आसमतत्समस्तमामिति पद्याद्वेष
द्यामनाद्यानेयनकालेनाहृ हारकायामित्रकेनः किंनु मे भवेयायें गिनोभवतामय ञ्जेषा

१०८

भ.
वा. २ा
275A

इतिसैषाभवपेवमायिकंमन्तव्यमुदेवगारीरंदष्टुमोहन्त्यायस्माननायमत्वंप्रणामावतारेषिक्षा
नाविष्कारस्तत्रतत्रदर्शितोनादृश्योपिष्यतेच अवताराश्चेमेविराजएवोपमः भागवतेप्रथमतृ
तीये ऽध्याये जगृहे पौरुषं रूपं भगवान् महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षये
त्यादिना विराजं रूपमुक्त्वा एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यन्ते देवति
र्यङ्नरादयः इत्युक्तेः एतदुक्तं वैराजं निधानं कार्यावसाने प्रवेशस्थानं बीजमुद्गम
कारणं अत्रायं विरस्यापि न केवलमवताराणामेव बीजं किन्तु सर्वेषामि
त्याह यस्य तिघ्यपि विराड्जीव एव तथापि तदंशस्याविर्भावमात्रत्वात्तथापा
समेत्यैवमुक्तं स्थितक्रमस्तकेषाद्वारेण च तेषां मध्ये सत्त्वेन श्रव्य
तातद्रूतस्ववोयाः प्रथानयोर्मदंशयोस्तद्द्वारा यो वैकुण्ठस्य
योर्विस्वरूपोपयोरवतारा इति सिद्धान्तमत एवाते क्रमप्राप्त
देवहूतेनतत्वागविनास्वगोनयेपा भतेः तस्त्वमागच्छेति
निवेदितमिति स्पष्टमुपरान्तेषु अत्रतामे भक्तिमपित
प्येवोक्तं अंशानंशावांमीमपाधिकेमायायाः
मायानादित्वात् ३१ ॥

स. वा. श्रा. १.१९

276

राघवोनेति ऊपिताकृपितेव ३२ पर्वतसमुद्रोपमाभ्यां धैर्यगांभीर्य्यं दर्शिते ३३ न्यग्रोधप
रिमंडलेत्ततन्नसहस्रपरिणाहतत्त्वस्तर्वाश्चर्यंचरामसुहृदिप्यानुसरणमेवव्रतंयस्याःसा ३४ सिं

राघवेणैनवनकालातुऊपिताजनकात्मजा मनुवाचानवद्यांगी
गमनादन्यपरात्मसं ३२ महागिरिमिवाकंप्यंमहेन्द्रसदृशंपतिं
महोदधिमिवाक्षोभ्यंमहंराममनुव्रता ३३ सर्वलक्षणसंप
न्नंन्यग्रोधपरिमंडले सत्यसंधंमहाभागमहंराममनुव्रता
३४ महाबाहुं महोरस्कंसिंहविक्रांतगामिनं नृसिंहं
सिंहसंकाशंमहंराममनुव्रता ३५ पूर्णचंद्राननंरामंराज
वत्सांजितेंद्रियं पृथुकीर्तिमहाबाहुंमहंराममनुव्रता ३६

हस्यविक्रांतंपदनिक्षेपस्तद्वतपदनिक्षेपेणसगर्वगमनशीलं सिंहसंकाशंपराक्रमे
इतिभावःनृसिंहमित्यस्याभिप्रायपकषिांशेष्ठनत्वेमा ३५ राजत्वादासौत्सःश्रेष्ठेषुराजसत्यपद्मदसा

276A

यथाआदित्यप्रभाआदित्यात्स्यकन्कन्यके नापि स्प्रष्टुमशक्या तथाहं शक्तिमनोरवियोगादि
तिमदं ३७ काचनस्त्वदर्शनेनुमर्षं तद्रागमंदरीणामाप्रादिभ्रवंतिममंदभाकन्ह्त्थिनस्यासिंह

तेपुनः जंबुकः सिंहीमामिहेच्छसि दुर्लभां नाहंशक्यात्वयास्प्रष्टुमादित्यप्रभायथा ३७
पादपान्कांचनान्दृष्ट्वन वहून्पश्यसि मंदभाक राघवस्यप्रियांभार्यांयस्त्वमिच्छसिरावण ३८
त्वायितस्य च सिंहस्य मृगशत्रोस्तरस्विनः आशीविषस्यवदनाद्दंष्ट्रामादातुमिच्छसि ३९
मंदरंपर्वतश्रेष्ठंपाणिनाहर्तुमिच्छसि कालकूटंविषंपीत्वा स्वस्तिमान्गंतुमिच्छसि
गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः संसक्तशिखराः शैलाः विराजंति महाद्रुमैः १८ पु
ष्पसंछिन्नशिखरा मारुतोत्क्षेपचंचलाः अमी मधुकरोत्तंसाः प्रगीता इव पादपाः १९
सुपुष्पितांस्तु पश्यैतान्कर्णिकारान्समंततः हाटकप्रतिसंछन्नान्नरान्पीतांबरानिव २०
अयं वसंतः सौमित्रे नानाविहगनादितः सीतया विप्रहीनस्य शोकसंदीपनो मम २१
मां हि शोकसमाक्रांतं संतापयति मन्मथः हृष्टं प्रवदमानश्च समाह्वयति कोकिलः २२
एष दात्यूहको हृष्टो रम्ये मां वननिर्झरे प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण २३
श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया मामाहूय प्रमुदिता परमं प्रत्यनंदत २४ एवं
विचित्राः पतगा नानारावविराविणः वृक्षगुल्मलताः पश्य संपतंति समंततः २५

स्येनेतत्समर्पयतेजल २२ हृष्टं यथा प्रवदमानः कोकिलो मां समाह्वयति स्पर्द्धयेवेत्यर्थः २३ दात्यू
हको नलकुक्कुटः हृष्टः कामावेशेन वननिर्झरे वनमध्यगे प्रस्रवणे २४ मामाहूय प्रदर्शना
त्प्रीतिमिति शेषः परमम् अतिशयेन २५ पतगाः कलोरः वृक्षादीन् क्रमेण संपतंति पश्य २६ ॥

वा॰रा॰ पुंभिर्विहङ्गैर्विमिश्राः संबद्धाः आत्मव्यूहेषु स्वस्वजातिसमूहेषु अभिनन्दिताः प्राप्तानन्दाः भृङ्ग

किं॰ राजप्रमुदिताः प्रमुदितभृङ्गराज इव मधुरस्वनाः अस्याः कूले सन्तीति शेषः यद्वा भृङ्गराजस

३ वेषेण प्रमुदिता मधुरस्वरा भृङ्गपक्षिणः सन्तीति शेषः २७ तथा अस्याः इह कूले शकुनाः प्रमुदि

3 ताः सन्ति दात्यूहानां रतिः संवर्धिता विक्रन्दा दात्यूह इति विक्रन्दाः तैः २८ अशोकस्तवकरूपा

विमिश्रा विहगाः पुंभिरात्मव्यूहाभिनन्दिताः भृङ्गराजप्रमुदिताः सौमित्रे मधुरस्वराः २७

अस्याः कूले प्रमुदिताः संघशः शकुनास्त्विह दात्यूहरतिविक्रन्दैः पुंस्कोकिलरु

तैरपि २८ स्वनन्ति पादपाश्चेमे मम मानङ्गप्रदीपकाः अशोकस्तवकाङ्गारः षट्पद

स्वननिस्वनः २९ मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति नहि तां सूक्ष्मपक्ष्मा

क्षीं सुकेशीं मृदुभाषिणीं ३० अपश्यतो मे सौमित्रे जीवितेऽस्ति प्रयोजनं अयं हि

रुचिरस्तस्याः कालो रुचिरकाननः ३१ कोकिलाकुलसीमान्तो दयिताया ममान

घ मन्मथायाससंभूतो वसन्तगुणवर्द्धितः ३२ अयं मां धक्ष्यति क्षिप्रं शोकाग्नि

र्नचिरादि अपश्यतस्तां वनितां पश्यतो रुचिरान्द्रुमान् ३३ ॥

शृङ्गारापस्य अग्नेः सदृशस्तबका

ह षट्पदस्वन एव निस्वनो यस्य पल्लवरूपा अर्चिर्यस्य २९ अयं हीति अयं कालो वसं

न्तकालस्तस्या मम दयिताया रुचिरद्रुः कोकिलैराकुलः सीमान्तो वनसीमान्तो मध्यप्रदे

शो येन सः ३१ मन्मथायासेत्यत्र उपसंभूतो जनितो वसन्तगुणैः दानिलपुष्पितकान

नवनिरस्तैर्बर्हितैः प्रवलितैः ३२ नवीनगर्वावाद्यनीकेवर्म विराहिविनिपण्डतैः ३३ ॥ ३

आत्मप्रभावः कामः भूयस्त्वं वेपयिष्यसि ३७ स्वेदसंसर्गः कामविकारजः तेन हर्षयति मल्लिनी
करोति तादृशः यद्वा तं हर्षयति नाशयति मलयानिलसंवपनादृशः चिन्ताशोकाभ्यां व
लात्कृतं पीडयैव चैत्रसंवर्धीवनानिलः ३८ शिखिनीभिः मयूरीभिः मदमूर्छिताः मत्ताः ३९

ममायमात्मप्रभवो भूयस्त्वमपयास्यति अदृश्यमाना वैदेही शोकवर्धयतीह मे ४०
दृश्यमाना वसन्तस्य स्वेदसंसर्गदूषकः मां हि सा मृगशावाक्षी चिन्ताशोकबलात्
कृतं ३९ संतापयति सौमित्र क्रूरश्चैत्रवनानिलः अमी मयूराः शोभन्ते प्रनृत्यन्
तस्ततः ३९ स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव शिखिनीभिः परिवृ
तास्तएते मदमूर्छिताः मन्मथाभिपरीतस्य मम मन्मथवर्धनाः पश्य लक्ष्मण नृत्यन्
मयूरमुपनृत्यति ३० शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुनि तामेव मनसा
रामां मयूरोऽप्यनुधावति ३९ वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव मयूरस्य वने
नूनं रक्षसा न हृता प्रिया ४० तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया मम त्वयं वि
ना वासः पुष्पमासे सुदुःसहः ४१

अभिपरीतस्य व्याप्तस्य ३० अनुधावति नृत्यप्र
संगेनानुगच्छति वितत्य विस्तार्य ३९ रुतैः रुतैर्हसन्निव माति तिशेषः ४० यतो न हृता त
स्मान्नृत्यतीत्यर्थः विना सीतां विनायं मम पुष्पमासे चैत्रे वासो सुदुःसहः अतिपीडाजनक

वा॰ रा॰ नत्वेतावातरागस्तवानुचिंतस्तत्राह पश्येति संरागो निशामितो रामः ४३ वन्यानि पुष्पाणि
कि॰ मे सीतावियोगात्भोगसाधनत्वाभावान्निष्फलानि भवंति ४४ उक्तस्यैव विवरणं पुष्पाणीत्या
५ दि अतिश्रीयाः रुचिराणीत्यन्वयः मधुकरोत्करैर्मधुकरसमूहैः ४५ आह्वयंत इव नर्तयंती।
4

पुष्पलक्ष्मीरसंरागोतिशयो निर्गतेष्वपि अधुना शिखिनी कामाद्भर्तारमभिव
र्तते ४२ ममाप्येवं विशालाक्षी जानकी जातसंभ्रमा मदनेनाभिवर्तेत यदि ना
पहृता भवेत् ४३ पश्य लक्ष्मण पुष्पाणि पादपानामतिश्रिया निष्फलानि म
हीं यान्ति सम मधुकरोत्करैः ४५ नदंति कामं शकुना मुदिताः संघशः कलं
आह्वयंत इवान्योन्यं कामोन्मादकरा मम ४६ वसंतो यदि तत्रापि यत्र मे वस
ति प्रिया नूनं परवशा सीता सापि शोचत्यहं यथा ४७ नूनं न तु वसंतस्तं देशं
स्पृशति यत्र सा कथं ह्यसितपद्माक्षी वर्तयेत्सा मया विना ४८ ॥ पुष्पाणि
निष्फलानि भवंति मे पुष्पभारसमृद्धानां वनानां शिशिरात्यये ४४ रुचिराण्ये
त्यन्वयः ४९ यदि सीतावामदेशेपि वसंतोस्ति न दा मद्वदेव सापि शोचति सा मया स्मरं
तान यद्यपि तत्र वसंतो न भवेत् कदाचित्तथापि मया विना सा कथं वर्तयेत जीवेत् सदि
रह एवं तत्राशंकापयोऽभमिति भावः ४८ ॥ राम ॥ राम ॥ ४

4A

अथवावर्ततेतत्रवसंतस्तस्याप्रियैः शत्रुभिः पीडितायतः सान्तस्तस्यावसंतः किंकरिष्यतिपरस्त्रगपी
ड़ासनेकामपीड़ांतववकाशंक्षितिभावः इतिशोचः परेतत्रवसंतोनास्येवतत्रतेनविनासाक।
पतत्रनिष्ठुतअगतेवस्याक्षितपथः तदेवसत्रचयत्राहातनेतिपरनिर्भत्सनवशानन्नाम्यान्तीन्याशाय
इत्याहुः ४७ सर्वथातस्याः कामपीड़यानाशएवप्राप्तइत्याहद्दपामेति ४८ तदेवविस्तरेणनिर्द

अथवावर्ततेतत्रवसंतोयत्रमेप्रिया किंकरिष्यतिसुश्रोणिसात्वनिर्भर्त्सितापरैः ४९
श्यामापद्मपलाशाक्षीमृदुभाषाचमेप्रिया नूनंवसंतमासाद्यपरित्यक्ष्यतिजीवितं ५०
हृदयेहिसुहृदयबुद्धिर्ममसंपरिवर्तते नालंवर्तयितुंसीतासाध्वीमद्विरहेगता ५१ मयि।
भावोहिवैदेह्यास्तत्वतोविनिवेशितः ५२ एषपुष्पवहोवायुः सुखस्पर्शोहिमावहः
तांविचिंतयतः कांतांपावकप्रतिमोमम ५३ सदासुखमहंमन्येयंपुरासहसीतया
मारुतः सविनासीतांशोकसंजननोमम ५४ ।।

इमिति साध्वीसीतामद्विरहेगतानंतप्रा
शावसंतसमते सतेमासंसर्वथावर्तयितुंजीवितंनालं समर्थः ५१ एवंनिश्चयप्रकारेणपरस्परानु।
रागसाम्यदर्शयतिभावइति ५२ हिमवहोपिपावकप्रतिमोदुःसहइतिविरोधाभासः ५३ यंवा
पुरासीतयासहस्थितिकालेसदासुखमन्येइत्यन्वयः ५४ ।। राम ।। राम
।। राम ।। राम ।।

वा रा तदासीनासंयोगकाले। सोवायसः पक्षी विहंगः आकाशगः सन्प्रणादितस्तेनचतद्वियोगंसूचि-
प्र ४ तवानित्याशयः अथतांविनातद्वियोगावस्थायांपादपगतः प्रहृष्टनभिकूजतितेनतत्संयोगं
5 सूचयतीत्याशयः तदेवविहगेणेति विहगः सन्प्रतिहारकोपहारकइत्यर्थः तर्हिदानींतस्य
त्वीतस्याः समीपंमांनेष्यतीत्यर्थः कनककलपक्षी प्रणादितस्तथेति विहगः प्रीतिकारकइति
चप्राचीनःपाठः अत्रैसोपक्षान्तथातिसवियथाभवतितथाविहगः सन्प्रणादितःनादेकूजनवा

तांविनाद्यविहंगोसौपक्षीप्रणादितस्तथा वायसःपादपगतःप्रहृष्टमभि
कूजति ५५ एषवैतत्रवैदेह्याविहगःप्रीतिकारकः पक्षीमांतुविशाला
क्ष्याःसमीपमुपनेष्यति ५६ पश्यलक्ष्मणसंज्ञादंवनेमदविवर्द्धनं पु
ष्पिताग्रेषुवृक्षेषुद्विजानामवकूजितां ५७ विक्षिप्तांपवनेनैतांअसौति
लकमंजरी षट्पदःसहसाभ्येतिमदोद्धूतामिवप्रियां ५८ ॥ राम

नःअस्यपूर्वमितिशेषः तत्संयोगकालेइत्यर्थः अथेदानींतांविनातद्वियोगकालेइत्यर्थ्यतिशे
षः उः त्वनादइत्यर्थः अथकेचित्कूजनमाह पादपगतोवायसःप्रहृष्टयथाभिकूजतिएषवि
हगएवंनादविशिष्टोविहगोवायसोयत्रसीतातिष्ठतितत्रतस्याःप्रीतिकारकः अतिकः
मात्वमांचतस्याःसमीपंतत्समीपगमनद्वारेणसंस्थायपतीत्यनीत्यर्थइत्याह ५९ पुनः ह

ॐ कामयीतितत्रकी पक्षेपति पद्वीव्यत्थीःश्रावकूजनिपर्यद्धुर्कनो
मदधीमदनसवर्द्धनो ५८ ॥
५

5A

विभ्रमोत्सिक्तमनसः स्पृणारोद्धिक्तचिताः ९० विचरंतिकिन्नरीभिः सहैतेशोषः स्नापिकाम
हितनायकान्तरदर्शनशुद्धीपने नलिनान्यत्ररक्तकमलानि ९१ नीलोत्पलोत्समंता
युता ९२ जलेषट्पदाहतकेसरैः जलेममरपातितपुष्पधूलिभिरभिसंवृताश्चाशोका

कामिनामयमत्यंतमशोकः शोकवर्द्धनः स्तवकैः पवनोत्क्षिप्तैस्तर्जयन्निव मां
स्थितः ९४ अमीलक्ष्मणदृश्यंतेचूताः कुसुमशालिनः विभ्रमोत्सिक्तमनसः सां
गरागानराइव ९० सौमित्रेपश्यपंपायाश्चित्रासुवनराजिषु किन्नरानरशार्दूल
विचरंतिपुनस्ततः ९१ इमानिशुभगंधीनिपश्यलक्ष्मणसर्वशः नलिनानिप्र
काशंतेजलेतरुणसूर्यवत् ९२ एषाप्रसन्नसलिलापद्मनीलोत्पलायुता
हंसकारंडवाकीर्णापंपासौगंधिकायुता ९३ जलेतरुणसूर्याभैः षट्पदा
हतकेसरैः पंकजैः शोभतेपंपासमंतादभिसंवृता ९४ चक्रवाकयुतानित्यंचि
त्रप्रस्थवनांतरा मातंगमृगयूथैश्चशोभतेसलिलार्थिभिः ९५ पवनाहतवे
गाभिरूर्मिभिर्विमलेंभसि पंकजानिविराजंतेताड्यमानानिलक्ष्मण ९६ प
द्मपत्रविशालाक्षीं सततंप्रियपंकजां अपश्यतोमवैदेहींजीवितंनाभिरोचते ९

मते ९८ चित्रप्रस्थानिचित्राणिदेशानि वनेनराणिपस्याः सा ९९ पवनाहतवेगाभिःप
वनाघातजनितवेगाभिः अंभसिपंकजानिविराजंतेइत्यन्वयः ९९ अपश्यतोमेश्रान्तेमेति

फाषः सहीकर्ताः श्रीघनविवृदयोमेयतिवधी ८४ ॥

वा॰ रा॰ वामत्वं कौटिल्यं गतां विपुलां डलेभ्यो अभ्याप्राप्याः स्मारयिष्यन्ति स्मारयतीत्यर्थः चितकै
किं॰ वल्यैवापनद्वाराः न्यथा प्रयोगो विहरपरिपोषयः ६७ कामः कामकृत्तमायः भूयोपि

१
6
अहो कामस्य वामत्वं योगतामपि दुर्लभं स्मारयिष्यति कल्याणि कल्याण ॥
तरवादिनी ६८ शोकेनापारयित्वं कामेभवेद्भ्यागतो मया पुष्पिभूयापवसंतो
मानहन्यात्पुष्पितद्रुमः ६९ यानिस्म रमणीयानितयासह भवंतिमे तान्येवा
रमणीयानिजायंतेमेतयाविना ७० पद्मकोशपलाशानि द्रष्टुं दृष्टिर्हिमन्यः
ते सीताया नेत्रकोशाभ्यां सदृशानीतिलक्ष्मण ७१ पद्मकेसरसंसृष्टो वृक्षां
तरविनिःसृतः निश्वास इव सीताया वाति वायुर्मनोहरः ७२ सौमित्रे पश्य पंपा
याः दक्षिणेगिरिसानुनि पुष्पितां कर्णिकारस्य यष्टिं परमशोभितां ७३
अधिकं शैलराजोयं धातुभिस्तु विभूषितः विचित्रं सृजते रेणुं वायुवेगविघ
हितं ७४ गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः निष्पत्रैः सर्वतोरम्यैः प्रदी
प्ता इव किंशुकैः ७५ ॥ के॰ ६९ रमणीयानिभवंतिस्म ७० पद्मकोशस्य पला
शानि दलानि कामो ह्येकान्त्यायितत्रनेत्रकोशाभ्यां नत्र पुटाभ्यां सदृशानीति द्रष्टुं दृष्टि
र्मन्यतइत्यर्थः ७१ पद्मकेसरसंस्पर्शादिना सौरभ्यं हृद्यतां तरम्यादिनामोद्य ७४ किं॰

॥ श्री ॥

6A

पंपानीरुहदामालतीवृत्ताः संसिक्ता जलसेकेन वर्द्धिताः मालतीजातिः ७१ वासंतीहेमपुष्पिका ७०
चिरिबिल्वा रक्तमालः ७२ पद्मकाः पत्रविशेषाः सिंहकेसराः पिंजरा येन ७३ चूर्णिकाः शाल्म

पंपानीरुहाश्च मे संसिक्ता मधुगंधिनः मालतीमल्लिकापद्मकरवीराश्च पुष्पिताः ७४ के
तकाः सिंहवाराश्च वासंतश्च सुपुष्पिताः मातुलंगाश्च शृंगाश्च कुंदगुल्माश्च सर्वशः ७५
चिरिबिल्वा मधूकाश्च वंजुला वकुलास्तथा चंपकास्तिलकाश्च वनाः वृक्षाश्च पुष्पिताः ७६ ग
पद्मकाश्च वशाभेतनीलाशोकाश्च पुष्पिताः लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिंजराः ७७
अंकोलाश्च कुरंटाश्च चूर्णिकाः पारिभद्रकाः चूतापाटलयश्चापि कोविदाराश्च पुष्पिताः ७८
मुचुकुंदार्जुनाश्चैव दृश्यंते गिरिसानुषु केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः ७९
शाल्मलः किंशुकाश्चैव रक्ताः कुरुवकास्तथा तिनिशा नक्तमालाश्च चंदनाः स्पंदनास्त
था ८० हिंतालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः पुष्पितान्पुष्पिताग्राभिर्लताभिः
परिवेष्टितान् ८१ द्रुमान्पश्येह सौमित्रे पंपाया रुचिरान्बहून् वातविक्षिप्तविटपान्य
थासन्नान् द्रुमानिमान् ८२ लताः समनुवर्तंते मत्ता इव वरस्त्रियः पादपात्पादप
गच्छन्शैलाच्छैलं वनाद्वनं ८३ ॥ ली विशेषाः पारिभद्रको मंदारः ८० मुचुकुंदो मु
निलिंदा इति पाठांतरं ८२ पुष्पिताः संतीति शेषः ८३ तान्प्रपश्येत्याह पुष्पितानिति समा
सोक्तालंकारः ८४ तामेवोपमामाविष्करोति [illegible] वातेति ८५ ॥ राम ॥

का॰ रा॰ नैकरसास्वादसंमोदितइव अनेकरसास्वादेनजातहर्षइव ८६ मधुलिप्सया पुष्पात्पुष्पांतरंगच्छन
कि॰ अत्यंतेन इदंमृष्टइति मृष्टंमधुरे ८८ स्वयंनिपतितैः कुसुमैस्सम्हेरुपस्तीर्णाइयंभूमिः शयनप्रस्तरैः।
७ शयनार्थंतल्पप्रसरणैरिवसंजाताकृताः स्त्रिवकरी सर्वप्रियाप्रदानैस्तामप्युत्पश्य ८८ विविधै

वातिनैकरसास्वादसंमोदितइवानिल केचित्पर्याप्तकुसुमाः पादपामधुगंधिनः ८६
केकेन्द्रकुतूलसंवीताः श्यामवर्णाइवाबभुः इदंमृष्टमिदंस्वादुप्रफुल्लमिदमित्यपि ८०
रागयुक्तोमधुकरः कुसुमेष्वेवलीयते निलीयपुनरुत्पत्यसहसान्यत्रगच्छति ८८ म
धुलुब्धोमधुकरः पंपातीरद्रुमेष्वसौ इयंकुसुमसंचातैरुपस्तीर्णासुखाकृता ८९ स
यंनिपतितैर्भूमिः शयनप्रस्तरैरिव विविधाविविधैपुष्पैस्तैरेवनगसानुषु ९० वि
स्तीर्णाःपीतरक्ताभाः सौमित्रेप्रस्तराः कृताः हिमांतेपश्यसौमित्रेवृक्षाणांपुष्पसंभवं ९१
पुष्पमासेहितरवः संघर्षादिवपुष्पिताः ९१ आह्वयंतइवान्योन्यंनगाः षट्पदनादि
ताः कुसुमोत्तंसविटपाः शोभंतेबहुलक्ष्मणा ९२ एषकारंडवापक्षीविगाह्यसलिलं
शुभं रमतेकांतयासार्द्धंकामम्रुद्दीपयन्निव ९३ सैः पुष्पैर्नगसानुषुविस्तीर्णाः पीतरक्ता
भाः अतएवविविधाः प्रस्तराः शय्याकृताइत्युत्प्रेक्षा ९ हिमांतेशिशिरांतेपुष्पमासेचैत्रेसंघर्षा
त्स्पर्द्धा ९१ नगावृक्षाः विटपाःशाखाः कुसुमयुक्तशाखावंतइत्यर्थः ९२ उद्दीपयन्निवममेतिशेषः ७

मंदाकिन्यास्त्वत्सहचर्याः पंपायाः अतिशयोक्तिरत्र पतत्उक्तं मनोरमं अनेकपक्षिगणान्वितस्यागुणावि-
स्यानाणतस्यानमुक्तमित्यर्थः ५३ वसेमहि इति शेषः शक्राय शक्रपदप्राप्तये ५४ उक्तमेवाह

मंदाकिन्यास्त्वया दृष्टं रूपमेतन्मनोरमं स्थाने जगति विख्याता गुणास्तस्या मनोरमाः ५४
यदि दृश्येत सा साध्वी यदि चेह वसेमहि स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम ५५ न
ह्येवं रमणीयेषु शाद्वलेषु तया सह रमतो मे भवेच्चिन्ता न स्पृहान्येषु वा भवेत् ५६
अमी हि विविधैः पुष्पैस्तरवो विविधच्छदाः काननेस्मिन्विना कांतां चित्तमुन्माद-
यंति मे ५७ पश्य शीतजलां चेमां सौमित्रे पुष्करायुतां चक्रवाकानुचरितां कार-
ण्डवनिषेवितां ५८ प्लवैः क्रौंचैश्च संपूर्णां महामृगनिषेवितां अधिकं शोभते पंपा
विकूजद्भिर्विहंगमैः ५९ दीपयंतीव मे कामं विविधा मुदिता द्विजाः श्यामां चंद्रमुखीं
स्मृत्वा प्रियां पद्मनिभेक्षणां ६० पश्य सानुषु चित्रेषु मृगीभिः सहितान्मृगान् मां
पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतं व्यथयंतीव मे चित्तं संचरंतस्ततस्ततः ६१
अस्मिन्सानुनि रम्ये हि मत्तद्विजगणाकुले पश्येयं यदि कांतां ततः स्वस्ति भवेन्मम ६

रागांतरायेन पुनर्बाहनहीति अन्येषु सर्वांतरेषु ५६ अमी ये पंपा पुष्करैरायुता समेतायुतां ५८ स्म-
र्यमाणा स्मारयित्वा दीपयंतीवत्यन्वयः ६० विरहीकृतं विरहितं कृतं पश्येयमनुकर्षः संचरंतः मृगी

सिः सहितासमाहितकाण्डेषः ५ ॥

वा रा
कि
९
8

सतिमेवद्दितस्यैव विरहं तां जीवेयमिति यदि सा मया सह वै भवेत्पद्मानां सौगंधिकानां च गंधं पव
हं पवनं सेवेतं तदा जीवेयमित्यन्वयः ३ पंपावनवायुं धन्याः पिकया सह सेवंते तेन धन्या इत्यर्थः
विवशा शोकवशात्वात् ५ पृष्टा सीता क्वेति यत्र तं किं नु कुशलं वक्ष्यामि ६ मंदं मंदभाग्य ७ या

जीवेयं खलु सौमित्रे मया सह सुमध्यमा सेवेत यदि वैदेही पंपायाः पवनं शुभं ३ प
द्मसौगंधिवहं शिवं शोकविनाशनं धन्या लक्ष्मण सेवंते पंपापवनमारुतं ४ सा प
द्मपलाशाक्षी प्रिया विरहिता मया कथं धारयति प्राणान्विवशा जनकात्म
जा ५ किं नु वक्ष्यामि धर्मज्ञं राजानं सत्यवादिनं जनकं पृष्टसीतं तं कुशलं जनसं
सदि ६ या मामनुगता मंदं पित्रा प्रस्थापितं वनं सीता धर्मं समास्थाय क्व नु सा व
र्तते प्रिया ७ तया विहीनः कृपणः कथं लक्ष्मण धारये या मामनुगता राज्याद्भ्रष्टं वि
हितचेतसं ८ तच्चार्वंचितपक्ष्माक्षं सुगंधि शुभमव्रणं अपश्यतो मे वदनं कस्याः सी
दतीव मतिर्मम ९ स्मितहास्यांतरयुतं गुणवन्मधुरं हितं वैदेह्या वाक्यमतुलं
लं कदा श्रोष्यामि लक्ष्मण १० ॥

रघे प्राणानिति शेषः ८ अंचिते पूजिते पक्ष्मले ते स
ःक्लिष्टोपवज्ञाहृशे ९ स्मितेन ईषत्हासेन हास्येन विनोदवचनेन तेनांतरे मध्ये एव युक्तं नतो।
हृष्टेषाद्दहितं इति पतिव्रतानां लक्षणानि स्वतः दर्शवर्णितं सहुवानपि कश्चित्प्रसन्नहास
विशेषणात्पुनः मिति वाक्यविशेषणमाह गुणवान् प्रेमाद्वतः मधुरं अपरुषवाक्यं १० ॥ ९

8A

वेनेडुः खिन्नाप्यायितपुडुः खेव ११ कथमास्नुषा कथं किं प्रकारेति च पृष्ठो जीकिं नु वक्ष्यामि यथा ज्ञातं वक्ता
मिवा अन्यथा वा भयमपि वक्तुं न शक्यत इत्यर्थः १२ अवश्यमनुयायात्यर्थं १३ संस्तम्भ शोकं निरुध्य धी।
रेण्यः अकलुषात्मनाम पीडुशानाशेनाकुमतत्संभ्रमतिर्मदावेतितन्नअपितमदेव १४ अतः स्मरेत।
त्यादिसंयोगा विप्रयोगान्ता उनित्यापन प्रियविषये वयंभावि वियोगडुः खिस्मत्वात्तु हेतन्य।

प्राप्यडुः खिन्नवनेशपामास्तो मन्मथविकर्षितेन नष्टडुः खेवदृष्टेव साध्वीसाप्रभाषत ११
किं नु वक्ष्यामि याध्यायाको शल्याहि तत्पात्मजा केसास्नुषेति पृष्ठोजी कथं चाति म
नस्विनी १२ गच्छ लक्ष्मण वश्यत्तमरत्नेभ्रात्रवत्सलं नष्टं हृजीवितं शात्रकस्तामन्ते तेजन
कात्मजो १३ इति रामेम महात्मानं विलपंतमनाथवत् उवाच लक्ष्मणोभ्राताव चनं
युक्तमव्ययं १४ संस्तंभरामभद्रं त्वमाशुचः पुरुषोत्तम नेदृशानां मतिर्मदा भवत्यकलु
षात्मनां १५ स्मृत्वा वियोगजं डुःखं त्यजस्नेहं प्रियजने अति स्नेह परिष्वंगाद्वर्तिरार्द्रा
ता पिदह्यते १६ यदि गच्छति पातालं ततोभ्यधिकमेव वा सर्वथा रावणस्तावन्नभवि
ष्यति राघव १७ प्रवृत्तिर्लभ्यतां तावत्तस्य पापस्य रक्षसः ततो हास्यति वा सीतां निधनं

न विधनेत्व वाधकमाह अतिस्नेहेति आर्द्रा जलसिक्तापि एवं शांतमपि चित्तमतिस्नेहसंबंध
तद्वियोगजशोकदीपनदीप्यत एवेतिभावः १६ ततोभ्यधिको पातालादप्यधिकेऽगम्यदेशेन
जीविष्यतीत्यर्थः १७ तावत्त्वयमं प्रवृत्तिर्वासवृत्तांतः १८ ॥ राम ॥ राम

वा रा
किं
५
९

ह्निवंशुमानः १९ स्वास्थ्यापैर्यं स्वस्वभावरूपं नष्टः कार्यावसंपसे व्यार्थाए वांतेः पुंभिः सोर्थो
ऽयत्नयत्नाभावेसतिनाधिगम्यतेनप्राप्यते २० अतउत्साहइति वलवानकार्यसाधनसमर्थः
उत्साहमात्रेशत्रुसंहारेपौरुषं २१ कामवृत्ततेकामपरतेत्वंत्व शोकेपृष्ठतः संन्यस्यकामन
शोकमेवनेकामस्यवृद्धेसत्तेसवनेपृष्ठतः कृत्वेत्यर्थः महात्मानंऽजलमामलास्पृष्टचिंते

परिश्यातिहितेगर्भेरावणेनः महसीतया तत्राप्यनेनहनिष्यामिनचेहास्यतिमैथिली १९
स्वास्थ्यभद्भजस्वार्जत्यजत्वकृपणामतिः अर्थोहिनष्टकार्यार्थैरयत्नेनाधिगम्य २५
ते २० उत्साहोवलवानार्यनास्त्युत्साहात्परंवलं सोत्साहस्यहिलोकेषुनकिंचिद
पिदुर्लभं २१ उत्साहवंतः पुरुषानावसीदंतिकर्मसु उत्साहमात्रमाश्रित्यप्रतिल
प्स्यामजानकीं २२ त्यज्यतांकामवृत्तत्वंशोकंसंन्यस्यपृष्ठतः महात्मानंकृतात्मानं
स्वरूपं नावबुध्यसे २३ एवंसंबोधितस्तेनशोकोपहतचेतनः त्यज्यशोकंचमोहंचरामोधै
र्यमुपागमत् २४ सोभ्यतिक्रामदव्यग्रस्तामचिंत्यपराक्रमः रामः पंपांसुरुचिरां

रम्यांपारिप्लवद्रुमां

तिरतिशयपौरुषेपोदृस्वभावविंतं चकृतात्मानंकृतिस्वंतत्वादिषुगुरुभिःशिक्षितस्व
रूपंकिंनावबुध्यसेयद्यपिस्वस्यलोकवद्धर्मोधियंचिंतेनाहितथापिमापिकेंदनाश्रंप
नटस्तिनस्तोकारोवापकाभावात् २३ एवंहिद्विवचनमात्रेणशुद्धसत्वप्रकृतिकत्वात्
आरोपितशोकादिसंन्यस्यधैर्यमुपागमत् मोहकामजोमोहजश्चशोकः २४ अतिक्रा

मत् प्रतिक्रमत् पारिप्लवद्रुमा चंचलाः कीदृशमायस्थातो २५

२१

१५

9A

विचार्य लक्ष्मणेनैव युक्तमिति शेषः २६ धर्मेण सत्त्वे रामेत्यादि नीतिरूपधर्मेणोपायेन बलेन च यदि ग
च्छति पातालमित्यादि सबलकथनेन च २७ एवं ब्रुवन्तमनुद्वयवक्ष्यमाणे दर्शयति त्ताविति
वितत्रसे वित्त्रास वाल्यानीतत्वशंकया त्रासः २८ मिष्टभोजनादि विषये चेष्टा सर्पिने व विचेष्टश्च
नकारश्च विश्रान्तिमतस्य च भवति मित्याधुनिकपाठे तस्य सुग्रीवस्य चिंतन दर्शनेन विश्रांतिम

निरीक्षमाणः सहसा महात्मा सर्वं वनं निर्भरकंदरं च ३ शीघ्रं च तेः सह लक्ष्मणेन विचा
र्यं दुःखोपहतः प्रतस्थे ३९ ते मत्तमातंगविलाससामी गच्छंतमग्र्यमनामहात्मा स
लक्ष्मणो राघवमिष्टचेष्टो रक्षत्सधर्मेण बलेन चैव ४० तावृष्यमूकस्य समीपचारी चर
न्ददर्शाद्भुतदर्शनीयौ शाखामृगाणामधिपस्तरस्वी वितत्रसे नैव विचेष्टचेष्टो ४१
स तौ महात्मा गजमंदगामी शाखामृगस्तत्र चरन्चरंतौ दृष्ट्वा विषादं परमं जगाम चिंता
परीतो भयभारमग्नः ४२ तमाश्रमं पुण्यसुखं शरण्यं सदैव शाखामृगसेवितांते त्रस्ताश्च
दृष्ट्वा हरयो विजग्मुर्महौजसौ राघवलक्ष्मणौ तौ ४३ इत्यार्षे श्रीरामायणे किष्किंधा

द्रूपवद्भवेत्यर्थः ४२ उक्तमेव विवृणोति सतावितिभयभारेण मग्नोत्साहः ४३ तमाश्रमं स
तंगसापाद्वालिनादुष्प्रवेशमतएव शरण्यं मे वितांते सेवितमध्यं सेवितप्रांतं वा तौ दृष्ट्वा त्रस्ता
हरयः वालिप्रेरितत्वबुध्याभीताः विजग्मुः गताः ४३ इति रामाभिरामे श्रीरामे परामायणतिल
के किष्किंधाकांडे प्रथमः सर्गः १ ॥ राम

वा रा
कि
१०
10

तदृष्ट्वा विलसत्पतिं तौ नितिं १ नव्यतिष्ठत नव्यवस्थितोऽभूत् अवसादं विषण्णमभूत् अव।
स्थितिप्रस्थानयोर्गुरुलाघवं विमृश्य सचिवैः सह विचार्य ४ ततः विचारानन्तरं प्रस्थाने।
छद्मनाचीरवस्त्रः शशंस भयहेतुमिति शेषः ५ तमेवाह एताविति छद्मना विश्वासार्थं चीर
विवेषणात्यर्थः ध्रुवमित्युत्प्रेक्षायां अन्तस्तात्प्रस्थानत्वमित्याशयः ६ ततः सुग्रीवाज्ञय

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ वरायुधधरौ वीरौ सुग्रीवः शंकितोऽभवत् १
उद्विग्नहृदयः सर्वा दिशः समवलोकयन् न व्यतिष्ठत कस्मिंश्चिद्देशे वानरपुंगवः २
नैव चक्रे मनः स्थाने वीक्षमाणो महाबलौ कपेः परमभीतस्य चित्तं व्यवससाद ह ३
चिंतयित्वा स धर्मात्मा विमृश्य गुरुलाघवं सुग्रीवः परमोद्विग्नः सर्वैरनुचरैः सह ४
ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ५
एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवं छद्मना चीरवसनौ प्रचरंताविहागतौ ६
ततः सुग्रीवसचिवाः दृष्ट्वा परमधन्विनौ जग्मुर्गिरितटात्तस्मादन्यच्छिखरमुत्तमं ७
ते क्षिप्रमभिगम्याथ यूथपा यूथपर्षभं हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे ८

तेनतेरे सुग्रीवसचिवास्ते परमधन्विनौ प्रतिपश्य शंकास्पदौ दृष्ट्वा तस्मात्पूर्वमधिष्ठिताद्गिरि
तटादन्यत्तस्यैव गिरेः शिखरं जग्मुः सुग्रीवेण सहेति शेषः अन्ये शिखरमित्यपाठे पुल्लिङ्गमार्षं ७
ते क्षिप्रं शिखरान्तरमभिक्रम्य प्राप्य यूथपर्षभं वानरश्रेष्ठं सुग्रीवं परिवार्योपतस्थिरे उपविष्टाः ८

उक्तमेवविवृणोति एवमिति उक्तरीत्यास्थितिगतिभयाभयाश्वबुद्धःस्वादायेकायनतमेकमार्गंमा।
मानत्वंगताःगिरेःप्रागपिपरिष्ठतगिरिशृंगान्गिरिंसंचरणाशाखामृगश्वासादिकूर्वतापर्यानेव
तेः ९ सुग्रीवसचिवाहनुमदादयः १२ वालिकिल्बिषेणवालिप्रवर्त्तनेनयाकिल्बिषाछंधा

एवमेकायनगताःप्लवमानागिरेर्गिरिं प्रकंपयंतोवेगेनगिरीणांशिखराणिच ९ त
तःशाखामृगाःसर्वेप्लवमानामहाबलाः बभंजुश्चनगांस्तत्रपुष्पितान्दुर्गसंश्रितान् १०
न १ आप्लवंतोहरिवराःसर्वतस्तंमहागिरिं मृगमार्जारशार्दूलांस्त्रासयंतोययुस्त
दा ११ ततःसुग्रीवसचिवाःपर्वतेंद्रंसमाहिताः संगम्यकपिमुख्येनसर्वेप्रांजलय
स्थिताः १२ ततस्तंभयसंविग्नंवालिकिल्बिषशंकितं उवाचहनुमान्वाक्यंसुग्रीवं
वाक्यकोविदः १३ संभ्रमस्त्यज्यतामेषसर्वैर्वालिकृतेमहान् मलयोयंगिरिवरोभयं
नेहास्तिवालिनः १४ यस्मादुद्विग्नचेतास्त्वंविद्रुतोहरिपुंगव तंक्रूरदर्शनंक्रूरंनेहप
श्यामिवालिनं १५ यस्मात्तवभयंसौम्यपूर्वजात्पापकर्मणः सनेहवालीदुष्टा
त्मानतेपश्याम्यहंभयं १६ ॥

छेकितेसंभ्रमस्त्यज्यतामेषःवालिकृतेवालिनिमित्तं
सर्वैर्वानरैःमलयपर्यायोऋष्यमूकः १४ यस्मात्वालिनः १५ तदेवाह्यादरात्यस्मात्तवे
तिपूर्वजात्वालिनः ऽहपर्वते तस्मात्तेभयंनपश्यामीत्यन्वयः १६ ॥ राम ॥

वा० रा० कि० ११

शाखामृगगतं वहुचेष्टं चपलचित्तं मर्कटत्वं तदेवाह लघुचित्ततयेति लघुचपलं १७ ननु ततो
भयाभावेपि तन्मैत्रीत्यागः स्यादत आह बुद्धीति इंगितैरंतराशयगमकैश्चेष्टाविशेषैर्बुध्यानिश्च
यात्मकेन विज्ञानेन पारशकाशपज्ञानेन संपन्नः सन् कुर्वीत सर्वं माचर भूतानि निजशास्त्र
प्रजाति १८ नेदं भयं च पूलमलमित्याह सुग्रीवश्चेति १९ तदेवाह दीर्घेति २० ननु वनचारिणा

अहो शाखामृगत्वं ते व्यक्तमेव प्लवंगम लघुचित्ततयात्मानं न स्थापयसि यो मतौ १७
बुद्धिविज्ञानसंपन्न इंगितैः सर्वमाचर न ह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि १८
सुग्रीवस्तु शुभं वाक्यं श्रुत्वा सर्वं हनूमतः ततः शुभतरं वाक्यं हनूमंतमुवाच ह १९
दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ राजानौ बहुमित्राश्च स्येतौ वरस्वेताय
मौ २० वालिप्रणिहितावेव शंके हं पुरुषोत्तमौ राजानो बहुमित्राश्च विश्वासो ना
त्रहिक्षमः २१ अरयश्च मनुष्येण विज्ञेयाश्छद्मचारिणः विश्वस्तानामविश्वस्ताः
छिद्रेषु प्रहरंत्यपि २२

वानरेण वालिना कृतो नयोः प्रवर्तनात् तत्राह राजान इति बहुमित्राः जात्यंतरेष्वपि मित्रवं
तः यथा दशरथो गृध्रराजेन मित्रवान् एवं वालिनोपि नरमैत्री संभावितेति भावः २१ ननु यथा
पितापसाप्याकृतो भयमतत्राह अरयश्चेति पतलेच्छद्मचारिणो विज्ञेयाः यतश्चविश्वस्तानां
वचनयाप्राप्तविश्वासानामरीणां स्वयमविश्वस्ताश्छिद्रेषु प्रहारावकाशेषु प्रहरंति अतो विज्ञे

११

11A

एकमुपनयानिकृतेसेषिति राजानोबहुदर्शिनः नानाविधंवंचनोपायज्ञाः परमहंतारोभवंतितेनएते
प्राकृतैः प्राकृतवेषधारिभिर्जनैः ज्ञातव्यान्तराशयाः २३ यत एवमतस्त्वमिति प्राकृतेनैव उदासीने
नैवइंगितानांप्रकारैः विशेषैः रूपेणसौम्याकारेण आभाषणेन तेनतस्यसंगर्हीयमानेनतरेणच
नयोर्मनस्थयोः यदित्वत्समीपस्थितेप्रहृष्टमनसौउत्तरप्रत्युत्तरादौसंतहृष्टमनसौतत्स्वात्तयोरभि
मुखंस्थित्वाममैवप्रशंसाभिस्तद्दीपकवाक्यैरिंगितैर्मोमकाभिप्रायंबोधनैर्मयितौविश्वासयन्

कृत्येषुवालीमेधावीराजानोबहुदर्शिनः भवंतिपरहंतारस्तेतेषाः प्राकृतैर्नरैः २३ ते
तथाप्रकृतेनैवगत्वातत्पार्श्वंप्लवंगम इंगितानांप्रकारैश्चरूपव्याभाषणेनच २४ लक्ष
यस्वतयोर्भावंप्रहृष्टमनसौयदि विश्वासयन्प्रशंसाभिरिंगितैश्चपुनःपुनः २५ ममैवा
भिमुखंस्थित्वापृच्छत्वंहरिपुंगव प्रयोजनंप्रवेशस्यवनस्यास्यधनुर्धरौ २६ शुद्धात्मा
नौयदितेतौजानीहित्वंप्लवंगम व्याभाषितैर्वारूपैर्वाविज्ञेयादुष्टतानयोः २७ एवम ॥

यस्यवनस्यप्रवेशस्यप्रयोजनंपृच्छ यद्वाममैवाभिमुखंयथातथास्थित्वाप्रशंसाभिस्तयोस्त्व।
तिभिरिंगितैश्चपेलावात्मनिमयिचविश्वासयन्पृच्छस्यत्वयः स्वाभिमुखंस्थितिकथनमन्या
दृशवचनकथनसंभावनयातन्निरासोयेनिवोध्यं २६ प्रश्नावसरदर्शयति शुद्धेति यद्येतौशु
द्धात्मनावस्माद्वेषरहितौजानीहितस्यमित्रंचेच्चतदभिमतंप्रयोजनंपृच्छ उपसंव्याभाषितैरि
तिदुष्टतावेतितत्रेणपरिच्छेदः २७ ॥ एवम ॥ ॥

प्रपरमानः इतिश्रीरामायणेकिष्किंधाकांडेद्वितीयःसर्गः २ विज्ञायतात्पर्येनोक्तात्वा १ भिक्षुरूपंप्रा॰
कृतवतापसरूपं शाठबुद्धितया प्रविश्वस्तबुद्धितया १ विनीतवत्विनीतेयोग्यं ३ यथावत्प्रशशंस

इत्येवंकपिराजेनसंदिष्टोमारुतात्मजः चकारगमनेबुद्धिंयत्रतौरामलक्ष्मणौ २५ तथेति
संपूज्यवचस्तुतस्यकपेःसुभीतस्यदुरासदस्य महानुभावोहनुमान्ययौतदायत्रसरामो
तिबलीसलक्ष्मणः २६ इत्यार्षेरामायणेकिष्किंधाकांडेद्वितीयःसर्गः २ वचोविज्ञायहनु
मानसुग्रीवस्यमहात्मनः पर्वतादृश्यमूकात्तुपुप्लुवेयत्रराघवौ १ कपिरूपंपरित्य
ज्यहनुमान्मारुतात्मजः भिक्षुरूपंततोभेजेशाठबुद्धितयाकपिः २ ततःसहनुमान्
वाचाश्लक्ष्णयासुमनोज्ञया विनीतवदुपागम्यराघवौप्रणिपत्यच ३ आबभा॰
षेचतौवीरौयथावत्प्रशशंसच संपूज्यविधिवद्वीरोहनुमान्वानरोत्तमः ४ उवाच॰
कामतोवाक्यंमृदुसत्यपराक्रमौ राजर्षिदेवप्रतिमौतापसौसंशितव्रतौ ५ देशंक
थमिमंप्राप्तौभवंतौवरवर्णिनौ त्रासयंतौमृगगणानन्यांश्चवनचारिणः ६ राम

नतमिथ्यास्तुरित्यर्थः आबभाषेवक्तुमभिमुखीचकारसंपूज्यवाचाप्रशस्य ४ कामतःसुग्रीवो
पदेशाविरुद्धस्वेच्छातःराजर्षीचदेवौचतत्प्रतिमौ ५ वरवर्णिनौब्रह्मचारिश्रेष्ठौअन्यांश्चरक्ता १२

12A

नमेननतोवीक्षमाणोणाकिंचिद्दृष्ट्वानेषमाणाविवेक्षपर्थः इमांनदीमिति सरस्वतीप्रविश्यतनन्नेनन
दीप्तापचारः इतिकेचित नद्यवेक्ष्यमन्ये ७ शोभनोवर्णाग्राभाकांतिश्चययोस्तौ निर्भयंतौ किंचि

पंपातीररुहान्वृक्षानानीक्षमाणोसमंततः इमांनदींशुभजलांशोभयंतौनरस्तिनौ ७
येपंवंनोम्नवर्णाभाकौसुवांचीरवाससौ निर्भयंतौवरभुजौपीरूपंतौविमाःप्रजाः
सिंहविप्रेक्षितौवीरौमहाबलपराक्रमौ शक्रचापनिभेचापेप्रगृहीतौशत्रुनाशनौ
श्रीमंतौरूपसंपन्नौवृषभश्रेष्ठविक्रमौ हस्तिहस्तोपमभुजौद्युतिमंतौनरर्षभौ ९
प्रभयापर्वतेंद्रोसौयुवयोरवभासितः राज्यार्हावमरप्रख्यौकथंदेशमिहागतौ १०
पद्मपत्रेक्षणौवीरौजटामंडलधारिणौ अन्योन्यसदृशौवीरौदेवलोकादिहागतौ ११
यदृच्छयेवसंप्राप्तौचंद्रसूर्यौवसुंधरां विशालवक्षसौवीरौमानुषौदेवरूपिणौ १२ सिंह
स्कंधौमहोत्साहौसमदाविवगोवृषौ आयताश्चसुवृत्ताश्चबाहवःपरिघोपमाः १३
सर्वभूषणभूषार्हाः किमर्थंनविभूषिताः उभौयोग्यावहंमन्येरक्षितुंपृथिवीमिमां १४

नद्यः स्ववशेनेतिशेषः इमाःवन्याःप्रजाः पीरूपंतौस्वरूपमात्रनश्रुतिशेषः ९ हस्तः शुंडादंडः १० रा
ज्यार्हौदेवतुल्यौदृशौहित्वाकथमिहागतावित्यर्थः आकारेणमहाराजननिश्चयादवमुञ्जिः

वा रा
किं
३३
13

विचमनुलेपनं सर्पाणां तलहृष्टमणीगणयोगौ हेमभूषितेन वज्रेण यथा १९ निर्मुक्तौ मुक्तकंचुकौ कस्मा
द्वै कस्माद्धेतोर्नाभिभाषथः प्रस्तुतरमिति शेषः १९ ननु कस्त्वं कस्य वयं स्मास्माभिः प्रस्तुतरं देय
तत्राह सुग्रीव इति सुग्रीवस्यान्तद्वावपञ्चायनत्वात् निश्चयकम्पितः विनिकृतो निरस्तः २० ननु

प्रकाशन्ते यथेन्द्रस्य वज्रे हेमविभूषिते संपूर्णाश्च शितैर्बाणैस्तूणाश्च भयदर्शनाः १७ जी
वितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः महाप्रमाणौ विपुलौ तप्तहाटकभूषणौ १८
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथः १९
म सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुङ्गवः वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखि
त तः २० प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना राज्ञा वानरमुख्यानां हनूमान्ना
म वानरः २१ युवाभ्यां सह धर्मात्मा सुग्रीवः सख्यमिच्छति तस्य मां सचिवं वित्त
वानरं पवनात्मजं २२ भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकारणात् ऋश्यमूकादिह प्रा
प्तं कामगं कामचारिणं २३ एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ वाक्यज्ञौ वा
क्यकुशलः पुनर्नोवाच किंचन २४ एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् प्रहृ

त्वं ज्ञातस्तत्समीपे प्रेषणे किमर्थं तत्राह युवाभ्यामिति २२ वानरराजस्य विवक्षमाणसंरूपं
ऊनमस्तत्राह भिक्षुरूपेति ग्रनेनतस्य शुद्धवानरत्वमेव नेत्यपि वोधितं ईदृशो विज्ञेतिप्राकृतने।

१३

13A

तमेव सुग्रीवमेव कांक्षमाणस्येच्छत इत्यर्थः २६ तमभ्यभाष अभिभाषस्वेति यावत् वाक्येयत्तिवा।
क्यज्ञं वाक्यरचनाभिज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमभ्यभाषस्व त्वं २७ विनयप्रातिशाख्यादि।
ज्ञानप्रवेकाभ्यासः ऋग्वेदविष्टयेन हीनायो न भवति तेन एकैकानुवाक्ये नुवाकान्तरस्येको
पेण न ह्वारणस्य डष्कर नायजुर्वेदधारिणा हीनभिन्नेन गायत्न् विषयाहा दर्डे न्नेष्वाला भावे
दज्ञानहीनभिन्नेनैव प्रभाषितं शक्यं न तत् हीनेनेत्यर्थः षष्ठाषीशेषवा पद्मानहीने रेव प्रभा

सचवोयं कपीन्द्रस्य सुग्रीवस्य महात्मनः तमेव कांक्षमाणस्य ममान्तिकमिहागतः २६
तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिं वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिंदम २७
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः नासामवेदविदुषः शक्यमेवं विभाषितं २८
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतं बहु व्याहरतानेन न किंचिदपशब्दितं २९
न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ३०

षितुं न शक्यं न शक्यं न शाक्यमित्यर्थः तेनार्थे सर्वेथा वक्तुं इति नोपेक्षाहे इति भावः २८ नूनं वेद
मात्राध्यायिना न किंचिद्ज्ञानमेवाटितानुशक्यं तत्राह नूनमिति कृत्स्नं पदं तद्दर्थं सहस्रपति
णेयापयपाणिन्यादिसहितं व्याकरणं वा साधुत्वस्यार्थं घटितत्वात् अनेन सर्वज्ञत्वसूचितं
तथा श्रवणं हेतुमाह बह्विति २९ इंगितैरप्यसौ विपश्चित् योग्य इत्याह न मुख इति दोषः संविदो
व्यवहारकाले इति शेषः ३० ॥ राम ॥ राम ॥

अथवचनरचनासौष्ठवमाह अविस्तरं नातिविस्तारमित्यर्थः असंदिग्धं असंदिग्धार्थमसंदिग्धाक्षरं
चअविलंवितंअलेनास्खलद्गीष्टं अव्यथं नविद्यतेश्रोतॄणांव्यथायस्मात्तादृशं नेनाक्रांतिकष्टव
र्णमित्यर्थः उरस्थंमध्यमारूपेणकंठगंवैखरीरूपेणकंठविवरात्श्रोतृश्रोत्रगतं अतएवमध्यम
स्वरेनात्युच्चेनातीनीचे ३१ संस्कारक्रमसंपन्नांसंस्काराणांक्रमेणक्रमेणजनितेनसंपन्नांसमर्थांविशिष्टानु
पूर्वीविशेषरूपेणपदादीनांग्रहणायक्रमवत्तद्वर्णोच्चारसंस्कारानंतःकरणेउत्पाद्यततक्रमे।

अविस्तरमसंदिग्धमविलंवितमव्ययं उरस्थंकंठगंवाक्यंवर्ततेमध्यमस्वरे ३१ संस्का
रक्रमसंपन्नामद्रुतामविलंविता उच्चारयतिकल्याणींवाचंहृदयहर्षिणी ३२ अनया।
चित्रयावाचात्रिस्थानव्यंजनस्थया कस्यनाराध्यतेचित्तमुद्यतासेररेरपि ३३ एवंविधो
यस्यदूतोनभवेत्पार्थिवस्यतु सिध्यंतिहिकथंतस्यकार्याणांगतयोनघ ३४ एवंगुण
गणैर्युक्तायस्यस्युःकार्यसाधकाः तस्यसिध्यंतिसर्वेर्थादूतवाक्यप्रचोदिताः ३५

णाक्रमवद्वर्णपिचभासरवाक्यपदीयादौस्पष्टंतेनमध्यमवृत्त्योच्चारणंसूचितं तदाहाद्रुतामवि
लंविताभिति अतएवहृदयाहर्षिणी ३२ त्रिस्थानव्यंजनस्थयात्रिषुस्थानेषुउरःकंठशिरः
सुप्रकटंजननमभिव्यक्तिर्यस्यातिष्ठतिश्रोत्रग्राह्यस्वरूपंलभतेतादृश्या अनेननित्यएवस्फोटरू
पःशब्दउनिसूचितं नाराध्यतेनानुकूल्यते ३३ कार्याणांगतयःपरिपाकाः ३४ दूतवाक्यप्रचो
दिताःदूताकवाधिताः ३५ ॥ राम ॥ राम ॥

14A

एवमुक्तः रामेण तिरोषः ३९ नौप्रावयोः तमेव सुग्रीवमेवमार्गोवोमार्गेयाव ३७ यथा ब्रवी
षि मत्स्यमिच्छती निपटवादीस्ततथेव किष्किंधा वन्नार्थः ३८ नयापपत्तोसुग्रीवस्येति शेषः।
ताभ्यां राम सुग्रीवाभ्यां ३९ यगमानः इति रामाभिरामे श्रीमत्रामायणटीकायां तिलकाख्यायां किष्किं
धाकांडे तृतीयः सर्गः ३ तद्वचः सचिवात्पंकपीन्द्रस्य सुग्रीवस्य महात्मन स्वमेव कोत्तमा

एवमुक्तस्तु सौमित्रिः सुग्रीवस्य विवेकपि शुश्रूषमेवपनवाक्यज्ञो वाक्यज्ञे पवनात्म
जे ३९ विदितानो भगुणाविहु सुग्रीवस्य महात्मनः तमेव चावां मार्गाव सुग्रीव।
स्तिवेश्वरं ३७ यथा ब्रवीषि हनुमन् सुग्रीववचनादिह तत्तथा हि करिष्यावो
वचनात्तव सत्तम ३८ ततस्य वाक्यं निपुणं निशम्य प्रहृष्टरूपः पवनात्मजः
कपिः मनः समाधाय जयोपपत्तौ सख्यं तथा वर्त्तयितुं पवृत्ताभ्यां ३९ इत्यार्षे रामा
यणे वाल्मीकीये किष्किंधाकांडे तृतीयः सर्गः ३ ततः प्रहृष्टो हनुमान् कृत्यवा।
निति तद्वचः श्रुत्वा मधुरभावे च सुग्रीवं मनसागतः १ भाव्यारज्ञागमस्तस्य सु
ग्रीवस्य महात्मनः यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतं २ ॥

ता स्य मसंनि कृत्यापागत इति राम वञ्चामहात्मन इति मोपचार प्रयोग ततः सुग्रीव विषये मध्यभा
वे श्रुत्वा तेमव कात्तमा मात्र न सुग्रीव राम किं चित्कृत्यवानिति चिंतापमहृष्टः सुग्रीवेस्य सुग्री।
वाभिमत सिद्धिमनसागतो हृष्टवान १ तदेवविवृणोति भाव्य इति श्रवणपभावीत्यर्थः यदा।

ंमहाप्रभहृष्टबलानसाद्यैत्यज्ञः प्रापयेतजहीसंनेवउपाग
नसुग्रीवसमीपमर्थे ४ ॥

वा रा एवंसहृदयत्वमनुगात्यस्तस्यामुक्तं एकुनितनत्रनि ३ पंपाकाननेनमंडितमलंकृतंघोरमन्यतइ
कि· तिशेषः ४ रामचोदितः इंगितैर्मतिशेषः आचचक्षेबोधितवान ५ पितामहइवपातात्प्लक
१५ तेनतत्सथः ६

15 ततः परमसंहृष्टोहनूमान्प्लवगोत्तमः प्रत्युवाचततोवाक्यंरामंवाक्यविशारदं ३
किमर्थंचवनंघोरंपंपाकाननमंडितं आगतःसानुजोदुर्गंनानाव्यालमृगायुतं ४
चौ२ तस्यतद्वचनंश्रुत्वालक्ष्मणोरामचोदितः आचचक्षेमहात्मानंरामंदशरथात्मजं ५
राजादशरथोनामद्युतिमान्धर्मवत्सलः चातुर्वर्ण्यंस्वधर्मेणनित्यमेवाभिपा
लयत् ६ नद्वेष्टाविद्यतेतस्यसतुद्वेष्टिनकंचन सतुसर्वेषुभूतेषुपितामहइवापरः ७
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः तस्यायंपूर्वजःपुत्रोरामोनामजनैःश्रुतः ८
शरण्यःसर्वभूतानांपितुर्निर्देशपारगः ज्येष्ठोदशरथस्यायंपुत्राणांगुणवत्तरः ९
राजलक्षणसंयुक्तोसंयुक्तोराजसंपदा राज्याद्भ्रष्टोमयावस्तुंवनेसार्द्धमिहागतः १०
भार्ययाचमहाभागसीतयानुगतोवशी दिनक्षयेमहातेजाःप्रभयेवदिवाकरः ११
अहमस्यावरोभ्रातागुणैर्दास्यमुपागतः कृतज्ञस्यबहुज्ञस्यलक्ष्मणोनामनाम
निर्देशोनियोगःतत्पारगः तस्यसमासप्रकल्पत्वादेवमुक्तं ६ सयुक्तःसयुज्यमानःभ्रष्टः किं
चिन्निमित्तवशात ११ अवरःकनीयानदास्यमुपागतोस्मीतिशेषः १२ ॥ रा· १९

15A

रहितेनाग्राजाभ्यां रहितेन कालेन त्रापतेन विशिष्टोतिशोषः १२ दनुः कबंधः सततस्य नीत्पाख्यातः १३
संगेगंतेदिवमाकाशगतः अव्यानितः १० नाथरतंक अनुतिदेवराज्योतिशोषः ११ यः शरण्यो

राघवोहंस्य महाहं स्य सर्वभूतहितात्मनः ऐश्वर्येण विहीनस्य वनवासे रतस्य च १३
रक्षसापहृताभार्यारहितकामरूपिणा तच्च जज्ञापतेरक्तः पत्नीयेनास्य वा हृता १४
दनुर्नामदितेः पुत्रः शापाद्राक्षसतांगतः आख्यातस्तेन सुग्रीवः समर्थो वानराधि
पः १५ सज्ञास्यति महावीर्यस्तव भार्यापहारिणं एवमुक्त्वा दनुः स्वर्गे भ्राजमानो
दिवंगतः १६ एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः अहं चैव च रामश्च सुग्रीवंश
रणंगतौ १७ एष दत्वा च वित्तानि प्राप्य चानुत्तमं यशः लोकनाथः पुराभूत्वा सु
ग्रीवं नाथमिच्छति १८ सीता यस्य स्नुषा चासीच्छरण्यो धर्मवत्सलः तस्य पुत्रः शर
ण्यस्य सुग्रीवं शरणंगतः १९ सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा गुरुर्मे रा
घवः सोयं सुग्रीवं शरणंगतः २० यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः सरामो
वानरेंद्रस्य प्रसादमभिकांक्षते २१ येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः
मानिताः सततं राज्ञा सदा दशरथेन वै २२ तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रु
तः सुग्रीवं वानरेंद्रं तु रामः शरणमागतः २३
धर्मवत्सस्यासीदिस्पर्थः २४ सर्वगुणोपेताः मूर्धाभिषिक्ताः राजानिया वत्सदा प्रतिदिनं सततं

सुग्रीव ११

वा॰ रा॰ कि॰ १६
16

शोकाभिभूते शोकाविष्टे शोकार्ते शोकपीडिते २४ साश्रुपातनं श्रान्तकमुत्पन्नशरणापेक्षेत्सश्रुपा
तेन सहिते २५ द्रष्टव्याः द्रष्टुयोग्याः सहीति अनन्तस्यापि सहायापेक्षत्वदर्शितं २६ यद्देवतः प

शोकाभिभूते रामे तु शोकार्ते शरणं गते। कर्तुमर्हति सुग्रीवः प्रसादं सहयूथपैः २४
एवं ब्रुवाणं सौमित्रिं करुणं साश्रुपातनं हनूमान्प्रत्युवाचेदं वाक्यं वाक्यविशार
दः २५ ईदृशा बुद्धिसंपन्ना जितक्रोधा जितेन्द्रियः द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शन
मागता २६ स हि राज्याच्च विभ्रष्टः कृतवैरश्च वालिना हृतदारो वने त्रस्तो भ्रात्रा
विनिकृतो भृशं २७ करिष्यति स साहाय्यं युवयोर्भास्करात्मजः सुग्रीवः सह चा
स्माभिः सीतायाः परिमार्गणे २८ इत्येवमुक्त्वा हनुमाञ्छ्लक्ष्णं मधुरया गिरा ब
भाषे सोऽभिगच्छाम सुग्रीवमिति राघवं २९ एवं ब्रुवन्तं धर्मात्मा हनूमन्तं स लक्ष्म
णः प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवं ३० कपिः कथयते हृष्टो यथायं मा
रुतात्मजः कृत्यवान्सोऽपि संप्राप्तः कृतकृत्योऽसि राघव ३१ प्रसन्नमुखवर्णश्च व्य
क्तं हृष्टश्च भाषते नानृतं वक्ष्यते वीरो हनूमान्मारुतात्मजः ३२ ततः स तु महा
प्राज्ञो हनूमान्मारुतात्मजः जगामादाय तौ वीरौ हरिराजाय राघवौ ३३ ॥

रिमार्गणे सहायं करिष्यतीत्यन्वयः ३० सोऽपि त्वया कृत्यवानिति यथा कथयते तथा ज्ञा
ने एतद्देशं संप्राप्तस्त्वं कृतकृत्योऽसीत्यर्थः ३१ उक्तं समर्थयते प्रसन्नेति मुखवर्णेन स्वर शो

16A

वालिनं वानरश्रेष्ठं रोषेण २४ ऊर्ध्वं संगरहत्यापि सविति कृतकृत्यवत्तन दृहे गिरिवरे ऋष्यमूके २५
मगमाने: धनिरमभिरामे किष्किंधाकाण्डे चतुर्थः सर्गः ४ ऋष्यमूकादिति ऋष्यमूके सुग्रीव
वासस्थाने राघवे स्थापयित्वा ततः सुग्रीवानयनार्थं ऋष्यमूकैकदेशामलयाद्रिगिरिगत्वा

भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः हृष्टमारोप्य तौ वीरौ जगाम कपिकुंजरः २४
सत्वविपुलयशाः कपिप्रवीरः पवनसुतः कृतकृत्यवत्प्रहृष्टः गिरिवरमुरुविक्रमः
प्रयातः सशुभमतिः सहरामलक्ष्मणाभ्यां २५ इत्यार्षे रामायणे किष्किंधाकाण्डे चतुर्थः
सर्गः ४ ऋष्यमूकात्तु हनुमान्गत्वा तं मलयं गिरिं आचचक्षे तदा वीरौ कपिराजा
य राघवौ १ अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः लक्ष्मणेन सह भ्रात्रा रामो
यं सत्यविक्रमः २ इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः धर्मे निगदितश्चैव पि
तुर्निर्देशकारकः ३ राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः दक्षिणाश्च तथोत्सृ
ष्टाः गावः शतसहस्रशः ४ ॥

त्वयः १ अयं रामः मलयस्य सुग्रीवदृष्टिपथवर्तित्वादेव निर्देशः पुनरागहादरापशमोयमिति
सत्यविक्रमस्त्वत्रदृढत्वाभ्यां नहुत्रुतिरसनत्तमताम्यते २ इक्ष्वाकूणामित्यनेन स्वरूपक
थने धर्मे स्वसत्यपरिपालनरूपधर्मे निमित्ते निगदितः प्रेरितः पितेति शेषः अतएव तस्य पित

रा० म० किष्किंधाकाण्डे टी०

रा॰म॰ स्त्रीहेतोःपित्रात्यक्ते पदेतस्यवचःपालनहेतोः ४ प्रतिगृह्यदर्शनाकांक्षिणोदक्षिणेनदत्वा ७ दर्शनी
कि॰ यतमोभूत्वाऽऽह्लादवशादितिशेषः ९ धर्मविनीतःधर्मेशिक्षितः ६ एषममैवेच्छालाभः तदेवाह
७
17

तपसासत्यवाक्येनवसुधातेनपालिता स्त्रीहेतोस्तस्यपुत्रोयंरामोरण्यंसमागतः ५
तस्यास्यवसतोरण्येनियतस्यमहात्मनः रावणेनहृताभार्यासत्वांशरणमागतः ६
भवतासख्यकामौतौभ्रातरौरामलक्ष्मणौ प्रतिगृह्यचार्चयस्वेमौपूजनीयतमावुभौ ७
श्रुत्वाहनुमतोवाक्यंसुग्रीवोवानराधिपः दर्शनीयतमोभूत्वाप्रीत्योवाचचराघवं ८
भगवान्धर्मविनीतश्चसुतपाःधर्मवत्सलः आख्यातावायुपुत्रेणतत्त्वतोमेभवद्गु
णाः ९ तन्ममैवैषसत्कारोलाभश्चैवोत्तमःप्रभो यत्त्वमिच्छसिसौहार्दंवानरेणम
यासह १० रोचतेयदिमेसख्यंबाहुरेषप्रसारितः गृह्यतांपाणिनापाणिर्मर्या
दावध्यतांध्रुवा ११ एतत्तुवचनंश्रुत्वासुग्रीवस्यसुभाषितं संप्रहृष्टमनाहस्तंपीडया
मासपाणिना १२ ॥ राम ॥

यत्त्वमितिवानरेणतिर्यग्योनिनापि १० रोचतेयदीतिकार्यवशादितिशेषः ध्रुवामर्यादा अ
नुल्लंघनीयोन्यकार्यसंपादनविषयोनिश्चयः वध्यतांबध्यतां बुध्यविचार्यप्रतिज्ञायतां ११
हस्तंपीडयामासदक्षिणहस्तेनदक्षिणहस्तंगृहीतवान् १२ ॥ राम राम ॥ ७

17A

पीडितं पर्यष्वजत गाढमालिंगितवान् हृतसौहार्दस्थायोपयदन्तपदिश्याग्निसाक्षिकत्वसिद्धये
चरामश्चेति नहनूमता अग्नश्च कृतिस्तत इति भिक्षुरूपं परित्यज्य तेनतयाप्राकृतेनवगत्वातेयोः
वेगमति सुग्रीवान्नाकारणप्रतीतप्तेषामागमनं निवेदनसमये पुनः कृतं भिक्षुरूपं परित्यज्य
स्वेनरूपेणवानररूपेणकाष्ठयोरारण्योरग्निं जनयामास तेनाग्निं दीप्यमानं मितयोर्मध्ये निधानि

हृष्टः सौहृदमालंब्य पर्यष्वजत पीडितं ततो हनूमान्संत्यज्य भिक्षुरूपमरिंदमः १३ का
ष्ठयोः स्वेनरूपेण जनयामास पावकं दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतं १४ त
योर्मध्ये तु सुप्रीतो निदधौ सुसमाहितः ततोग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणं १५
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ततः सुप्रीतमनसौ तावुभौ हरिराघवौ १६
अन्योन्यमभिवीक्षन्तौ न तृप्तिमभिजग्मतुः त्वं वयस्योसि मे हृद्यो ह्येकं दुःखं सुखं च नौ
सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत् ततः सुपर्णबहुलां भंक्त्वा शाखां सुपुष्पितां १७
सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः लक्ष्मणायाथ संहृष्टो हनूमान्मारुतात्मजः १८

हितं च पुष्पैरभ्यर्च्य सत्कृतं परिस्तरणादि संस्कृतं चाकरोत् १४ प्रदक्षिणं चक्रतुः मैत्रीदार्ढ्याय
इति शेषः १५ हृष्टः हृदयप्रियः एकसमानमित्यर्थः १७ प्रहृष्टवत् प्रहृष्टः सन् एतावत्पर्यन्तं स
सुग्रीवस्याभावात् सुग्रीवः पृथगासनस्थ एवासीदिति ज्ञायते तदाह ततः सुपर्णेति शाली
पे राघवायेति शेषः १८ सराघवो निषसाद स्वयं तत्र स्थित इत्यर्थः १९ ॥ राम

१५

वा॰ रा॰ लक्ष्मणेन विषादपरिहारार्थं वचनशास्त्रोक्तत्राणदानं अग्र्यकार्यमर्यादावेपनापप्रवृत्तिः तत
कि॰ इति २॰ इहवनेऽस्मिन्नपः २१।२२ अभयंकुरु अभयप्रतिज्ञां कुरु २३ नेदवदानसाधपुनराहु
५ 18
शाखांचंदनवृक्षस्यदृष्टोपरमपुष्पिते ततः प्रहृष्टः सुग्रीवः श्लक्ष्णमधुरयागिरा २॰
प्रत्युवाचतदारामंहर्षव्याकुललोचनः अहंविनिकृतोरामचरामीहभयार्दितः २१ हृ
तभार्योवनेत्रस्तोदुर्गमेतदुपाश्रितः सोहंत्रस्तोवनेभीतोवसाम्युद्भ्रान्तचेतनः २२ वा
लिनानिकृतोभ्रात्राकृतवैरश्चराघव वालिनोमेमहाभागभयार्तस्याभयंकुरु २३ कर्तुं
मर्हसिकाकुत्स्थभयंमेनभवेद्यथा एवमुक्तस्तुतेजस्वीधर्मज्ञोधर्मवत्सलः २४ प्रत्यभा
षतकाकुत्स्थःसुग्रीवंप्रहसन्निव उपकारफलंमित्रंविदितंमेमहाकपे २५ वालिनं
तंवधिष्यामितवभार्यापहारिणं अमोघाःसूर्यसंकाशामेमेनिशिताःशराः २६ त
स्मिन्वालिनिदुर्वृत्तेनिपतिष्यन्तिवेगिताः कंकपत्रप्रतिच्छन्नामहेन्द्राशनिसन्निभाः २७
तीक्ष्णाग्राऋजुपर्वाणःसरोषाभुजगाइव तमद्यवालिनंपश्यप्रतीक्ष्णैर्विशिखोपमैः २८
शरैर्विनिहतंभूमौप्रकीर्णमिवपर्वतं सतुतद्वचनंश्रुत्वाराघवस्यात्मनोहितं २९ सु
ग्रीवःपरमःप्रीतःपरमंवाक्यमब्रवीत् ३॰॥
कर्तुमिति २४ लीलाविसृष्टैकेषुमात्रसाध्यत्वा
त्प्रहसन्निवेति उपकारःफलंयस्यतं २५ वेगिताःसंजातवेगाः २७ श्रीराम ॥ एम ए

18A

ममवैरिणामग्रजेनख्याकृतः यथापुनःसमनननहिंस्यात् ३ सीतादीनोराज्ञीवादिभिःक्रमेण
तथःकपीन्द्रोववालीपुत्रोवामनेनवसंदोःशुभशासीः स्त्रीणांसशुभशासी ३। कउमानःउ
निरामोपरामायणेतिलकेपंचमःसर्गः ५ आख्यातिम्रा ख्यातिवाननन्निमिनमिशोषः १

तवप्रसादेननटसिंहवीरप्रियांचराज्यंचसमाप्नुयामहं तथाकृतंतेनरदेववैरिणं
यथानहिंस्यात्सपुनर्ममाग्रजं ३ सीताकपीन्द्रेणदाचरंणराजीवहेमसलनो
यमानि सुग्रीवरामप्रणाप्रसंगेवामानिनेत्राणिसमेस्फुरंति ३। इत्यार्षेरामाय
णेकिष्किंधाकांडेपंचमःसर्गः ५ पुनरेवाब्रवीत्प्रीतोराघवंरघुनंदनं अयमाख्या
तिनामसेवकोमेत्रिसत्तमः १ हनूमान्पवित्रमिनतंनिर्जनेवनमागतः लक्ष्मण
नसहभ्रात्रावसन्तत्वंवनेनव २ रक्षसापहृताभार्यामैथिलीजनकात्मजा त्वया
विप्रुकारुदतीलक्ष्मणेनचधीमता ३ अंतरप्रेप्सुनातेनहत्वागृध्रंजटायुषं भा
र्यावियोगजंदुःखंप्रापितस्तेनरक्षसा ४ ॥ राम ॥

तन्किंतत्राह यन्निमित्तमिति २ तयालक्ष्मणेनचविप्रुक्तात्विभार्यासीतांअंतरंप्रेप्सुना।
छिद्रंद्रष्टुमिच्छताऽनेनतेनलोकरावणेनरक्षसातेभार्यावियोगजंदुःखंप्रापितश्चेतिचाख्या

नवति ३ ॥

वा रा कि ६९ 19

रामेणस्वकार्यसाधनेप्रतिज्ञातेसतिस्वयमपितत्कार्यसाधनंप्रतीजानीतेभार्येत्यादिनविरातन
सुग्रीमधुकैटभहंतोदेवस्यधर्मसंवस्यएस्तुज्ञानसाधनभूतान्क्रतिस्मृपीनामिवदीर्घश्रावः १
वर्तनेवर्तमानो ६ नचैनथ्येभवावहीतिअन्वयः विषकृत्तविषमिश्रितं ८ पारद्वशसामैथि

भार्यावियोगजंदुःखंनचिरात्वंविमोक्ष्यसे अहंतामानयिष्यामिनष्टांवेदश्रुतीमिव ५ १
रसातलेवावर्तंतींवर्तंतीवानभस्थले अहमानीयदास्यामितवभार्यामरिंदम ६ इदं
तथ्यंममवचस्त्वमवेहिचराघव नशक्यसाजरयितुमपिसेंद्रैःसुरासुरैः ७ तवभा
र्यांमहावाहोभक्ष्यंविषकृतंयथा त्यजशोकंमहावाहोतांतामानयामिते ८ अनुमा
नात्तुजानामिमैथिलीमानसंशयः ह्रियमाणामयादृष्टारक्षसारौद्रकर्मणा ९ क्रो
शंतीरामरामेतिलक्ष्मणेतिचविस्वरं स्फुरंतीरावणस्यांकेपन्नगेंद्रवधूर्यथा १० आ
त्मनापंचमंमांहिदृष्ट्वाशैलतलेस्थितं उत्तरीयंतयात्यक्तंशुभान्याभरणानिच ११
तान्यस्माभिर्गृहीतानिनिहितानिचराघव आनयिष्याम्यहंतानिप्रत्यभिज्ञातुमर्हसि १२
तमब्रवीत्ततोरामःसुग्रीवंप्रियवादिनं आनयस्वसखेशीघ्रंकिमर्थंप्रविलंबसे १३ प
एवमुक्तस्तुसुग्रीवःशैलस्यगहनांगुहां प्रविवेशततःशीघ्रंराघवप्रियकाम्यया १४ ॥

लोतिअनुमानात्तुइत्यार्धमामकाईमेत्याक्रोशांलिंगाज्जानामीत्यन्वयः ९ आत्मनःपंच
मंमंविचारेहृदयसहितंमामित्यर्थः ॥ आनयिष्यामि आनेष्यामिदृष्टेत्यत्रप्रमाणादर्शनमिदं
१३ गहनांदुष्प्रवेशां १४ राम ॥ राम ॥ राम ॥ ६९

हाप्रियेऽस्तीत्यत्रसंधिरार्षः १७ हृदीतिप्रियसंबोधनंप्रीत्यतिशयात् २० शाद्वलंमृदुतृणोपेतंलिम
माह तथारूपमिति अभग्नतयायथापूर्वरूपमित्यर्थः २१ नाहमितिऊर्ध्वदृष्ट्यापरस्त्रीत्वं

उत्तरीयंगृहीत्वातुशुभान्याभरणानिच इदंपश्येतिरामायदर्शयामासवानरः १५ त
तोगृहीत्वावासस्तुशुभान्याभरणानिच अभवद्बाष्पसंरुद्धोनीहारेणेवचन्द्रमाः १६
सीतास्नेहप्रवृत्तेनसतुबाष्पेणदूषितः हाप्रियेतिरुदन्धैर्यमुत्सृज्यन्यपतत्क्षि
तौ १७ हृदिकृत्वासबहुशस्तमलंकारमुत्तमं निशश्वासभृशंसर्पोबिलस्थ
इवरोषितः १८ अविच्छिन्नाश्रुवेगस्तुसौमित्रिंवीक्ष्यपार्श्वतः परिदेवयितुंदीनं
दीनंरामःसमुपचक्रमे १९ पश्यलक्ष्मणवैदेह्यासंत्यक्तंह्रियमाणया उत्तरीय
मिदंभूमौशरीराद्भूषणानिच २० शाद्वलिन्यांध्रुवंभूम्यांसीतयाह्रियमाणया उत्सृ
ष्टंभूषणमिदंतथारूपंहिदृश्यते २१ एवमुक्तस्तुरामेणलक्ष्मणोवाक्यमब्रवीत्
नाहंजानामिकेयूरेनाहंजानामिकुण्डले २२ नूपुरेत्वभिजानामिनित्यंपादाभिवंद
नात् ततस्तुराघवोवाक्यंसुग्रीवमिदमब्रवीत् २३ ब्रूहिसुग्रीवकंदेशंह्रियंतीलक्ष
क्षितात्वया रक्षसारौद्ररूपेणममप्राणप्रियाहृता २४

२२
नकदाप्यदर्शनादितिभावः

कंदेशम्ह्रियन्तीतिशेषः प्राणप्रियाप्राणेभ्योपीष्टाप्राणसंबंधस्तनदर्पोतत्वादितिभावः २४ ॥

वा रा
कि
२०
20

यन्निमित्तं प्रियापहर्त्तारं नहि मितं २९ विमथ्यं वेचापित्वा ३० स त्वमानः इति रा॰ किष्किंधाकांडे षष्ठः
सर्गः ६ एवमिति तस्य पापरक्षसः पापं कृतवं तोरक्षसो निलयं निलयस्थानं गुह्यवासस्थानं स
स्थानं जाने नहीदृशं पापकर्म कृत्वा राजधान्यां वस्तुमर्हतीति भावः सामर्थ्यं शौर्यादिविशे
षेण कामं निपादविहेषकरोत्ति पत्रद्वासनगरं दोषकुल्मयसत्येन नरतसाकूलजनवधनि

कृतवाक्यमितिनद्दत्तो मद्दृश्यसनं दमम यन्निमित्तमहं सर्वो नाशयिष्यामि राक्षसान् २८
हरता मैथिलीं येन मां च रोषयता भृशं आत्मनो जीवितांताय मृत्युद्वारमपावृतं २९
मम दयितत मा हृता वनाद्रजनिचरेण विमथ्य येन सा कथय मम रिपुं तमद्य वै प्लवग
पते यमसन्निधिं नयामि ३० इत्यार्षे रामायणे किष्किंधाकांडे षष्ठः सर्गः ६ एवमुक्तस्तु
सुग्रीवो रामेणार्तेन वानरः अब्रवीत्प्रांजलिर्वाक्यं सबाष्पं बाष्पगद्गदः १ न जाने नि
लयं तस्य सर्वथा पापरक्षसः सामर्थ्यं विक्रमं वापि दौष्कुलेयस्य वा कुलं २ सत्यं ते
प्रतिजानामि त्यज शोकमरिंदम करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीं ३

तेन ज्ञाने पृवेति शेषः वाशब्दावर्थे अत एव लंकाद्वीपं निर्दिशामि वध्यस्य दुरात्मना राक्षसापिप
तेर्वासः स हस्तावात्समयुक्ते रिति हतमदक्षिति प्रेषणकालिकसुग्रीववचसा न विरोधः यद्यप्य
तावज्जानामि तथापि तदुपवर्णनेन निष्फलत्वात् ज्ञानेपि तत्स्वरूपासंभवात् कचिदस्ति
तिसंभवात् एतावत्त्र व मम्य नामित्याह सत्यं ते त्विति ३ ॥ राम ॥ राम ॥ २०

20A

परितोषंभवतःपरितोषादाहंआत्मनःसपरिवारस्यममपौरुषमवलंबेइतिशेषः ४ सदृशमयुक्त ५ तां
प्रियां ७ सत्वयुक्तांनेसित्वगुणवता ८ व्यसनेष्टवियोगजंअर्थकृच्छ्रंधननाशभयंचौरव्याघ्रादिजं।

गवर्णसमगणंहत्वापरितोषात्मपौरुषं तथास्मिकर्तानचिराद्यथाप्रीतोभविष्यसि ४ अ
लंवैक्लव्यमालंब्यधैर्यमात्ममतंस्मर त्वद्विधानांमस्दृशामीदृशाबुद्धिलाघवं ५ मया
पिव्यसनंप्राप्तंभार्याविरहजंमहत नाहमेवंहिशोचामिधैर्येनचपरित्यजे ६ नाहं
तामनुशोचामिप्राकृतोवानरोपिसन् महात्माचविनीतश्चकिंपुनर्धृतिमान्महान् ७
वाष्पमापतितंधैर्यान्निग्रहीतुंत्वमर्हसि मर्यादांसत्वयुक्तानांधृतिंनोत्स्रष्टुमर्हसि ८
व्यसनेनापिकृच्छ्रेवांभयेवाजीवितांतगे विमृशंश्चस्वयाबुद्ध्याधृतिमान्नावसीदति ९
वालिशस्तुनरोनित्यंवैक्लव्यंयोनुवर्तते ससज्जत्यवशःशोकेभाराक्रांतेवनौर्जले १०
एषोंजलिर्मयावद्धःप्रणयात्वांप्रसादये पौरुषंश्रयशोकस्यनांतरंदातुमर्हसि ११ ये
शोकमनुवर्तंतेनतेषांविद्यतेसुखं तेजश्चक्षयतेतेषांशोचितुमर्हसि १२ नतुर
शोकेनाभिप्रपन्नस्यजीवितेचापिसंशय सशोकंत्यजराजेंद्र
धैर्यमाश्रयकेवलं १३ ॥ राम ॥

जीवितांतगे जीवितनाशप्रायके विमृशन्प्रारब्धवेगमितिशेषः योवालिशःयश्चनित्यंवैक्ल
व्यमनुवर्तते समज्जति तस्यार्थेभाराक्रांताप्रतीभारवती ९ अवसंन्नेतरं ११ १२ १३ ॥

वा रा॰ कि॰ २१ 21

त्वमित्रवीमि १४ प्रमार्जयत प्रामार्जयत् १५ कर्तव्यं यत्न शोकनाशार्थमिति शेषः १७ प्रकृतिस्थः
स्वभावस्थोदुःखेहीनइत्यर्थः अस्मिन्काले प्रसन्नकाने रावणस्य संहारे चेति शेषः मयाचयद्दृत्त
दृष्टंयत्नेवेतिशेषः वर्षास्विव क्षेत्रे बीजमिति शेषः संपद्यते सफलं भविष्यतीत्यर्थः १९

हितंवयस्यभावेनब्रूमिनोपदिशामिते वयस्यताऽपूज्यस्येमन्नत्वंशोचितमर्हसि १४
मधुरंसांत्वितस्तेनसुग्रीवेणसराघवः मुखमश्रुपरिक्लिन्नंवस्त्रान्तेनप्रमार्जयत् १५
प्रकृतिस्थस्तुकाकुत्स्थःसुग्रीववचनात्प्रभुः संपरिष्वज्यसुग्रीवमिदंवचनमब्रवीत् १७
त् १६ कर्तव्यंयद्वयस्येनस्निग्धेनचहितेनच अनुरूपंचयुक्तंचकृतंसुग्रीवतत्त्वया
एषचप्रकृतिस्थोहमनुनीतस्त्वयासखे दुर्लभोहीदृशोबंधुरस्मिन्कालेविशेषतः १८
किंतुयत्नस्त्वयाकार्योमैथिल्याःपरिमार्गणे राक्षसस्यचरौद्रस्यरावणस्यदुरात्मनः
मयाचयदनुष्ठेयंविस्रब्धेनतदुच्यतां वर्षास्विवचक्षेत्रेषुसर्वंसंपद्यतेतव २०
मयाचयदिदंवाक्यमभिमानात्समीरितं तत्त्वयाहरिशार्दूलतत्त्वमित्युपधार्यतां २१
अनृतंनोक्तपूर्वंमेनचवक्ष्येकदाचन एतत्तेप्रतिजानामिसत्येनैवशपाम्यहं २२
ततःप्रहृष्टःसुग्रीवोवानरैःसचिवैःसह राघवस्यवचःश्रुत्वाप्रतिज्ञातंविशेषतः २३

अप्रत्यायवर्तमानप्रयोगः २० इदंवाक्यंवालिनंवधिष्यामीतिवाक्यंअभिमानात्तत्तदेव २१
एतदन्यतवचनाभावेसत्येनतन्नाहितं प्रत्यर्थः २२ २३ ॥ राम ॥ राम २१

21A

संहृष्टौकृतसख्यसंपन्नौ अभाषतां अभाषेतां २५ एवमानः इतिरामाभिरामेसप्तमः ७ तेनवाक्ये
नन्दितेनोक्तःसुवेमेइत्यादिवाक्येनउपपन्नःसंयतः २ सभाज्यःपूज्यःयस्ययेनराघववंशजंमित्रे

एवमेकांतसंहृष्टौतत्स्तौनरवानरौ उभावन्योन्यसदृशंसुखंदुःखमभाषतं २५ महा
नुभावस्यवचोनिशम्यहरिर्नराणामधिपस्यतस्य कृतंसमेनेहरिवीरमुख्यस्तदाच
कार्यंहृदयेनविद्वान् २६ इत्यार्षेरामायणेकिष्किंधाकांडेसप्तमःसर्गः ७ परितुष्टस्तुसु
ग्रीवस्तेनवाक्येनहर्षितः लक्ष्मणस्याग्रजंशूरमिदंवचनमब्रवीत् १ सर्वथाहमनु
ग्राह्योदेवतानामसंशयः उपपन्नोगुणोपेतासखायस्यभवान्मम २ शक्यंखलु
भवेद्रामसहायेनत्वयानघ सुरराज्यमपिप्राप्तुंस्वराज्यंकिमुतप्रभो ३ सोहंसभाज्यो
बंधूनांसुहृदांचैवराघव यस्याग्निसाक्षिकंमित्रंलब्धंराघववंशजं ४ अहमप्यनु
रूपस्तेवयस्योज्ञास्यसेशनैः नतुवक्तुंसमर्थोहंत्वयिआत्मगतान्गुणान् ५ महा
त्मनांतुभूयिष्ठंत्वद्विधानांकृतात्मनां निश्चलाभवतिप्रीतिर्धैर्यमात्मवतांवरः ६
रजतंवासुवर्णंवाशुभान्याभरणानिच अविभक्तानिसाधूनामवगच्छंतिसाधवः ७

लब्धे ४ अनुरूपःयोग्यःज्ञास्यसेअनुरूपमितिशेषः नतुवक्तुंसमर्थःआत्मप्रशंसामरणमि
मितिन्यायात् ५ भूयिष्ठमत्यंतंप्रीतिर्निश्चलाभवति वयस्यानामितिशेषःआत्मवतांस्वाधी
नानां ६ साधूनांवयस्यानांसाधवोवयस्याःजनमित्युपलक्षणं ७ ॥

रा॰ वा॰ वयस्याः परमा गतिः वयस्यस्येति शेषः ८ तथाविधंस्वरसतोपनादित्यागप्रवर्तकमित्यर्थः ६
कि॰ तत्तथेति षड्कं वयस्ययोर्धनादिविभागादिकं तत्सर्वमपि संमतमित्यब्रवीदित्यर्थः लक्ष्म्यै
२२ कान्त्या पुत्रो रामः वासवस्येव वासवसदृशस्य लक्ष्मणस्येत्यन्वयः लक्ष्मणस्याग्रतस्त्व
22

आढ्यो वापि दरिद्रो वा दुःखितः सुखितोपि वा निर्दोषश्च सदोषश्च वयस्याः पर
मा गतिः ८ धनत्यागः सुखत्यागो देशत्यागोपि वानघ वयस्यार्थे प्रवर्तन्ते स्ने
हं दृष्ट्वा तथाविधं ९ तत्तथेत्यब्रवीद्रामः सुग्रीवं प्रियदर्शनं लक्ष्मणस्याग्रतो ल
क्ष्म्या वासवस्येव धीमतः १० ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलं ११ स द
दर्श ततः सालमविदूरे हरीश्वरः सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितं १२ त
स्यैकां बहुलां शाखां भंक्त्वा पर्णैः सुशोभितां रामस्याभ्यास्य सुग्रीवो निषसाद सराघ
वः १३ तत्रासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणं सालशाखां समुत्पाट्य विनीत
मुपवेशयत् १४ सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा सालपुष्पावसंकीर्णे तस्मि
न् गिरिवरोत्तमे १५ ततः प्रहृष्टः सुग्रीवः श्लक्ष्णया शुभया गिरा उवाच प्रणयाद्रामं १६
हर्षव्याकुलिताक्षरं

तेनेव यथा मम लक्ष्मणस्समीपे स्थितश्चैव वनवासीत्यपि सूचितं १०
ततः तद्विनापि समाप्तिर्भवतीति पदेनेत्यर्थः स्थितं दृष्ट्वा भूमाविति शेषः ११ ईषत्सुपुष्पं पत्रा
ढ्यं पत्रबहुलं सराघवः सुग्रीवो निषसाद १३ १४ सुखोपविष्टं रामं तु दृष्ट्वेति शेषः १५ २२

22A

अहंविनिकृतइतिश्लोकद्वयेस्वकार्यस्मरणं नतद्दर्शस्यावधयात्तुष्टयत्वाभिप्रायेण १८ ननुभ्रातृत्वमरि
त्वेनविरुद्धमितिजनापवादापास्यैमेवोन्नयति उपकारेत्यादिउपकारस्वरूपफलमेवमित्रत्वेप्रयोजन

अहंविनिकृतोभ्रात्राचरामित्येषभयार्दितः ऋष्यमूकंगिरिवरंहृतभार्यःसुदुःखितः १७ ।
सोहंत्रस्तोभयेमग्नोवनेसंभ्रांतचेतनः वालिनानिकृतोभ्रात्राकृतवैरश्चराघव १८ वा
लिनोमेभयार्तस्यसर्वलोकाभयंकर ममापित्वमनाथस्यप्रसादंकर्तुमर्हसि १९ एवं
मुक्तस्तुतेजस्वीधर्मज्ञोधर्मवत्सलः प्रत्युवाचसकाकुत्स्थःसुग्रीवंप्रहसन्निव २० उप
कारफलंमित्रमपकारोरिलक्षणं अद्यैवतंवधिष्यामितवभार्यापहारिणं २१ इमेहिमे
महाभागपत्रिणस्तिग्मतेजसः कार्तिकेयवनोद्भूताःशराहेमविभूषिताः २२ कंकपत्र
प्रतिच्छन्नामहेंद्राशनिसन्निभाः सुपर्वाणःसुतीक्ष्णाग्राःसरोषाभुजगाइव २३ वालिसं
ज्ञममित्रंतेभ्रातरंकृतकिल्बिषं शरैर्विनिहतंपश्यविकीर्णमिवपर्वतं २४ राघवस्यव
चःश्रुत्वासुग्रीवोवाहिनीपतिः प्रहर्षमतुलंलेभेसाधुसाध्वितिचाब्रवीत् २५

कनत्वेकोदरत्वेनमेत्याशयः २१ कार्तिकेयस्यस्कंदस्योत्पत्तिहेतुभूतंवनंशरवनंतत्रोत्पन्नकां
डाः २२ शोभनानिपर्वाणियेषांते २३ भ्रातरंअमित्रमपिअएकोदरजन्ममात्रेणतथाप्यवरत्तप
प्रपद्दितैर्दिवसैरितिशेषः २४ २५ ॥ राम ॥ १

रा. वा. दुःखेनाप्यातुरेणाह रामेत्यादि शोकार्त्तेन गतिर्नास्ति बहुपस्य त्वाद्य त्वमपि देवनं २६ वयस्यत्वमु
कि. पादयन् करुणमनुत्पादयति अग्निसाक्षिके पाणिप्रदानेन वयस्यस्त्वं कृत्यमनयः २७ अवक्त
२३ व्यमपि वयस्य इति कृत्वा विस्रब्धो विश्वासेन वदामि हरति नित्यं करोति २८ न शक्नोति न श

23

राम शोकाभिभूतोऽहं शोकार्त्तानां भवान् गतिः वयस्य इति कृत्वा हि त्वय्यहं परिदेव
ये २६ त्वं हि पाणिप्रदानेन वयस्योऽग्निसाक्षिकः कृतः प्राणैर्बहुमतः सत्येन च
शपाम्यहं २७ वयस्य इति कृत्वा च विस्रब्धः प्रवदाम्यहं दुःखमन्तर्गतं यन्मे मनो हर
ति नित्यशः २८ एतावदुक्त्वा वचनं बाष्पदूषितलोचनः बाष्पदूषितया वाचा नो
च्चैः शक्नोति भाषितुं बाष्पवेगं तु सहसा नदीवेगमिवागतं धारयामास धैर्येण सु
ग्रीवो रामसन्निधौ ३० स निगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे विनिःश्वस्य च तेजस्
स्वी राघवं पुनरब्रवीत् ३१ पुराहं वालिना राम राज्यात्स्वादवरोपितः परुषाणि
च संश्राव्य निर्धूतोऽस्मि बलीयसा ३२ हृता भार्या च मे तेन प्राणेभ्योऽपि गरीयसी सु
हृदश्च मदीया ये संयता बन्धनेषु ते ३३ ॥

कोऽत्र ३१ वालिविनिकारं संक्षेपेणाह पुराहमिति स्वाद्राज्यात् विद्यमानज्येष्ठापित्रा
दानराज्यात् अवरोपितोऽपहृतापि कारः निर्धूतो भर्त्सितः ३२ बन्धनेषु बन्धनागारेषु

रामायणे कि. ८

23A

तत्पुत्रामहद्भयायतन्मेलीनाः ३४ पतत्याशंकयामहद्भायवालिप्रेरितत्वशंकयापात्सर्वभयेयत्न
किंचिद्भपपाप्रौविभ्यति सर्वतएवेतिशेषः ३० संतप्तस्यैषइत्यत्रगच्छद्वार्थः समेस्पष्टइतितद्विना।

पतत्वंस्त्रसदृशात्मामहद्विनाशायराघव वह्निशात्तत्पुत्रास्तुवानरानिहृतामया ३४
शंकयात्वेनयाहं च रक्षितात्मामपिराघव नोपसर्पाम्यहंभीतोभयेपसर्वेहिविभ्यति ३५ ३६
केवलंहेमहायोमहनुमत्प्रमुखास्त्विमे अतोहंधारयाम्यद्यप्राणान्कृच्छ्रगतोपिसन्
एतेहिकपयःस्निग्धामांरक्षन्तिसमंततः सहगच्छन्तिगन्तव्यंनित्यंतिष्ठन्तिचास्थिते ३०
